Bodleian Libraries
UNIVERSITY OF OXFORD

This book is part of the collection held by the Bodleian Libraries and scanned by Google, Inc. for the Google Books Library Project.

For more information see:

http://www.bodleian.ox.ac.uk/dbooks

This work is licensed under a Creative Commons Attribution-NonCommercial-ShareAlike 2.0 UK: England & Wales (CC BY-NC-SA 2.0) licence.

Sansk. G. 7. 6 3.66

# HITOPADEŚA:

THE

## SANSKṚIT TEXT,

WITH A

## GRAMMATICAL ANALYSIS, ALPHABETICALLY ARRANGED.

BY

FRANCIS JOHNSON,

SOMETIME PROFESSOR OF ORIENTAL LANGUAGES AT THE COLLEGE OF THE HONOURABLE THE EAST INDIA COMPANY, HAILEYBURY.

SECOND EDITION.

HERTFORD:
PRINTED AND PUBLISHED BY STEPHEN AUSTIN.
LONDON:
W. H. ALLEN & CO., WATERLOO PLACE;
LONGMAN, GREEN, LONGMAN, ROBERTS, & GREEN, PATERNOSTER ROW;
WILLIAMS & NORGATE, 14, HENRIETTA STREET, COVENT GARDEN,
AND 20, SOUTH FREDERICK STREET, EDINBURGH.
1864.

295. d. 24.

STEPHEN AUSTIN,

PRINTER, HERTFORD.

BIBLIOTHECA · BODLEIANA ·

TO

MONIER WILLIAMS, ESQ., M.A.,

BODEN PROFESSOR OF SANSKṚIT IN THE UNIVERSITY OF OXFORD,

ETC.,

WHO BY HIS PERSEVERING LABOURS AND CRITICAL SCHOLARSHIP

HAS STIMULATED THE STUDY

AND EXTENDED THE KNOWLEDGE OF THE SANSKRIT LANGUAGE

AMONG HIS FELLOW-COUNTRYMEN,

THE PRESENT EDITION

OF THE

HITOPADEŚA

IS DEDICATED,

BY HIS SINCERE FRIEND AND FORMER COLLEAGUE,

FRANCIS JOHNSON.

# PREFACE TO THE FIRST EDITION.

The collection of Fables and Stories termed Hitopadeśa was brought early to the knowledge of Sanskṛit scholars by the translations of it which were published by Mr. Wilkins and Sir William Jones. The text was printed at Serampore in 1804; and another edition of it was printed in London in 1810. An edition has been subsequently printed at Bonn by Professors Schlegel and Lassen, in which the text is illustrated by copious Latin notes. A translation in the same language was also promised by the former of these distinguished critics and scholars; but his death has prevented the fulfilment of his design.

The pains which have been bestowed upon the Hitopadeśa have been justified by the interest which attaches, on various grounds, to this work; and especially, on account of the history of its literary adventures. These have engaged the attention of different eminent writers; and have been investigated with singular success, especially by Mr. Colebrooke, in the Preface to the Serampore edition of the Hitopadeśa, and by M. Sylvestre de Sacy, in the Introduction to his

Calilah et Dimna. From their investigations it is established, that a work which is to be considered as the original form of the Hitopadeśa was translated from Sanskṛit into Persic in the sixth century of our æra, by order of Nushiravān;—that it was translated from ancient Persic into Arabic in the ninth century;—that it was presently afterwards rendered into Hebrew and Greek;—and that, from these versions, successive translations were made into all the languages of Modern Europe, until it became familiar, even to youth, under the designation of Pilpay's Fables. In Hindustān, it has continued to retain its popularity to the present day; where it has served as the substance of the Anvāri Sohaili, and Khirad-Afroz; and exists, in the form of translation, in all the spoken dialects.

The value of the Hitopadeśa to the history of narrative fiction is not, however, its only recommendation. Its popularity through so many ages, amidst such various nations, is evidence of intrinsic merit: and the pictures of domestic manners and human nature which it presents, however tinctured by national peculiarities, must have been recognized as universally true, as well as diverting; or they would not have been naturalized in the West as well as in the East. In the maxims also which the tales serve to illustrate, there must have been much that secured the acquiescence of all mankind, or the remarks would have been left to enlighten the moralists of India alone. These qualities admitted of transfusion into other tongues; but the intrinsic merits of the work as a composition have chiefly recommended its

preservation by the press, and its circulation amongst the cultivators of Sanskṛit literature.

The moral verses with which the Hitopadeśa abounds are, in many cases, perhaps in all, quotations from different writers. They consequently form a sort of anthology,—a collection of passages, not only remarkable for striking thoughts, but offering examples of various styles. In general, they are not of difficult construction; and those passages which are most elaborate, are necessarily short: and, as the thoughts which they express are compressed within a few words, they become, from their sententiousness, impediments of no protracted duration. The narratives are, in general, written in very simple and unpretending prose; and it may be doubted if any book exists in the Sanskṛit language that is better adapted to introduce a Student to its acquirement. In no single work is there to be met with a more comprehensive assemblage of serviceable words and phrases.

The want of copies of an English edition of the Hitopadeśa induced the Editor of the present publication to prepare, a few years since, for the press, the first selection of the four books into which the work is divided,—the Mitra-lābha, or Acquisition of Friends; and to furnish it with such facilities as might assist the Student to make himself master of the sense, with no greater degree of application than might be expected at an early period of study. With this view, the introductory section was printed in English as well as in Deva-nāgari

characters; a nearly literal translation of the same portion was subjoined; and a Glossary was added in which all the words were alphabetically arranged, with an explanation of their meaning, and an indication of their grammatical structure.

The advantages which have been found to result from this arrangement have encouraged the Editor to extend his plan to the entire work; and to print the whole of the text of the Hitopadeśa, with a Glossary of all the words which it contains.

The text has been carefully collated, not only with that of the earlier editions, and especially with that of Bonn, the accuracy of which, notwithstanding some exceptions, is to be highly commended; but with two excellent manuscript copies belonging to the valuable library of the Honourable East India Company.

East India College, Herts.
*January* 19, 1847.

# ADVERTISEMENT TO THE SECOND EDITION.

In preparing the present edition of the Hitopadeśa for the press, the Editor has availed himself of a manuscript copy, formerly the property of the late Professor H. H. Wilson, and now in the Bodleian Library at Oxford (numbered 39 in the catalogue). Exclusively of some choice readings, this manuscript contains sundry interpolations, the greater part of which have been inserted among the notes subjoined to the text of the present volume.

Since the publication of the former edition in 1847, the text of the Pancha Tantra has been edited in Germany by Professor Kosegarten. Few Sanskṛit scholars need to be informed that the Pancha Tantra is an older work, from which the author or the compiler of the Hitopadeśa drew a large portion of his materials, in verse and prose. Whenever a verse from the Pancha Tantra occurs in the Hitopadeśa, reference has been made in the notes to the chapter and verse of Kosegarten's edition where it is to be found. There are, occasionally, discrepancies between the two texts, not however deemed of sufficient importance to require special remark. In the notes also will be found references to quotations from the Hindu legislator Manu, the moralists Chāṇakya, Bhartṛi Hari, and others.

The Hitopadeśa owes much of its popularity as a Sanskṛit class-book to the happy manner in which verses from various sources and in various styles are ingeniously interwoven with the narrative. In stating this, the Editor does not mean to disparage the usefulness of such a work as the Indische Sprüche, the first volume of which, with a German translation, has lately been published at St. Petersburg by the learned Otto Böhtlingk. In this truly valuable repertory of Sanskṛit proverbs, all the principal verses of the Hitopadeśa, with many others, are arranged in alphabetical order. The convenience of such a plan for purposes of reference is apparent; but the verses, when detached from the stories they illustrate, are likely to lose somewhat of their epigrammatic force.

The copious English and Sanskṛit Dictionary published by Professor Monier Williams, has superseded all further demand for the reversed vocabulary which accompanied the last edition.

F. J.

HERTFORD, 1ST JANUARY, 1864.

# CONTENTS.


| | | PAGE | LINE |
|---|---|---|---|
| INTRODUCTION | | 1 | 1 |

## CHAPTER I.

### THE ACQUISITION OF FRIENDS.

| | | PAGE | LINE |
|---|---|---|---|
| FABLE I. | The Story of the Crow, the Tortoise, the Deer, and the Mouse—including the Story of the Pigeons | 5 | 115 |
| II. | The Old Tiger and the Traveller | 6 | 135 |
| III. | The Deer, the Jackal, and the Crow | 11 | 306 |
| IV. | The Blind Vulture, the Cat, and the Birds | 12 | 321 |
| V. | The Story of the Mouse Hiranyaka | 19 | 535 |
| VI. | The Old Man and his Young Wife | 20 | 551 |
| VII. | The Huntsman, the Deer, the Boar, the Serpent, and the Jackal ... | 25 | 710 |
| VIII. | The King's Son and the Merchant's Wife | 29 | 818 |
| IX. | The Jackal and the Elephant | 30 | 845 |

## CHAPTER II.

### THE SEPARATION OF FRIENDS.

| | | PAGE | LINE |
|---|---|---|---|
| FABLE I. | The Story of the Bull, the Two Jackals, and the Lion | 33 | 931 |
| II. | The Ape and the Wedge | 36 | 1012 |
| III. | The Thief, the Ass, and the Dog | *ib.* | 1024 |
| IV. | The Lion, the Mouse, and the Cat | 42 | 1200 |
| V. | The Poor Woman and the Bell | 43 | 1238 |
| VI. | The Adventures of Kandarpaketu—comprising the Story of the Cow-keeper, the Barber, and their Wives; also the History of the Merchant whose avarice occasioned the loss of all his Wealth | 46 | 1313 |
| VII. | The Farmer's Wife and her Two Gallants | 47 | 1371 |
| VIII. | The Crow, the Golden Chain, and the Black Serpent | 49 | 1395 |
| IX. | The Lion and the Hare | *ib.* | 1406 |
| X. | The Sandpiper and the Sea | 53 | 1504 |

## CHAPTER III.

### WAR.


| | | PAGE | LINE |
|---|---|---|---|
| FABLE I. | The Story of the Geese and the Peacocks | 58 | 1643 |
| II. | The Birds and the Monkeys | 59 | 1665 |
| III. | The Ass in a Tiger's Skin | *ib.* | 1685 |
| IV. | The Elephants and the Hares | 60 | 1707 |
| V. | The Goose and the Crow | 62 | 1761 |
| VI. | The Quail and the Crow | *ib.* | 1773 |
| VII. | The Wheelwright and his Wife | 63 | 1787 |
| VIII. | The Blue Jackal | 67 | 1907 |
| IX. | The Soldier who sacrificed his own Son | 72 | 2044 |
| X. | The Barber who killed a Beggar | 74 | 2111 |


## CHAPTER IV.

### PEACE.


| | | | |
|---|---|---|---|
| FABLE I. | Continuation of the Story of the Geese and the Peacocks | 81 | 2283 |
| II. | The Turtle and the Two Geese | *ib.* | 2294 |
| III. | The Three Fishes | 82 | 2302 |
| IV. | The Merchant and his Artful Wife | *ib.* | 2309 |
| V. | The Cranes and the Ichneumon | 83 | 2335 |
| VI. | The Mouse and the Hermit | 84 | 2368 |
| VII. | The Crane and the Crab | *ib.* | 2382 |
| VIII. | The Brahman who broke the Pots and Pans | 85 | 2410 |
| IX. | The Two Giants | 86 | 2438 |
| X. | The Brahman and his Goat | 90 | 2540 |
| XI. | The Camel, the Crow, the Tiger, and the Jackal | *ib.* | 2551 |
| XII. | The Old Serpent and the Frogs | 92 | 2595 |
| XIII. | The Brahman and his Ichneumon | 95 | 2691 |

ANNOTATIONS .......... 101

VOCABULARY .......... 113

SCHEME OF THE METRES .......... 279

# GRAMMATICAL REFERENCES.

For the coalition and permutation of the Vowels and Consonants, a few References to the Rules of Professor Williams' Sanskrit Grammar, *Third Edition*, may be of service to the early Student.

| IN LINE | | | | BY RULE |
|---|---|---|---|---|
| 2 | लेखा इव | has become | लेखेव | 32 |
| — | यद् मूर्ध्नि | | यन्मूर्ध्नि | 47 |
| 3 | श्रुतस् | | श्रुतो | 64 |
| — | हितोपदेशस् | | हितोपदेशो | 64 |
| — | अयं | | ऽयं | 64 *a.* |
| — | संस्कृत उक्तिषु | | संस्कृतोक्तिषु | 32 |
| 5 | प्राज्ञस् | | प्राज्ञो | 64 |
| 6 | गृहीतस् | | गृहीत | 66 |
| 7 | विद्या एव | | विद्यैव | 33 |
| — | आहुस् | | आहुर् | 65 |
| 8 | अहार्यत्वात् | | अहार्यत्वाद् | 45 |
| — | अक्षयत्वात् | | अक्षयत्वाच् | 48 |
| 9 | नीचगा अपि | | नीचगाऽपि | 31 |
| 11 | विनयात् | | विनयाद् | 45 |
| 14 | द्वितीया आद्रियते | | द्वितीयाद्रियते | 31 |
| 15 | यत् नवे | | यन्नवे | 47 |
| — | संस्कारस् | | संस्कारो | 64 |
| — | न अन्यथा | | नान्यथा | 31 |
| 16 | तत् | | तद् | 45 |
| 17 | सन्धिस् | | सन्धिर् | 65 |
| 18 | तथा अन्यस्मात् | | तथान्यस्मात् | 31 |
| — | अन्यस्मात् | | अन्यस्माद् | 45 |

| IN LINE | | | | BY RULE |
|---|---|---|---|---|
| 18 | ग्रन्थात् | has become | ग्रन्थाद् | 45 |
| 19 | सुदर्शनस् | | सुदर्शनो | 64 |
| 20 | नरपतिस् | | नरपतिर् | 65 |
| — | सस् | | स | 67 |
| — | भूपतिस् | | भूपतिर् | 65 |
| 22 | नास्ति अन्धस् | | नास्त्यन्धस् | 34 |
| — | अन्धस् | | अन्ध | 66 |
| 24 | अपि अनर्थाय | | अप्यनर्थाय | 34 |
| 25 | इति आकर्ण्य | | इत्याकर्ण्य | 34 |
| — | आकर्ण्य आत्मनः | | आकर्ण्यात्मनः | 31 |
| 26 | अननुष्ठानेन उद्विग्न | | अननुष्ठानेनोद्विग्न | 32 |
| 27 | कस् अर्थस् | | को ऽर्थस् | 64 *a.* |
| — | यस् | | यो | 64 |
| 28 | पीडा एव | | पीडैव | 33 |
| 30 | सकृत् | | सकृद् | 45 |
| — | दुःखकरी आद्यौ | | दुःखकरावाद्यौ | 37 |
| — | आद्यौ अन्तिमस् | | आद्याव् अन्तिमस् | 37 |
| 31 | जातस् | | जातो | 64 |
| 36 | मातुस् उच्चारस् | | मातुर् उच्चारस् | 65 |
| — | उच्चारस् एव | | उच्चार एव | 66 |
| 37 | शतैस् | | शतैर् | 65 |
| 38 | एकस् चन्द्रस् | | एकश् चन्द्रस् | 62 |
| — | तमस् हन्ति | | तमो हन्ति | 64 |
| 40 | भवेत् | | भवेद् | 45 |
| — | समृद्धस् | | समृद्धो | 64 |
| 42 | वश्यस् च | | वश्यश्च | 62 |
| 42 | पुत्रस् अर्थकरी | | पुत्रो ऽर्थकरी | 64 *a* |
| — | षट् | | षड् | 65 |
| 45 | शत्रुस् | | शत्रुर् | 65 |
| 53 | पुत्रास् | | पुत्रा | 66 *a.* |
| 56 | यस्य एको | | यस्यैको | 33 |
| — | एकस् अपि | | एको ऽपि | 64 *a.* |
| 57 | स्तनस्य इव | | स्तनस्येव | 32 |

| | | | |
|---|---|---|---|
| IN LINE | | | BY RULE |
| 59 | पञ्च एतानि | has become पञ्चैतानि | 33 |
| — | एतानि अपि | एतान्यपि | 34 |
| 62 | चेत् न | चेन्न | 47 |
| 67 | लक्ष्मीस् दैवेन | लक्ष्मीर् दैवेन | 65 |
| 83 | सम्पन्नास् | सम्पन्ना | 66 *a.* |
| 84 | निर्गन्धास् इव | निर्गन्धा इव | 66 *a.* |
| 86 | तावत् च | तावच्च | 48 |
| — | किञ्चित् न | किञ्चिन्न | 47 |
| 87 | राजा उवाच | राजोवाच | 32 |
| 88 | भोस् | भो | 66 *d.* |
| 93 | समैस् च | समैश् च | 62 |
| 95 | सम्भूताम् एते | सम्भूता एते | 66 *a.* |
| 98 | अस्मिन् तु | अस्मिंस् तु | 53 |
| 107 | भवन्ति अपेयाः | भवन्त्यपेयाः | 34 |
| 113 | पुत्रैस् उक्तम् | पुत्रैर् उक्तम् | 65 |
| 117 | राजपुत्रास् ऊचुः | राजपुत्रा ऊचुः | 66 *a.* |
| 118 | दिश् देशात् | दिग्देशात् | 43 *e.* |
| 129 | तस्मिन् एव | तस्मिन्न् एव | 52 |
| — | विसर्पन् तान् | विसर्पंस् तान् | 53 |
| 136 | चरन् अपश्यम् | चरन्न् अपश्यम् | 52 |
| 138 | किन्तु अस्मिन् | किन्त्व् अस्मिन् | 34 |
| — | अस्मिन् आत्म | अस्मिन्न् आत्म | 52 |
| 146 | दुवृत्तस् आसम् | दुर्वृत्त आसम् | 66 |
| — | बधात् मे | बधान्मे | 47 |
| 154 | एतावान् लोभ | एतावांल् लोभ | 56 |
| 168 | प्रयच्छ ईश्वरे | प्रयच्छेश्वरे | 32 |
| 175 | शनैस् | शनैः | 63 |
| — | शनैस् उपगम्य | शनैर् उपगम्य | 65 |
| 189 | चिन्तयन् एव | चिन्तयन्न् एव | 52 |
| 198 | तु असन्तुष्टः | त्वसन्तुष्टः | 34 |
| 212 | तद् जयः | तज्जयः | 48 |
| 232 | अपहारकान् तान् | अपहारकांस्तान् | 53 |
| 255 | एतद् श्रुत्वा | एतच्छ्रुत्वा | 49 |

| IN LINE | | | | BY RULE |
|---|---|---|---|---|
| 283 | आत्मनि अवज्ञा | has become | आत्मन्यवज्ञा | 34 |
| 320 | तौ आहतुः | | तावाहतुः | 37 |
| 333 | हन्तव्यः | | घन्तव्यः | 50 |
| 337 | कीदृग् व्यापारवान् | | कीदृग्व्यापारवान् | 43 *e.* |
| 461 | भयात् | | भयाल् | 48 |
| 465 | छेदे | | च्छेदे | 48 *c.* |
| 679 | द्वे एव | remains | द्वे एव | 38 |
| 860 | योगात् | has become | योगाज् | 48 |
| 1539 | बुद्धिस् रहसि | | बुद्धी रहसि | 65 *a.* |
| 1731 | किम्पुनर् राज्यम् | | किम्पुना राज्यम् | 71 *c.* |
| 1984 | स्वयोधिस् रचितस्य | | स्वयोधी रचितस्य | 65 *a.* |
| 1991 | युध्येयुस् | | युध्येयू | 65 *a.* |

# ॥ हितोपदेशः ॥

॥ श्री गणेशाय नमः ॥

सिद्धिः साध्ये सताम् अस्तु प्रसादात् तस्य धूर्जटेः ।
जाह्नवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥ १ ॥
श्रुतो हितोपदेशो ऽयं पाटवं संस्कृतोक्तिषु ।
वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥ २ ॥
अजरामरवत् प्राज्ञो विद्याम् अर्थं च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्मम् आचरेत् ॥ ३ ॥
सर्वद्रव्येषु विद्यैव द्रव्यम् आहुर् अनुत्तमम् ।
अहार्यत्वाद् अनर्घत्वाद् अक्षयत्वाच्च सर्वदा ॥ ४ ॥
सङ्गमयति विद्यैव नीचगा ऽपि नरं सरित् ।
समुद्रमिव दुर्धर्षं नृपं भाग्यम् अतः परम् ॥ ५ ॥
विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनम् आप्नोति धनाद् धर्मं ततः सुखम् ॥ ६ ॥
विद्या शस्त्रं च शास्त्रं च द्वे विद्ये प्रतिपत्तये ।
आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा ॥ ७ ॥
यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ।
कथाछलेन बालानां नीतिस् तद् इह कथ्यते ॥ ८ ॥
मित्रलाभः सुहृद्भेदो विग्रहः सन्धिर् एव च ।
पञ्चतन्त्रात् तथान्यस्माद् ग्रन्थाद् आकृष्य लिख्यते ॥ ९ ॥

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम् । तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिर् आसीत् । स भूपतिर् एकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव ।

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ १० ॥

यौवनं धनसम्पत्तिः प्रभुत्वम् अविवेकता ।
एकैकम् अप्यनर्थाय किमु यत्र चतुष्टयम् ॥ ११ ॥

इत्याकर्ण्यात्मनः पुत्राणाम् अनधिगतशास्त्राणां नित्यम् उन्मार्गगामिनां शास्त्राननुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास ।

को ऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः ।
काणेन चक्षुषा किं वा चक्षुः पीडैव केवलम् ॥ १२ ॥
अजातमृतमूर्खाणां वरम् आद्यौ न चान्तिमः ।
सकृद् दुःखकरावाद्याव् अन्तिमस् तु पदे पदे ॥ १३ ॥

किञ्च । स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥ १४ ॥

अन्यच्च । गुणिगणगणनारम्भे न पतति कठिनी सुसम्भ्रमाद् यस्य ।
तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी नाम ॥ १५ ॥

अपिच । दाने तपसि शौर्ये च यस्य न प्रथितं मनः ।
विद्यायाम् अर्थलाभे च मातुर् उच्चार एव सः ॥ १६ ॥

अपरञ्च । वरमेको गुणी पुत्रो न च मूर्खशतैर् अपि ।
एकश् चन्द्रस् तमो हन्ति न च तारागणैर् अपि ॥ १७ ॥
पुण्यतीर्थे कृतं येन तपः क्वापि सुदुष्करम् ।
तस्य पुत्रो भवेद् वश्यः समृद्धो धार्मिकः सुधीः ॥ १८ ॥

तथाचोक्तम् । अर्थागमो नित्यम् अरोगिता च प्रिया च भार्या प्रियवादिनी च ।
वश्यश् च पुत्रो ऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन् ॥१९॥
को धन्यो बहुभिः पुत्रैः कुशूलपूरणाढकैः ।
वरम् एकः कुलालम्बी यत्र विश्रूयते पिता ॥ २० ॥
ऋणकर्ता पिता शत्रुर् माता च व्यभिचारिणी ।
भार्या रूपवती शत्रुः पुत्रः शत्रुर् अपण्डितः ॥ २१ ॥
अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम् ।
विषं सभा दरिद्रस्य वृद्धस्य तरुणी विषम् ॥ २२ ॥
यस्य तस्य प्रसूतो ऽपि गुणवान् पूज्यते नरः ।
धनुर् वंशविशुद्धो ऽपि निर्गुणः किं करिष्यति ॥ २३ ॥
हाहा पुत्रक नाधीत सुगतैतासु रात्रिषु ।

तेन त्वं विदुषां मध्ये पङ्के गौर् इव सीदसि ॥ २४ ॥

तत् कथम् इदानीम् एते मम पुत्रा गुणवन्तः क्रियन्ताम् ।

आहारनिद्राभयमैथुनं च सामान्यम् एतत् पशुभिर् नराणाम् ।
धर्मो हि तेषाम् अधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥ २५ ॥

यतः । धर्मार्थकाममोक्षाणां यस्यैको ऽपि न विद्यते ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥ २६ ॥

यच्चोच्यते । आयुः कर्म च वित्तं च विद्या निधनम् एव च ।
पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥ २७ ॥

किञ्च । अवश्यं भाविनो भावा भवन्ति महताम् अपि ।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥ २८ ॥

अपिच । यद् अभावि न तद् भावि भावि चेन्न तद् अन्यथा ।
इति चिन्ताविषघ्नो ऽयम् अगदः किं न पीयते ॥ २९ ॥

एतत् कार्याक्षमाणां केषाञ्चिद् आलस्यनिबन्धनं वचनम् ।

न दैवम् अपि सञ्चिन्त्य त्यजेद् उद्योगमात्मनः ।
अनुद्योगेन तैलानि तिलेभ्यो नाप्तुम् अर्हति ॥ ३० ॥

अन्यच्च । उद्योगिनं पुरुषसिंहम् उपैति लक्ष्मीर् दैवेन देयम् इति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषम् आत्मशक्त्या यत्ने कृते यदि न सिध्यति को ऽत्र दोषः ॥

यथा ह्येकेन चक्रेण न रथस्य गतिर् भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥ ३२ ॥

तथाच । पूर्वजन्मकृतं कर्म तद् दैवम् इति कथ्यते ।
तस्मात् पुरुषकारेण यत्नं कुर्याद् अतन्द्रितः ॥ ३३ ॥

यथा मृत्पिण्डतः कर्ता कुरुते यद्यद् इच्छति ।
एवम् आत्मकृतं कर्म मानवः प्रतिपद्यते ॥ ३४ ॥

अपरञ्च । काकतालीयवत् प्राप्तं दृष्ट्वा ऽपि निधिम् अग्रतः ।
न स्वयं दैवम् आदत्ते पुरुषार्थम् अपेक्षते ॥ ३५ ॥

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ ३६ ॥

मातृपितृकृताभ्यासो गुणिताम् एति बालकः ।
न गर्भच्युतिमात्रेण पुत्रो भवति पण्डितः ॥ ३७ ॥

तथाच । माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये वको यथा ॥ ३८ ॥
रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ३९ ॥
मूर्खो ऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत् किंचिन्न भाषते ॥ ४० ॥

एतच्चिन्तयित्वा स राजा पण्डितसभां कारितवान् । राजोवाच । भो भोः पण्डिताः श्रूयताम् । अस्ति कश्चिद् एवम्भूतो विद्वान् यो मम पुत्राणां नित्यम् उन्मार्गगामिनाम् अनधिगतशास्त्राणाम् इदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः

यतः । काचः काञ्चनसंसर्गाद् धत्ते मारकतीं द्युतिम् ।
तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम् ॥ ४१ ॥

उक्तञ्च । हीयते हि मतिस् तात हीनैः सह समागमात् ।
समैश् च समताम् एति विशिष्टैश्च विशिष्टताम् ॥ ४२ ॥

अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिर् इवाब्रवीत् । देव महाकुलसम्भूता एते राजपुत्रा मया नीतिं ग्राहयितुं शक्यन्ते ।

यतः । नाद्रव्ये निहिता काचित् क्रिया फलवती भवेत् ।
न व्यापारशतेनापि शुकवत् पाठ्यते वकः ॥ ४३ ॥

अन्यच्च । अस्मिंस् तु निर्गुणं गोत्रे नापत्यम् उपजायते ।
आकरे पद्मरागाणां जन्म काचमणेः कुतः ॥ ४४ ॥

अतो ऽहं षण्मासाभ्यन्तरे भवत्पुत्रान् नीतिशास्त्राभिज्ञान् करिष्यामि । राजा सविनयं पुनर् उवाच ।

कीटो ऽपि सुमनःसङ्गाद् आरोहति सतां शिरः ।
अश्मा ऽपि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ ४५ ॥

अन्यच्च । यथोदयगिरौ द्रव्यं सन्निकर्षेण दीप्यते ।
तथा सत्सन्निधानेन हीनवर्णो ऽपि दीप्यते ॥ ४६ ॥

गुणागुणज्ञा गुणिनो भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः ।
आस्वाद्यतोयाः प्रभवन्ति नद्यः समुद्रम् आसाद्य भवन्त्यपेयाः ॥ ४७ ॥

तद् एतेषां अस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् । इत्युक्त्वा तस्य विष्णुशर्मणो बहुमानपुरःसरं पुत्रान् समर्पितवान् । अथ प्रासादपृष्ठे सुखोपविष्टानां राज-

पुत्राणां पुरस्तात् प्रस्तावक्रमेण स पण्डितो ऽब्रवीत्। भो राजपुत्राः शृणुत।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥ ४८ ॥

तद्भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयामि। राजपुत्रैर् उक्तम्। आर्य कथ्यताम्। विष्णुशर्मोवाच। शृणुत सम्प्रति। मित्रलाभः प्रस्तूयते यस्यायम् आद्यः श्लोकः।

## ॥ मित्रलाभः ॥

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः।
साधयन्त्याशु कार्याणि काककूर्ममृगाखवः ॥ १ ॥

राजपुत्रा ऊचुः कथम् एतत्। विष्णुशर्मा कथयति। अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः। तत्र नानादिग्देशादागत्य पक्षिणो रात्रौ निवसन्ति। अथ कदाचिद् अवसन्नायां रजन्यां अस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः सन् कृतान्तम् इव द्वितीयम् आयान्तं पाशहस्तं व्याधम् अपश्यत्। तम् अवलोक्याचिन्तयद् असौ। अद्य प्रातर् एवानिष्टदर्शनं जातम्। न जाने किम् अनभिमतं दर्शयिष्यति। इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश् चलितः।
यतः।

शोकस्थानसहस्राणि भयस्थानशतानि च।
दिवसे दिवसे मूढम् आविशन्ति न पण्डितम् ॥ २ ॥

अन्यच्च। विषयिणाम् इदं अवश्यं करणीयम्।

उत्थायोत्थाय बोद्धव्यं महद् भयम् उपस्थितम्।
मरणव्याधिशोकानां किम् अद्य निपतिष्यति ॥ ३ ॥

अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम्। स च प्रच्छन्नो भूत्वा स्थितः। तस्मिन्न् एव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस् तांस् तण्डुलकणान् अवलोकयामास। ततस् तण्डुलकणलुब्धान् कपोतान् दृष्ट्वा प्रत्याह कपोतराजः। कुतो ऽत्र निर्जने वने तण्डुलकणानां सम्भवः। तन्निरूप्यतां तावत्। भद्रम् इदं न पश्यामि। प्रायेणानेन तण्डुलकणलोभेनास्माभिर् अपि तथा भवितव्यम्।

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।
वृद्धव्याघ्रेण सम्प्राप्तः पथिकः स मृतो यथा ॥ ४ ॥

कपोता ऊचुः । कथम् एतत् । कपोतराजः कथयति । अहम् एकदा दक्षिणारण्ये चरन् अपश्यम् । एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते । भो भोः पान्थ इदं सुवर्णकङ्कणं गृह्यताम् । ततो लोभाकृष्टेन केनचित् पान्थेनालोचितम् । भाग्येनैतत् सम्भवति । किन्त्व् अस्मिन्न् आत्मसन्देहे प्रवृत्तिर् न विधेया ।

यतः । अनिष्टाद् इष्टलाभे ऽपि न गतिर् जायते शुभा ।
यत्रास्ते विषसंसर्गो ऽमृतं तद् अपि मृत्यवे ॥ ५ ॥

किन्तु सर्वत्रार्थार्जने प्रवृत्तिः सन्देह एव ।

तथाचोक्तम् । न संशयम् अनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनर् आरुह्य यदि जीवति पश्यति ॥ ६ ॥

तन्निरूपयामि तावत् । प्रकाशं ब्रूते । कुत्र तव कङ्कणम् । व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थो ऽवदत् । कथं मारात्मके त्वयि विश्वासः कर्तव्यः । व्याघ्र उवाच । शृणु रे पान्थ । प्राग् एव यौवनदशायाम् अतिदुर्वृत्त आसम् । अनेकगोब्राह्मणमनुष्यबधान्मे पुत्रा अनेकशो मृता दाराश् च । साम्प्रतं निर्वंशो ऽस्मि । ततः केनापि धार्मिकेणाहम् उपदिष्टः । दानधर्मम् आचरतु भवान् इति । तदुपदेशाद् इदानीम् अहं स्नानशीलो दाता वृद्धो गलितनखदन्तः । कथं न विश्वासभूमिः ।

उक्तञ्च । इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गो ऽयं धर्मस्याष्टविधः स्मृतः ॥ ७ ॥
अत्र पूर्वश् चतुर्वर्गो दम्भार्थम् अपि सेव्यते ।
उत्तरस् तु चतुर्वर्गो महात्मन्येव तिष्ठति ॥ ८ ॥

मम चैतावाल् लोभविरहो येन स्वहस्तगतम् अपि सुवर्णकङ्कणं यस्मै कस्मैचिद् दातुम् इच्छामि । तथापि व्याघ्रो मानुषं खादतीति लोकप्रवादो दुर्निवार एव ।

यतः । गतानुगतिको लोकः कुट्टनीम् उपदेशिनीम् ।
प्रमाणयति नो धर्मे यथा गोघ्नम् अपि द्विजम् ॥ ९ ॥

मया च धर्मशास्त्राण्यधीतानि । शृणु ।

मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा ।
दरिद्रे दीयते दानं सफलं पाण्डुनन्दन ॥ १० ॥
प्राणा यथात्मनो ऽभीष्टा भूतानाम् अपि ते तथा ।
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः ॥ ११ ॥

अपरञ्च । प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।

आत्मौपम्येन पुरुषः प्रमाणम् अधिगच्छति ॥ १२ ॥

अन्यच्च । मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ॥ १३ ॥

त्वं च दुर्गतः । तेन तुभ्यं दातुं सयत्नो ऽहम् ।

तथाचोक्तं । दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस् तु किम् औषधैः ॥ १४ ॥

अन्यच्च । दातव्यम् इति यद् दानं दीयते ऽनुपकारिणे ।
देशे काले च पात्रे च तद् दानं सात्त्विकं विदुः ॥ १५ ॥

तद् अत्र सरसि स्नात्वा सुवर्णकङ्कणम् इदं गृहाण । ततस् तद्वचने जातविश्वासो यावद् असौ सरः स्नातुं प्रविष्टः तावद् एव महापङ्के निमग्नः । पलायितुम् अक्षमः । पङ्के पतितं दृष्ट्वा व्याघ्रो ऽवदत् । अहह महापङ्के पतितो ऽसि अतस् त्वां उत्थापयामि । इत्युक्त्वा शनैः शनैर् उपगम्य तेन व्याघ्रेण धृतः स पान्थो ऽचिन्तयत् ।

न धर्मशास्त्रं पठतीति कारणं न वापि वेदाध्ययनं दुरात्मनः ।
स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः ॥ १६ ॥

किञ्च । अवशेन्द्रियचित्तानां हस्तिस्नानम् इव क्रिया ।
दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ॥ १७ ॥

तन्न मया भद्रं कृतं यद् अत्र मारात्मके विश्वासः कृतः ।

तथा ह्युक्तं । नदीनां शस्त्रपाणीनां नखिनां शृङ्गिनां तथा ।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ १८ ॥

अपरञ्च । सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः ।
अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते ॥ १९ ॥

अन्यच्च । स हि गगणविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुर् अपि विधियोगाद् ग्रस्यते राहुणासौ
लिखितम् अपि ललाटे प्रोज्झितुं कः समर्थः ॥ २० ॥

इति चिन्तयन् एव तेनासौ व्याघ्रेण व्यापादितः खादितश्च । अतो ऽहं ब्रवीमि कङ्कणस्य तु लोभेन इत्यादि । अतः सर्वथा अविचारितं कर्म न कर्तव्यमिति । यतः ।

सुजीर्णम् अन्नं सुविचक्षणः सुतः सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत् कृतं सुदीर्घकाले ऽपि न याति विक्रियाम् ॥ २१ ॥

एतद् वचनं श्रुत्वा कश्चित् कपोतः सदर्पम् आह । आः किम् एवम् उच्यते ।

वृद्धानां वचनं ग्राह्यम् आपत्काले ह्युपस्थिते ।
सर्वत्रैव विचारेण भोजने न प्रवर्तते ॥ २२ ॥

यतः । शङ्काभिः सर्वम् आक्रान्तम् अन्नं पानं च भूतले ।
प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं नु वा ॥ २३ ॥

तथाचोक्तं । ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षड् एते दुःखभागिनः ॥ २४ ॥

एतच्छ्रुत्वा सर्वे कपोतास् तत्रोपविष्टाः ।

यतः । सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः ।
छेत्तारः संशयानां च क्लिश्यन्ते लोभमोहिताः ॥ २५ ॥

अन्यच्च । लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥ २६ ॥

अन्यच्च । असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले धियो ऽपि पुंसां मलिना भवन्ति ॥२७॥

अनन्तरं ते सर्वे जालबद्धा बभूवुः । ततो यस्य वचनात् तत्रावलम्बिताः पक्षिणस् तं सर्वे तिरस्कुर्वन्ति ।

तथाचोक्तं । न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम् ।
यदि कार्यविपत्तिः स्यात् मुखरस् तत्र हन्यते ॥ २८ ॥

तथाचोक्तं । आपदां कथितः पन्था इन्द्रियाणाम् असंयमः ।
तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम् ॥ २९ ॥

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच । नायम् अस्य दोषः ।

यतः । आपदाम् आपतन्तीनां हितो ऽप्यायाति हेतुताम् ।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने ॥ ३० ॥

अन्यच्च । स बन्धुर् यो विपन्नानाम् आपदुद्धरणक्षमः ।
न तु भीतपरित्राणवस्तूपालम्भपण्डितः ॥ ३१ ॥

विपत्काले च विस्मय एव कापुरुषलक्षणम् । तद् अत्र धैर्यम् अवलम्ब्य प्रतीकारश् चिन्त्यताम् ।

यतः । विपदि धैर्यम् अथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर् व्यसनं श्रुतौ प्रकृतिसिद्धिर् इदं महात्मनाम् ॥ ३२ ॥

सम्पदि यस्य न हर्षो विपदि विषादो रणे च धीरत्वम्।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम्॥ २३ ॥

अन्यच्च । षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ २४ ॥

इदानीमप्येवं क्रियताम्। सर्वैरेकचित्तीभूय जालमादाय उड्डीयताम्।

यतः । अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥ २५ ॥
संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।
तुषैरपि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥ २६ ॥

इति विचिन्त्य पक्षिणः सर्वे जालमादायोत्पतिताः । अनन्तरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य पश्चाद्धावन्नचिन्तयत्।

संहतास्तु हरन्त्येते मम जालं विहङ्गमाः ।
यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा ॥ २७ ॥

ततस्तेषु चक्षुर्विषयम् अतिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः । अथ तं लुब्धकं निवृत्त दृष्ट्वा कपोता ऊचुः । स्वामिन् किमिदानीं कर्तुमुचितम्। चित्रग्रीव उवाच ।

माता मित्रं पिता चेति स्वभावात् त्रितयं हितम्।
कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः ॥ २८ ॥

तन्मे मित्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे चित्रवने निवसति । दन्तबलेन सो ऽस्माकं पाशं छेत्स्यति । इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः । हिरण्यकस्य सर्वदापायशङ्कया शतद्वारं विवरं कृत्वा निवसति ।

अनागतं भयं दृष्ट्वा नीतिशास्त्रविशारदः ।
अवसन्मूषिकस्तत्र वृद्धः शतमुखं विलम्॥ २९ ॥

ततो हिरण्यकः कपोतावपातचकितस् तूष्णीम्भूय स्थितः । चित्रग्रीव उवाच । सखे हिरण्यक किमस्मान् न सम्भाषसे । हिरण्यकस् तद्वचनं श्रुत्वा प्रत्यभिज्ञाय ससम्भ्रमं बहिर्निः सृत्याब्रवीत्। आः पुण्यवानस्मि प्रियसुहृन्मे चित्रग्रीवः समायातः ।

यस्य मित्रेण सम्भाषा यस्य मित्रेण संस्थितिः ।
यस्य मित्रेण संलापस् ततो नास्तीह पुण्यवान्॥ ४० ॥

पाशबद्धांश्च तान् दृष्ट्वा सविस्मयः क्षणं स्थित्वा उवाच । सखे किमेतत्। चित्रग्रीवो ऽवदत्। सखे ऽस्माकं प्राक्तनजन्मकर्मणः फलमेतत ।

यस्माच्च येन च यथा च यदा च यच्च यावच्च यत्र च शुभाशुभम् आत्मकर्म ।
तस्माच्च तेन च तथा च तदा च तच्च तावच्च तत्र च विधातृवशादुपैति ॥ ४१ ॥

रोगशोकपरितापबन्धनव्यसनानि च ।
आत्मापराधवृक्षस्य फलान्येतानि देहिनाम् ॥ ४२ ॥

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति । तत्र चित्रग्रीवो ब्रूते । मित्र मा मैवम् । प्रथममेषाम् अस्मदाश्रितानां पाशांस्तावच्छिन्धि । हिरण्यको ऽप्याह । अहम् अल्पशक्तिर्दन्ताश्च मे कोमलाः । तदेतेषामनेकेषां पाशांश्छेत्तुं कथमहं समर्थो ऽस्मि । तद्यावन्मे दन्ता न त्रुट्यन्ति तावत् तव पाशं छिनद्मि । तदनन्तरं यावच्छक्यमन्येषामपि बन्धनं छेत्स्यामि । चित्रग्रीव उवाच । अस्त्वेवं । तथापि यथाशक्ति बन्धनमेतेषां खण्डय । हिरण्यकेनोक्तम् । आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिवेदिनां सम्मतम् ।

यतः । आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ ४३ ॥

अन्यच्च । धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः ।
तान् निघ्नता किं न हतं रक्षता किं न रक्षितम् ॥ ४४ ॥

चित्रग्रीव उवाच । सखे नीतिस्तावद् ईदृश्येव । किन्त्वहम् अस्मदाश्रितानां दुःखं सोढुं न समर्थो ऽस्मि । तेनेदं ब्रवीमि ।

यतः । धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ ४५ ॥

अयमपरश्चासाधारणो हेतुः ।

जातिद्रव्यगुणानां च साम्यमेषां मया सह ।
मत्प्रभुत्वफलं ब्रूहि कदा किं तद्भविष्यति ॥ ४६ ॥

अन्यच्च । विना वर्तनम् एवैते न त्यजन्ति ममान्तिकम् ।
तन्मे प्राणव्ययेनापि जीवयैतान् ममाश्रितान् ॥ ४७ ॥

किञ्च । मांसमूत्रपुरीषास्थिनिर्मिते ऽस्मिन् कलेवरे ।
विनश्वरे विहायास्थां यशः पालय मित्र मे ॥ ४८ ॥

अपरञ्च पश्य । यदि नित्यमनित्येन निर्मलं मलवाहिना ।
यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम् ॥ ४९ ॥

यतः । शरीरस्य गुणानां च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥ ५० ॥

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नब्रवीत्। साधु रे मित्र साधु। अनेन तवाश्रितानां वात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते। एवम् उक्त्वा सर्वेषां कपोतानां बन्धनानि छिन्नानि। ततो हिरण्यकः सर्वान् सादरं सम्पूज्य प्रत्याह। सखे चित्रग्रीव सर्वथात्र जालबन्धनविधौ सति दोषम् आशङ्क्य आत्मन्यवज्ञा न कर्तव्या।

यतः। यो ऽधिकाद् योजनशतात् पश्यतीहामिषं खगः
स एव प्राप्तकालस् तु पाशबन्धं न पश्यति ॥ ५१ ॥

अपि च। शशिदिवाकरयोर् ग्रहपीडनं गजभुजङ्गमयोर् अपि बन्धनम्।
मतिमतां च विलोक्य दरिद्रतां विधिर् अहो बलवान् इति मे मतिः ॥ ५२ ॥

अन्यच्च। व्योमैकान्तविहारिणो ऽपि विहगाः सम्प्राप्नुवन्त्यापदं
बध्यन्ते निपुणैर् अगाधसलिलान्मत्स्याः समुद्राद् अपि।
दुर्णीते हि विधौ कुतः सुचरितं कः स्थानलाभे गुणः
कालो हि व्यसनप्रसारितकरो गृह्णाति दूराद् अपि ॥ ५३ ॥

इति प्रबोध्यातिथ्यं विधायालिङ्ग्य च चित्रग्रीवस् तेन सम्प्रेषितो यथेष्टं देशं सपरिवारो ययौ।

यानि कानि च मित्राणि कर्तव्यानि शतानि च।
पश्य मूषिकमित्रेण कपोता मुक्तबन्धनाः ॥ ५४ ॥

हिरण्यको ऽपि स्वविवरं प्रविष्टः। अथ लघुपतनकनामा काकः सर्ववृत्तान्तदर्शी साश्चर्यम् इदम् आह। अहो हिरण्यक श्लाघ्यो ऽसि। अतो ऽहम् अपि त्वया सह मैत्रीं कर्तुम् इच्छामि। अतो मां मैत्र्येणानुग्रहीतुम् अर्हसि। एतच्छ्रुत्वा हिरण्यको ऽपि विवराभ्यन्तरे स्थित्वाह। कस् त्वम् भोः। काको ब्रूते। लघुपतनकनामा वायसो ऽहं। ततो हिरण्यको विहस्याह। का त्वया सह मैत्री।

यतः। यद् येन युज्यते लोके बुधस् तत्तेन योजयेत्।
अहम् अन्नं भवान् भोक्ता कथं प्रीतिर् भविष्यति ॥ ५५ ॥

अपरञ्च। भक्ष्यभक्षकयोः प्रीतिर् विपत्तेर् एव कारणम्।
शृगालात् पाशबद्धो ऽसौ मृगः काकेन रक्षितः ॥ ५६ ॥

वायसो ऽब्रवीत्। कथम् एतत्। हिरण्यकः कथयति।

अस्ति मगधदेशे चम्पकवती नामारण्यानी। तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचित् शृगालेनावलोकितः। तं दृष्ट्वा शृगालो ऽचिन्तयत्। आः कथम् एतन्मृगस्य मांसं सुललितं भक्षयामि। भवतु

विश्वासं तावद् उत्पादयामि । इत्यालोच्योपसृत्याब्रवीत् । मित्र कुशलं ते । मृगेणोक्तम् । कस् त्वम् । जम्बुको ब्रूते । क्षुद्रबुद्धिनामा जम्बुको ऽहम् । अत्रारण्ये मित्रबन्धुहीनो मृतवद् एकाकी निवसामि । इदानीं च भवन्तं मित्रम् आसाद्य पुनः जीवलोकं प्रविष्टो ऽस्मि । अधुना मया तवानुचरेण सर्वथा भवितव्यम् इति । मृगेणोक्तं । एवम् अस्तु । ततस् तावद् अस्तं गते भगवति तिग्ममरीचिमालिनि मृगस्य वासभूमिं प्रति मृगजम्बुकौ गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा काको ऽवदत् । सखे मृग को ऽयं द्वितीयः । मृगो ब्रूते । जम्बुको ऽयम् अस्मत्सख्यम् इच्छन् आगतः । काको ब्रूते । मित्र अकस्माद् आगन्तुना सह विश्वासो नैव युक्तः । तन्न भद्रम् आचरितम् ।

तथाचोक्तम् ।

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥ ५७ ॥

तावाहतुः । कथमेतत् । काकः कथयति ।

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकाद् गलितनखनयनो जरद्गवो नाम वृद्धो गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित् किञ्चिद् ददति । तेनासौ जीवति । अथ कदाचिद् दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षितुं तत्रागतः । ततस् तम् आयान्तं दृष्ट्वा पक्षिशावकैर् भयार्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेनोक्तम् को ऽयम् आयाति । दीर्घकर्णो गृध्रम् अवलोक्य सभयम् आह हा हतो ऽस्मि ।

यतः ।

तावद् भयस्य भेतव्यं यावद् भयम् अनागतम् ।
आगतं च भयं वीक्ष्य नरः कुर्याद् यथोचितम् ॥ ५८ ॥

अधुनातिसन्निधानेन पलायनम् अशक्यं तद्यथा भवितव्यं तद् भवतु । एतत्समीपम् उपगच्छामि । इत्यालोच्योपसृत्याब्रवीत् आर्य त्वाम् अहम् अभिवन्दे । गृध्रो ऽवदत् । कस् त्वम् । सो ऽवदत् । मार्जारो ऽहम् । गृध्रो ब्रूते । आः पापभाव दूरम् अपसर नो चेद्धन्तव्यो ऽसि मया । मार्जारो ऽवदत् । श्रूयतां तावद् अस्मद्वचनम् । ततो यद्यहं बध्यस् तदा हन्तव्यः ।

यतः ।

जातिमात्रेण कश्चित् किं बध्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय बध्यः पूज्यो ऽथवा भवेत् ॥ ५९ ॥

गृध्रो ब्रूते । ब्रूहि कीदृग्व्यापारवान् । सो ऽवदत् । अहम् अत्र गङ्गातीरे नित्यस्नायी

निरामिषाशी ब्रह्मचर्येण चान्द्रायणव्रतम् आचरंस्तिष्ठामि । युष्माकं धर्मज्ञानां प्रेमविश्वासभूमयः पक्षिणः सर्वदा ममाग्रे त्वदीयगुणग्रामं स्तुवन्ति । अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मकथां श्रोतुम् इहागतो ऽस्मि । भवन्तश् चैतादृशा धर्मज्ञा यन्माम् अतिथिं हन्तुम् उद्यताः । गृहस्थस्य धर्मश् चैष समुदीरितः ।

अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगतां छायां नोपसंहरते द्रुमः ॥ ६० ॥

किञ्च अन्नं यदि गृहे नास्ति तदा सुप्रीतेनापि वचसा तावदतिथिः पूज्यः ।

तथाचोक्तं । तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ ६१ ॥

अन्यच्च । बालो वा यदि वा वृद्धो युवा वा गृहमागतः ।
तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः ॥ ६२ ॥

अन्यच्च । निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनि ॥ ६३ ॥

अन्यच्च । अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ ६४ ॥

अन्यच्च । उत्तमस्यापि वर्णस्य नीचो ऽपि गृहमागतः ।
पूजनीयो यथायोग्यं सर्वदेवमयो ऽतिथिः ॥ ६५ ॥

गृध्रो ऽवदत् । मार्जारा हि मांसरुचयो भवन्ति पक्षिशावकाश्चात्र निवसन्ति । तेनैवं ब्रवीमि । मार्जारो ऽप्येवं श्रुत्वा भूमिं स्पृष्ट्वा कर्णौ स्पृशति ब्रूते च । मया वीतरागेण धर्मशास्त्रं अभ्यस्यता इदं दुष्करं व्रतं चान्द्रायणमध्यवसायितम् । यतः परस्परं विवदमानानामपि प्रमाणशास्त्राणां अहिंसा परमो धर्म इत्यत्रैकमत्यम् ।

यतः । सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ ६६ ॥

अन्यच्च । एक एव सुहृद् धर्मो निधने ऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यत् तु गच्छति ॥ ६७ ॥

किञ्च । यो ऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम् ।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ॥ ६८ ॥

अपिच । मर्तव्यमिति यद् दुःखं पुरुषस्योपजायते ।
शक्यस्तेनानुमानेन परो ऽपि परिरक्षितुम् ॥ ६९ ॥

शृणु पुनः । स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते ।
अस्य दग्धोदरस्यार्थे कः कुर्यात् पातकं नरः ॥ ७० ॥

एवं विश्वास्य स मार्जारः तरुकोटरे स्थितः । ततो दिनेषु गच्छत्सु पक्षिशावकान् आक्रम्य कोटरमानीय प्रत्यहं खादति । अथ येषामपत्यानि खादितानि तैः शोकार्तैः पक्षिभिरितस्ततो जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः पलायितः । पश्चात् पतत्रिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं चानेनास्माकं शावकाः खादिता इति निश्चित्य मिलित्वा तैः पक्षिभिः स गृध्रो व्यापादितः । अतो ऽहं ब्रवीमि अज्ञातकुलशीलस्येत्यादि । इत्याकर्ण्य स जम्बुकः सकोपमाह । मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातशील एवासीत् । तद्भवता सह कथमद्ययावदेव एतस्य महास्नेहानुवृत्तिरुत्तरोत्तरं वर्धते ।

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डो ऽपि द्रुमायते ॥ ७१ ॥

अन्यच्च । अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां च वसुधैव कुटुम्बकम् ॥ ७२ ॥

यथा चायं मृगो मम बन्धुस्तथा भवानपि । मृगो ऽब्रवीत् । किमनेनोत्तरेण । सर्वैरेकत्र विश्रम्भालापैः सुखमनुभवद्भिः स्थीयताम् ।

यतः । न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ ७३ ॥

काकः पुनराह । एवमस्तु । अथ प्रातः सर्वे यथाभिमतं देशं गताः । एकदा निभृतं शृगालो ब्रूते । सखे मृग एतस्मिन्नेव वनैकदेशे शस्यसम्पूर्णं क्षेत्रमस्ति । तदहं त्वां तत्र नीत्वा दर्शयामि । तथा कृते सति स मृगः प्रत्यहं तत्र गत्वा शस्यं खादति । ततो दिनकतिपयेन क्षेत्रपतिना तं दृष्ट्वा पाशास्तत्र नियोजिताः । अनन्तरं पुनरागतो मृगस्तत्र चरन् पाशैर्बद्धो ऽचिन्तयत् । को मामितः कालपाशादिव व्याधपाशात् त्रातुं मित्रादन्यः समर्थः । अत्रान्तरे जम्बुकस्तत्रागत्य उपस्थितो ऽचिन्तयत् । आः फलितस्तावदस्माकं कपटप्रबन्धो मनोरथसिद्धिरपि बाहुल्यान्मे भविष्यति । यतः । एतस्योत्कृत्यमानस्य मांसासृग्लिप्तानि अस्थीनि मयावश्यं प्राप्तव्यानि । स च मृगस्तं दृष्ट्वोल्लासितो ब्रूते । सखे जम्बुक छिन्धि तावन्मम बन्धनम् । सत्वरं त्रायस्व माम् ।

यतः । आपत्सु मित्रं जानीयात् युद्धे शूरमृणे शुचिम् ।
भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान् ॥ ७४ ॥

अपरञ्च । उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ७५ ॥

जम्बुकः पाशं मुहुर्मुहुर् विलोक्याचिन्तयत् । दृढबन्धनबद्धो ऽस्ति तावदयं मृगः । ब्रूते च । सखे मृग स्नायुनिर्मिता एते पाशास् तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि । मित्र अन्यथा मन्तव्यं । तत् प्रभाते यत् त्वया वक्तव्यं तन्मया कर्तव्यमिति । इत्यभिधाय विरलविटपस्यान्तरे तूष्णीमवलम्ब्य स्थितः । अनन्तरं स काकः प्रदोषकाले मृगमनागतम् अवलोक्य इतस्ततो ऽन्विष्यन् तथाविधं दृष्ट्वोवाच । सखे किमेतत् । मृगेणोक्तम् । अवधीरितसुहृद्वाक्यस्य फलमेतत् ।

तथाचोक्तम् । सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ॥ ७६ ॥

काको ब्रूते । स शृगालः क्व । मृगेणोक्तम् । अत्रैव मन्मांसार्थी विरलविपिने तिष्ठति । काको ब्रूते । मित्र उक्तमेव मया पूर्वम् ।

अपराधो न मे ऽस्तीति नैतद् विश्वासकारणम् ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥ ७७ ॥
दीपनिर्वाणगन्धं च सुहृद्वाक्यम् अरुन्धतीम् ।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः ॥ ७८ ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ ७९ ॥

ततः काको दीर्घनिःश्वस्य अरे वञ्चक किं त्वया पापकर्मणा कृतम् ।

यतः । संलापितानां मधुरैर् वचोभिर् मिथ्योपचारैश्च वशीकृतानाम् ।
आशावतां श्रद्दधतां च लोके किमर्थिनां वञ्चयितव्यमस्ति ॥ ८० ॥

अन्यच्च । उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनम् असत्यसन्धं भगवति वसुधे कथं वहसि ॥ ८१ ॥
दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥ ८२ ॥

अथवा स्थितिरियं दुर्जनानाम् ।

प्राक् पादयोः पतति खादति पृष्ठमांसं कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः सर्वं खलस्य चरितं मशकः करोति ॥ ८३ ॥

तथा च । दुर्जनः प्रियवादी च नैतद् विश्वासकारणम् ।
मधुरयति जिह्वाग्रे हृदि हालाहलं विषम् ॥ ८४ ॥

अथ प्रभाते स क्षेत्रपतिर्लगुडहस्तस् तं प्रदेशमागच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम् । सखे मृग त्वं आत्मानं मृतवत् सन्दर्श्य वातेनोदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ । यदाहं काशब्दं करोमि तदा त्वं सत्वरमुत्थाय पलायिष्यसि । मृगस् तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेनावलोकितः । तथाविधं मृगम् अवलोक्यासौ आः स्वयं मृतो ऽयम् । इत्युक्त्वा क्षेत्रपतिर्मृगं बन्धनान्मोचयित्वा पाशान् संवरितुं कृतयत्नो बभूव । ततः कियद्दूरे ऽन्तरिते क्षेत्रपतौ स मृगः काकस्य शब्दं श्रुत्वा ससम्भ्रमः समुत्थाय पलायितः । तमुद्दिश्य तेन क्षेत्रपतिना लगुडो विक्षिप्तः । तेन निक्षिप्तलगुडाघातेन स शृगालो मृतः ।

तथा चोक्तम् । त्रिभिर् वर्षैस्त्रिभिर् मासैस्त्रिभिः पक्षैस्त्रिभिर् दिनैः ॥
अत्युत्कटैः पापपुण्यैर् इहैव फलमश्नुते ॥ ८५ ॥

अतो ऽहं ब्रवीमि । भक्ष्यभक्षकयोः प्रीतिरित्यादि । काकः पुनराह ।

भक्षितेनापि भवता नाहारो मम पुष्कलः ।
त्वयि जीवति जीवामि चित्रग्रीव इवानघ ॥ ८६ ॥

अन्यच्च । तिरश्चामपि विश्वासो दृष्टः पुण्यैककर्मणाम् ।
सतां हि साधुशीलत्वात् स्वभावो न निवर्तते ॥ ८७ ॥

किञ्च । साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम् ।
न हि तापयितुं शक्यं सागराम्भस् तृणोल्कया ॥ ८८ ॥

हिरण्यको ब्रूते । चपलस् त्वं चपलेन सह स्नेहः सर्वथा न कर्तव्यः ।

तथा चोक्तम् । मार्जारो महिषो मेषः काकः कापुरुषस् तथा ।
विश्वासात् प्रभवन्त्येते विश्वासस्तत्र नोचितः ॥ ८९ ॥

किञ्चान्यत् शत्रुपक्षे भवान् अस्माकम् । उक्तं चैतत् ।

शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ ९० ॥
दुर्जनः परिहर्तव्यो विद्ययालङ्कृतो ऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ ९१ ॥
यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।
नोदके शकटं याति न नौका गच्छति स्थले ॥ ९२ ॥

अपरञ्च । महताप्यर्थसारेण यो विश्वसिति शत्रुषु ।
भार्यासु च विरक्तासु तदन्तं तस्य जीवनम् ॥ ९३ ॥

लघुपतनको ब्रूते । श्रुतं मया सर्वम् । तथापि ममैतावानेव सङ्कल्पः यत् त्वया सह सौहृद्यमवश्यमेव मया करणीयम् । नो चेदनाहारेण मया तव द्वारि निजशरीरं त्याज्यम् ।

तथा हि । मृद्घटवत् सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवत् दुर्भेद्यश्चाशु सन्धेयः ॥ ९४ ॥

किञ्च । द्रवत्वात् सर्वलोहानां निमित्तान्मृगपक्षिणाम् ।
भयाल्लोभाच्च मूर्खाणां सङ्गतं दर्शनात् सताम् ॥ ९५ ॥

किञ्च । नारिकेलसमाकारा दृश्यन्ते ऽपि हि सज्जनाः ।
अन्ये वदरिकाकारा वहिरेव मनोहराः ॥ ९६ ॥

एतज्ज्ञात्वा सतां सङ्गतिरिष्यते ।

यतः । स्नेहच्छेदे ऽपि साधूनां गुणा नायान्ति विक्रियाम् ।
भङ्गे ऽपि हि मृणालानाम् अनुबध्नन्ति तन्तवः ॥ ९७ ॥

अन्यच्च । शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ ९८ ॥

एतैर्गुणैरुपेतो भवदन्यो मया कः सुहृत् प्राप्तव्यः । इत्यादि तद्वचनमाकर्ण्य हिरण्यको वहिर्निःसृत्याह । आप्यायितो ऽहं भवतामनेन वचनामृतेन । तथा ह्युक्तम् ।

घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्तावली
न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम् ।
प्रीत्यै सज्जनभाषितं प्रभवति प्रायो यथा चेतसः
सद्युक्त्या च परिष्कृतं सुकृतिनाम् आकृष्टिमन्त्रोपमम् ॥ ९९ ॥

अन्यच्च । रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतम् एतन्मित्रस्य दूषणम् ॥ १०० ॥

अनेन वचनक्रमेण तदेकदूषणमपि त्वयि न लक्ष्यते ।

यतः । पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते ।
अस्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते ॥ १०१ ॥

अपरञ्च । अन्यथैव हि सौहार्दं भवेत् स्वच्छान्तरात्मनः ।
प्रवर्तते ऽन्यथा वाणी शाठ्योपहतचेतसः ॥ १०२ ॥

मनस्यन्यद् वचस्यन्यत् कार्यमन्यद् दुरात्मनाम्।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्॥ १०३ ॥

तद्भवतु भवतो ऽभिमतमेव। इत्युक्त्वा हिरण्यको मैत्र्यं विधाय भोजनविशेषैर्वायसं सन्तोष्य विवरं प्रविष्टः। वायसो ऽपि स्वस्थानं गतः। ततः प्रभृति तयोर् अन्योन्याहारप्रदानेन कुशलप्रश्नैर् विश्रम्भालापैश्च कियान् कालो ऽतिवर्तते। एकदा वायसो हिरण्यकमाह। सखे वायसस्य कष्टतरलभ्याहारमिदं स्थानम्। तदेतत् परित्यज्य स्थानान्तरं गन्तुमिच्छामि। हिरण्यको ब्रूते।

स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत्॥ १०४ ॥

काको ब्रूते। मित्र कापुरुषस्य वचनमेतत्।

यतः। स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः।
तत्रैव निधनं यान्ति काकाः कापुरुषा मृगाः॥ १०५ ॥

अन्यच्च। को वीरस्य मनस्विनः स्वविषयः को वा विदेशः स्मृतो
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम्।
यद् दंष्ट्रानखलाङ्गुलप्रहरणः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस् तृष्णां छिनत्त्यात्मनः॥ १०६ ॥

हिरण्यको ब्रूते। मित्र क्व गन्तव्यम्।

तथाचोक्तं। चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान्।
नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्॥ १०७ ॥

वायसो ब्रूते। मित्र अस्ति स्थानं सुनिरूपितं तत्राहं युष्मान् नयामि। हिरण्यको ऽवदत्। किं तत्। वायसो कथयति। अस्ति दण्डकारण्ये कर्पूरगौराख्यं सरः। तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कूर्मः सहजधार्मिकः प्रतिवसति।

यतः। परोपदेशे पाण्डित्यं सर्वेषां सुकरं भवेत्।
धर्मे स्वयमनुष्ठानं कस्यचित् तु महात्मनः॥ १०८ ॥

स च मत्स्याहारविशेषैर्मां संवर्धयिष्यति। हिरण्यको ऽवदत्। तत् किमत्रावस्थाय मया कर्तव्यम्।

यतः। यस्मिन् देशे न सम्मानं न वृत्तिर्न च बान्धवाः।
न च विद्यागमः कश्चित् तं देशं परिवर्जयेत्॥ १०९ ॥

अपरञ्च। धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः।

पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत्॥ ११० ॥

अपरञ्च। लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता।
पञ्च यत्र न वर्तन्ते न कुर्यात् तत्र संस्थितिम्॥ १११ ॥

अन्यच्च। तत्र मित्र न वस्तव्यं यत्र नास्ति चतुष्टयम्।
ऋणदाता च वैद्यश्च श्रोत्रियः सुजला नदी॥ ११२ ॥

अतो मामपि तत्र नय। वायसो ऽवदत्। एवमस्तु। अथ वायसस्तेन मित्रेण सह विचित्रकथालापसुखेन तस्य सरसः समीपं जगाम। ततो मन्थरो दूरादेव लघुपतनकम् अवलोक्य उत्थाय यथोचितमातिथ्यं विधाय मूषिकस्याप्यातिथ्यसत्कारं चकार।

यतः। गुरुर् अग्निर् द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेको गुरुः स्त्रीणां सर्वत्राभ्यागतो गुरुः॥ ११३ ॥

वायसो ऽवदत्। सखे मन्थर सविशेषपूजामस्मै विधेहि। यतो ऽयं पुण्यकर्मणां धुरीणः कारुण्यरत्नाकरो हिरण्यको नाम मूषिकराजः। एतस्य गुणसङ्कीर्तनं जिह्वासहस्रद्वयेन सर्पेश्वरः कर्तुं न हि समर्थो भवति। इत्युक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान्। ततो मन्थरः सादरं हिरण्यकं सम्पूज्याह। भद्र आत्मनो निर्जनवनागमनकारणम् आख्यातुमर्हसि। हिरण्यको ऽवदत्। कथयामि श्रूयताम्। अस्ति चम्पकाभिधायां पुरि परिव्राजकावसथः। तत्र चूडाकर्णो नाम परिव्राजकः प्रतिवसति। स च भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तके ऽवस्थाप्य स्वपिति। अहं च तदन्नमुत्प्लुत्य प्रत्यहं भक्षयामि। अनन्तरं तस्य प्रियसुहृद् वीणाकर्णो नाम परिव्राजकः समायातः। तेन सह नाना कथाप्रसङ्गावस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णो भूमिम् अताडयत्। तं दृष्ट्वा वीणाकर्ण उवाच। सखे किमिति मम कथाविरक्तो ऽन्यासक्तो भवान्।

यतः। मुखं प्रसन्नं विमला च दृष्टिः कथानुरागो मधुरा च वाणी।
स्नेहो ऽधिकः सम्भ्रमदर्शनं च सदानुरक्तस्य जनस्य लक्ष्म॥ ११४ ॥
अतुष्टिदानं कृतपूर्वनाशनं अमाननं दुश्चरितानुकीर्तनम्।
कथाप्रसङ्गेन च नामविस्मृतिर् विरक्तभावस्य जनस्य लक्षणम्॥ ११५ ॥

चूडाकर्ण उवाच। भद्र नाहं विरक्तः। किन्तु पश्यायं मूषिको ममापकारी सदा पात्रस्थं भिक्षान्नं भक्षयति। वीणाकर्णो नागदन्तकम् अवलोक्याह। कथमयं मूषिकः स्वल्पबल एतावद्दूरमुत्पतति तदत्र केनापि कारणेन भवितव्यम्।

तथाचोक्तम्। अकस्माद्युवती वृद्धं केशेष्वाकृष्य चुम्बति।

पतिं निर्दयमालिङ्ग्य हेतुरत्र भविष्यति ॥ ११६ ॥

चूडाकर्णः पृच्छति । कथमेतत् । वीणाकर्णः कथयति । अस्ति गौडीये कौशाम्बी नाम नगरी । तस्यां चन्दनदासो नाम वणिग् महाधनो निवसति । तेन च पश्चिमे वयसि वर्तमानेन कामाधिष्ठितचेतसा धनदर्पाल्लीलावती नाम वणिक्पुत्री परिणीता । सा च मकरकेतोर् वैजयन्तीव नवयौवनवती बभूव । स च वृद्धपतिस् तस्याः सन्तोषाय नाभवत् ।

यतः । शशिनीव हिमार्तानां घर्मार्तानां रवाविव ।
मनो न रमते स्त्रीणां जराजीर्णेन्द्रिये पतौ ॥ ११७ ॥

अन्यच्च । पलितेष्वपि दृष्टेषु पुंसः का नाम कामिता ।
भैषज्यमिव मन्यन्ते यदन्यमनसः स्त्रियः ॥ ११८ ॥

स च वृद्धपतिस् तस्याम् अतीवानुरागवान् ।

यतः । धनाशा जीविताशा च गुर्वी प्राणभृतां सदा ।
वृद्धस्य तरुणी भार्या प्राणेभ्यो ऽपि गरीयसी ॥ ११९ ॥

अपिच । नोपभोक्तुं न च त्यक्तुं शक्नोति विषयान् जरी ।
अस्थि निर्दशनः श्वेव जिह्वया लेढि केवलम् ॥ १२० ॥

अथ सा लीलावती यौवनदर्पाद् अतिक्रान्तकुलमर्यादा केनापि वणिक्पुत्रेण सहानुरागवती बभूव ।

यतः । स्वातन्त्र्यं पितृमन्दिरे च वसतिर् यात्रोत्सवे सङ्गतिर्
गोष्ठीपूरुषसन्निधावनियमो वासो विदेशे तथा ।
संसर्गः सह पुंश्चलीभिर् असकृद् वृत्तेर्निजायाः क्षतिः
पत्युर् वार्धकम् ईर्षितं प्रवसनं नाशस्य हेतुः स्त्रियाः ॥ १२१ ॥

अपरञ्च । पानं दुर्जनसंसर्गः पत्या च विरहो ऽटनम् ।
स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥ १२२ ॥

किञ्च । स्थानं नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः ।
तेन नारद नारीणां सतीत्वमुपजायते ॥ १२३ ॥

अन्यच्च । न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते ।
गावस् तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥ १२४ ॥
स्त्रियो हि चपला नित्यं देवानामपि विश्रुतम् ।
ताश्चापि रक्षिता येषां ते नराः सुखभागिनः ॥ १२५ ॥

न लज्जा न विनीतत्वं न दाक्षिण्यं न भीरुता ।
प्रार्थकाभाव एवेति सतीत्वे कारणं स्त्रियाः ॥ १२६ ॥

अपरञ्च । घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् ।
तस्माद्घृतं च वह्निं च नैकत्र स्थापयेद् बुधः ॥ १२७ ॥

अपि च । पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रास्तु स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ १२८ ॥
मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ १२९ ॥

एकदा ऽसौ लीलावती रत्नावलीकिरणकर्बुरे पर्यङ्के तेन वणिक्पुत्रेण सह विश्रम्भालापैः सुखासीना तमलक्षितोपस्थितं पतिमवलोक्य सहसा उत्थाय केशेषु गृहीत्वा निर्भरमालिङ्ग्य चुम्बितवती । अत्रान्तरे जारश्चोत्थाय पलायितः ।

उक्तञ्च । उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।
स्वभावेनैव तत्सर्वं स्त्रीबुद्धौ सुप्रतिष्ठितम् ॥ १३० ॥

तदालिङ्गनमवलोक्य समीपवर्तिनी कुट्टिन्यचिन्तयत् । अकस्मादियमेनम् उपगूढवतीति । ततस्तया कुट्टिन्या तत्कारणं जारं परिज्ञाय सा लीलावती गुप्तेन दण्डिता । अतो ऽहं ब्रवीमि अकस्माद्युवती वृद्धमित्यादि । मूषिकबलोपस्तम्भेन केनापि कारणेनात्र भवितव्यम् । क्षणं विचिन्त्य परिव्राजकेनोक्तम् । कारणं चात्र धनबाहुल्यमेव प्रतिभाति ।

यतः । धनवान् बलवान् लोके सर्वः सर्वत्र सर्वदा ।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥ १३१ ॥

ततः खनित्रमादाय तेन परिव्राजकेन विवरं खनित्वा मम चिरकालोपार्जितं धनं गृहीतम् । ततः प्रत्यहं निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुम् अक्षमः सत्रासं मन्दं मन्दमुपसर्पन् चूडाकर्णेनावलोकितो ऽहं । ततस्तेनोक्तम् ।

अर्थेन बलवान् सर्वः अर्थाद्भवति पण्डितः ।
पश्येमं मूषिकं पापं स्वजातिसमतां गतः ॥ १३२ ॥

किञ्च । अर्थेन हि विहीनस्य पुरुषस्याल्पमेधसः ।
क्रियाः सर्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा ॥ १३३ ॥

अपरञ्च । यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्था स पुमांल्लोके यस्यार्थाः स तु पण्डितः ॥ १३४ ॥

अन्यच्च । अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च ।
मूर्खस्य च दिशः शून्याः सर्वशून्या दरिद्रता ॥ १३५ ॥

अपिच । दारिद्र्यान्मरणाद्वापि दारिद्र्यमवरं स्मृतम् ।
अल्पक्लेशेन मरणं दारिद्र्यमतिदुःसहम् ॥ १३६ ॥

अन्यच्च । तानीन्द्रियाण्यविकलानि तदेव नाम सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव त्वन्यः क्षणेन भवतीति विचित्रमेतत् ॥ १३७ ॥

एतत् सर्वमाकर्ण्य मयालोचितम् । यन्ममात्रावस्थानम् अयुक्तमिदानीम् । यच्चान्यस्मै एतद्वृत्तान्तकथनं तदप्यनुचितम् ।

ततः । अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान् न प्रकाशयेत् ॥ १३८ ॥

अपिच । आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम् ।
तपोदानापमानं च नव गोप्यानि यत्नतः ॥ १३९ ॥

तथाचोक्तम् । अत्यन्तविमुखे दैवे व्यर्थयत्ने च पौरुषे ।
मनस्विनो दरिद्रस्य वनादन्यत् कुतः सुखम् ॥ १४० ॥

अन्यच्च । मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति ।
अपि निर्वाणमायाति नानलो याति शीतताम् ॥ १४१ ॥

किञ्च । कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः ।
सर्वेषां मूर्ध्नि वा तिष्ठेद् विशीर्येदथवा वने ॥ १४२ ॥

यच्चात्रैव याच्ञया जीवनं तदतीव गर्हितम् ।

यतः । वरं विभवहीनेन प्राणैः सन्तर्पितोऽनलः ।
नोपचारपरिभ्रष्टः कृपणः प्रार्थितो जनः ॥ १४३ ॥

अन्यच्च । दारिद्र्याद्ध्रियम् एति ह्रीपरिगतः सत्त्वात् परिभ्रश्यते
निःसत्त्वः परिभूयते परिभवान्निर्वेदम् आपद्यते ।
निर्विण्णः शुचमेति शोकविकलो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयम् एत्यहो निधनता सर्वापदाम् आस्पदम् ॥ १४४ ॥

किञ्च । वरं मौनं कार्यं न च वचनमुक्तं यदनृतं
वरं क्लैब्यं पुंसां न च परकलत्राभिगमनम् ।
वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचिर्
वरं भिक्षाशित्वं न च परधनास्वादनसुखम् ॥ १४५ ॥

वरं शून्या शाला न च खलु वरो दुष्टवृषभो
वरं वेश्या पत्नी न च पुनरुपोढा कुलवधूः ।
वरं वासो ऽरण्ये न पुनर् अविवेकाधिपपुरे
वरं प्राणत्यागो न पुनर् अधमानामुपगमः ॥ १४६ ॥

अपि च । सेवेव मानमखिलं ज्योत्स्नेव तमो जरेव लावण्यम् ।
हरिहरकथेव दुरितं गुणशतमप्यर्थिता हरति ॥ १४७ ॥

इति विमृश्य तत् किमहं परपिण्डेनात्मानं भोजयामि । कष्टं भोः । तदपि द्वितीयं मृत्युद्वारम् ।

यतः । पल्लवग्राहि पाण्डित्यं क्रयक्रीतं च मैथुनम् ।
भोजनं च पराधीनं तिस्रः पुंसां विडम्बनाः ॥ १४८ ॥

अन्यच्च । रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सो ऽस्य विश्रामः ॥ १४९ ॥

इत्यालोच्यापि लोभात् पुनरपि तदीयान्नं ग्रहीतुं ग्रहम् अकरवम् ।

तथा चोक्तं । लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्तो दुःखम् आप्नोति परत्रेह च मानवः ॥ १५० ॥

ततो ऽहं वीणाकर्णेन तेन जर्जरवंशखण्डेन ताडितो ऽचिन्तयम् ।

धनलुब्धो ह्यसन्तुष्टो ऽनियतात्माजितेन्द्रियः ।
सर्वा एवापदस् तस्य यस्य तुष्टं न मानसम् ॥ १५१ ॥

तथा च । सर्वाः सम्पत्तयस् तस्य सन्तुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥ १५२ ॥

अन्यच्च । सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।
कुतस्तद् धनलुब्धानाम् इतश्चेतश्च धावताम् ॥ १५३ ॥

किञ्च । तेनाधीतं श्रुतं तेन तेन सम्यगनुष्ठितम् ।
येनाशाः पृष्ठतः कृत्वा नैराश्यम् अवलम्बितम् ॥ १५४ ॥

अपि च । असेवितेश्वरद्वारम् अदृष्टविरहव्ययम् ।
अनुक्तक्लीववचनं धन्यं कस्यापि जीवनम् ॥ १५५ ॥

यतः । न योजनशतं दूरं वाह्यमानस्य तृष्णया ।
सन्तुष्टस्य करप्राप्ते ऽप्यर्थे भवति नादरः ॥ १५६ ॥

तदत्र अवस्थोचितकार्यपरिग्रहः श्रेयान् ।

उक्तञ्च । को धर्मो भूतदया किं सौख्यम् आरोगिता जगति जन्तोः ।
कः स्नेहः सद्भावः किं पाण्डित्यं परिच्छेदः ॥ १५७ ॥

तथाच । परिच्छेदो हि पाण्डित्यं यदापन्ना विपद्दशा ।
अपरिच्छेदकर्तॄणां विपदः स्युः पदे पदे ॥ १५८ ॥

तथा हि । त्यजेद् एकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ १५९ ॥

अपरञ्च । पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरम् ।
विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ॥ १६० ॥

इत्यालोच्याहं निर्जनवनम् आगतः । यतः ।

वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयः पक्कफलाम्बुभक्षणम् ।
तृणानि शय्या परिधानवल्कलं न बन्धुमध्ये धनहीनजीवनम् ॥ १६१ ॥

ततोऽस्मत्पुण्योदयाद् अनेन मित्रेणाहं स्नेहानुवृत्त्यानुगृहीतः । अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः ।

यतः । संसारविषवृक्षस्य द्वे एव मधुरे फले ।
काव्यामृतरसास्वादः सङ्गमः सज्जनैः सह ॥ १६२ ॥

अपरञ्च । सङ्गमः केशवभक्तिर् गङ्गाम्भसि निमज्जनम् ।
असारे खलु संसारे त्रीणि साराणि भावयेत् ॥ १६३ ॥

मन्थर उवाच । अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनं
मानुष्यं जलबिन्दुलोलचपलं फेनोपमं जीवनम् ।
धर्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं
पश्चात्तापहतो जरापरिणतः शोकाग्निना दह्यते ॥ १६४ ॥

युष्माभिर् अतिसञ्चयः कृतः । तस्यायं दोषः ।

शृणु । उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥ १६५ ॥

अन्यच्च । यदधोऽधः क्षितौ वित्तं निचखान मितम्पचः ।
तदधो निलयं गन्तुं चक्रे पन्थानमग्रतः ॥ १६६ ॥

यतः । निजसौख्यं निरुन्धानो यो धनार्जनम् इच्छति ।
परार्थं भारवाहीव क्लेशस्यैव हि भाजनम् ॥ १६७ ॥

तथाचोक्तम् । दानोपभोगहीनेन धनेन धनिनो यदि ।

पृथ्वीखातनिखातेन धनेन धनिनो वयम् ॥ १६८ ॥
दानभोगविहीनाश्च दिवसा यान्ति यस्य वै ।
स कर्मकारभस्त्रेव श्वसन्नपि न जीवति ॥ १६९ ॥

धनेन किं यो न ददाति नाश्नुते बलेन किं यश्च रिपून् न बाधते ।
श्रुतेन किं यो न च धर्ममाचरेत् किमात्मना यो न जितेन्द्रियो भवेत् ॥ १७० ॥

अन्यच्च । असम्भोगेन सामान्यं कृपणस्य धनं परैः ।
अस्येदमिति सम्बन्धो हानौ दुःखेन गम्यते ॥ १७१ ॥

अपि च । न देवाय न विप्राय न बन्धुभ्यो न चात्मने ।
कृपणस्य धनं याति वह्नितस्करपार्थिवैः ॥ १७२ ॥

अन्यच्च । दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ १७३ ॥

तथाचोक्तम् । दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
त्यागसहितं च वित्तं दुर्लभम् एतच्चतुर्भद्रम् ॥ १७४ ॥

उक्तञ्च । कर्तव्यः सञ्चयो नित्यं कर्तव्यो नातिसञ्चयः ।
पश्य सञ्चयशीलो ऽसौ धनुषा जम्बुको हतः ॥ १७५ ॥

हिरण्यको ऽब्रवीत् । कथमेतत् । मन्थरः कथयति । आसीत् कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स चैकदा मांसलुब्धः धनुरादाय विन्ध्याटवीमध्यं गतः । तत्र तेन मृग एको व्यापादितः । मृगमादाय गच्छता तेन आरक्ताचो घोराकृतिः शूकरो दृष्टः । ततस् तेन मृगं भूमौ निधाय शूकरो ऽतितीक्ष्णशरेण हतः । शूकरेणाप्यागत्य प्रलयघनघोरगर्जनं कुर्वाणेन स व्याधो मुष्कदेशे हतः सन् छिन्नद्रुम इव भूमौ पपात ।

यतः । जलम् अग्निर् विषं शस्त्रं क्षुद् व्याधिः पतनं गिरेः ।
निमित्तं किञ्चिदासाद्य देही प्राणैर् विमुच्यते ॥ १७६ ॥

अथ तयोः पादास्फालनेन सर्पो ऽपि मृतः । अत्रान्तरे दीर्घरावो नाम जम्बुकः परिभ्रमन् आहारार्थी तान् मृतान् मृगव्याधसर्पशूकरान् अपश्यत् । आलोक्याचिन्तयद् असौ । अहो भाग्यं महद्भोज्यं समुपस्थितं मे ।

अथवा । अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम् ।
सुखान्यपि तथा मन्ये दैवम् अत्रातिरिच्यते ॥ १७७ ॥

भवतु । एषां मांसैर् मासत्रयं मे सुखेन गमिष्यति ।

मासमेकं नरो याति द्वौ मासौ मृगशूकरौ ।
अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः ॥ १७८ ॥

ततः प्रथमबुभुक्षायाम् इदं निःस्वादु कोदण्डाटनीलग्नं स्नायुबन्धनं खादामि । इत्युक्त्वा तथाकरोत् । ततश्छिन्ने स्नायुबन्धने द्रुतमुत्पतितेन धनुषा हृदि भिन्नः स दीर्घरावः सहसा पञ्चत्वं गतः । अतो ऽहं ब्रवीमि कर्तव्यः सञ्चयो नित्यं इत्यादि ।

तथाच । यद् ददाति यदश्नाति तदेव धनिनो धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥ १७९ ॥
यद् ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥ १८० ॥

तदिदानीं यातु किमतिक्रान्तोपवर्णनेन ।

यतः । नाप्राप्यम् अभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः ॥ १८१ ॥

तत् सखे सर्वदा त्वया सोत्साहेन भवितव्यम् ।

यतः । शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियावान् पुरुषः स विद्वान् ।
सुचिन्तितं चौषधम् आतुराणां न नाममात्रेण करोत्यरोगम् ॥ १८२ ॥

अन्यच्च । न स्वल्पमप्यध्यवसायभीरोः करोति विज्ञानविधिर् गुणं हि ।
अन्धस्य किं हस्ततलस्थितो ऽपि प्रकाशयत्यर्थमिह प्रदीपः ॥ १८३ ॥

तदत्र सखे दशाविशेषेण शान्तिः करणीया ।

सुखमापतितं सेवेद् दुःखमापतितं तथा ।
चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ॥ १८४ ॥

अपरञ्च । निपानमिव मण्डूकाः सरः पूर्णम् इवाण्डजाः ।
सोद्योगं नरमायान्ति विवशाः सर्वसम्पदः ॥ १८५ ॥

अपिच । उत्साहसम्पन्नम् अदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ॥ १८६ ॥

विशेषतश्च । विनाप्यर्थैर् धीरः स्पृशति बहुमानोन्नतिपदं
समायुक्तो ऽप्यर्थैः परिभवपदं याति कृपणः ।
स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां
द्युतिं सैंहीं किं श्वा धृतकनकमालो ऽपि लभते ॥ १८७ ॥

किञ्च । धनवानिति हि मदस्ते किं गतविभवो विषादमुपयासि ।

करनिहितकन्दुकसमाः पातोत्पाता मनुष्याणाम्॥ १८८ ॥

अपरञ्च। अभ्रच्छाया खलप्रीतिर् नवशस्यानि योषितः।
किञ्चित्कालोपभोग्यानि यौवनानि धनानि च ॥ १८९ ॥

अन्यच्च। वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता।
गर्भान्निपतिते जन्तौ मातुः प्रस्रवतः स्तनौ ॥ १९० ॥

सखे शृणु। येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः।
मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥ १९१ ॥

अपरं च सतां रहस्यं शृणु मित्र।
जनयन्त्यर्जने दुःखं तापयन्ति विपत्तिषु।
मोहयन्ति च सम्पत्तौ कथमर्थाः सुखावहाः ॥ १९२ ॥

अपरञ्च। धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता।
प्रक्षालनाद्धि पङ्कस्य दूराद् अस्पर्शनं वरम्॥ १९३ ॥

यतः। यथा ह्यामिषम् आकाशे पक्षिभिः श्वापदैर् भुवि।
भक्ष्यते सलिले मत्स्यैस्तथा सर्वत्र वित्तवान्॥ १९४ ॥

अन्यच्च। राजतः सलिलाद् अग्नेश्चौरतः स्वजनादपि।
भयम् अर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥ १९५ ॥

तथा हि। जन्मनि क्लेशबहुले किन्नु दुःखमतः परम्।
इच्छासम्पद् यतो नास्ति यच्चेच्छा न निवर्तते ॥ १९६ ॥

अन्यच्च भ्रातः शृणु।
धनं तावदसुलभं लब्धं कृच्छ्रेण पाल्यते।
लब्धनाशो यथा मृत्युस् तस्माद् एतन्न चिन्तयेत्॥ १९७ ॥
सा तृष्णा चेत् परित्यक्ता को दरिद्रः क ईश्वरः।
तस्याश्चेत् प्रसरो दत्तो दास्यं च शिरसि स्थितम्॥ १९८ ॥

अपरञ्च। यद्यदेव हि वाञ्छेत ततो वाञ्छा प्रवर्तते।
प्राप्त एवार्थतः सोऽर्थो यतो वाञ्छा निवर्तते ॥ १९९ ॥

किं बहुना। विश्रम्भालापैः मयैव सहात्र कालो नीयताम्।

यतः। आमरणान्ताः प्रणयाः कोपास् तत्क्षणभङ्गुराः।
परित्यागाश्च निःसङ्गा भवन्ति हि महात्मनाम्॥ २०० ॥

इति श्रुत्वा लघुपतनको ब्रूते। धन्योऽसि मन्थर सर्वदाश्रयणीयोऽसि।

यतः । सन्त एव सतां नित्यम् आपदुद्धरणक्षमाः ।
गजानां पङ्कमग्नानां गजा एव धुरन्धराः ॥ २०१ ॥

तथा च । गुणिनि गुणज्ञो रमते नागुणशीलस्य गुणिनि परितोषः ।
अलिर् एति वनात् कमलं न हि भेकस् त्वेकवासो ऽपि ॥ २०२ ॥

अपरञ्च । श्लाघ्यः स एको भुवि मानवानां स उत्तमः सत्पुरुषः स धन्यः ।
यस्यार्थिनो वा शरणागता वा नाशाविभिन्ना विमुखाः प्रयान्ति ॥ २०३ ॥

तदेवं ते स्वेच्छाहारविहारं कुर्वाणाः सन्तुष्टाः सुखं निवसन्ति स्म । अथ कदाचिच् चित्राङ्गनामा मृगः केनापि त्रासितस् तत्रागत्य मिलितः । ततः पश्चादायान्तं भयहेतुं सम्भाव्य मन्थरो जलं प्रविष्टो मूषिकश्च विवरं गत उड्डीयमानो काको वृक्षाग्रमारूढः । ततो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्न को ऽप्यवलोकितः । पश्चादागत्य पुनः सर्वे मिलित्वोपविष्टाः । मन्थरेणोक्तम् । भद्र मृग कुशलं ते । स्वेच्छया उदकाद्याहारो ऽनुभूयताम् । अत्रावस्थानेन वनमिदं सनाथीक्रियताम् । चित्राङ्गो ब्रूते । लुब्धकत्रासितो ऽहं भवतां शरणमागतः ।

यतः । लोभाद् वाथ भयाद् वापि सन्त्यजेच्छरणागतम् ।
ब्रह्महत्यासमं तस्य पापम् आहुर्मनीषिणः ॥ २०४ ॥

ततश्च भवद्भिः सह मित्रत्वमिच्छामि । हिरण्यको ऽवदत् । मित्रत्वं तावदस्माभिः सहायत्वेन निष्पन्नमेव भवतः ।

यतः । औरसं कृतसम्बन्धं तथा वंशक्रमागतम् ।
रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ॥ २०५ ॥

तदत्र स्वगृहनिर्विशेषेण स्थीयताम् । तच्छ्रुत्वा मृगः सानन्दः कृतस्वेच्छाहारः पानीयं पीत्वा जलासन्नतरुच्छायायाम् उपविष्टः ।

यतः । कूपोदकं वटच्छाया श्यामा स्त्री इष्टकागृहम् ।
शीतकाले भवेदुष्णं उष्णकाले च शीतलम् ॥ २०६ ॥

अथ मन्थरो ब्रूते । सखे मृग केन त्रासितो ऽसि । अस्मिन् निर्जने वने कदाचित् किं व्याधाः सञ्चरन्ति । मृगेणोक्तम् । अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नृपतिः । स च दिग्विजयव्यापारक्रमेणागत्य चन्द्रभागानदीतीरे समावासितकटको वर्तते । प्रातश्च तेनात्रागत्य कर्पूरसरः समीपे भवितव्यम् । इति व्याधानां मुखात् किम्बदन्ती श्रूयते । तदत्रापि प्रातरवस्थानं भयहेतुकमित्यालोच्य यथा कार्यं तथारभ्यताम् । तच्छ्रुत्वा कूर्मः सभयमाह । मित्र जलाशयान्तरं गच्छामि । काकमृगावपि उक्तवन्तौ । मित्र

एवमस्तु । हिरण्यको विमृश्याब्रवीत् । पुनर्जलाशये प्राप्ते मन्थरस्य कुशलम् । स्थले गच्छतो ऽस्य को विधिः ।

यतः । अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनाम्
स्वभूमिः श्वापदादीनां राज्ञां सैन्यं परं बलम् ॥ २०७ ॥

सखे लघुपतनक अनेनोपदेशेन तथा भविष्यति
स्वयं वीक्ष्य यथा वध्वाः पीडितं स्तनकुड्मलम् ।
वणिक्पुत्रो ऽभवद्दुःखी त्वं तथैव भविष्यसि ॥ २०८ ॥

त ऊचुः । कथमेतत् । हिरण्यकः कथयति । अस्ति कान्यकुब्जविषये राजा वीरसेनो नाम । तेन वीरपुरनाम्नि नगरे तुङ्गबलो नाम राजपुत्रो भोगपतिः कृतः । स च महाधनस् तरुणः । एकदा स्वनगरं भ्राम्यन्नतिप्रौढयौवनां लावण्यवतीं नाम वणिक्पुत्रवधूम् आलोकयामास । ततः स्वहर्म्यं गत्वा स्मराकुलितमतिस्तस्याः कृते दूतीं प्रेषितवान् ।

यतः । सन्मार्गे तावदास्ते प्रभवति पुरुषस् तावदेवेन्द्रियाणां
लज्जां तावद् विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥ २०९ ॥

सापि लावण्यवती तदवलोकनक्षणात् प्रभृति स्मरशरप्रहारजर्जरितहृदया तदेकचित्ताभवत् ।

तथाचोक्तम् । असत्यं साहसं माया मात्सर्यं चातिलुब्धता ।
निर्गुणत्वम् अशौचत्वं स्त्रीणां दोषाः स्वभावजाः ॥ २१० ॥

अथ दूतीवचनं श्रुत्वा लावण्यवत्युवाच । कथमेतस्मिन्नधर्मे पतिलङ्घने प्रवर्ते । अहं पतिव्रता परपुरुषस्पर्शमात्रमपि न करोमि ।

यतः । सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ २११ ॥
कोकिलानां स्वरं रूपं नारीरूपं पतिव्रतम् ।
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम् ॥ २१२ ॥

अन्यच्च । न सा भार्येति ख्यातव्या यस्यां भर्ता न तुष्यति ।
तुष्टे भर्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ॥ २१३ ॥

ततो यद्यद् आदिशति मे प्राणेश्वरस् तदेवाहमविचारितं करोमि । दूत्योक्तम् । सत्यमेतत् । लावण्यवत्युवाच । ध्रुवं सत्यमेवैतत् । ततः सर्वमेव लावण्यवत्या यथाभिहितं

दूतिकया गत्वा तुङ्गबलस्याग्रे निवेदितम्। तच्छ्रुत्वा तुङ्गबलो ऽवदत्। विषमेषुणा प्रणितहृदयस्तां विना कथमहं जीविष्यामि। कुट्टिन्याह। स्वामिनानीय समर्पयितव्येति। स प्राह। कथमेतच्छक्यम्। कुट्टिन्याह उपायः क्रियताम्।

तथाचोक्तम्। उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः।
शृगालेन हतो हस्ती गच्छता पङ्कवर्त्मना ॥ २१४ ॥

राजपुत्रः पृच्छति। कथमेतत्। सा कथयति। अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती। तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म। यद्ययं केनाप्युपायेन म्रियते तदास्माकमेतद्देहेन मासचतुष्टयस्य स्वेच्छाभोजनं भवेत्। ततस्तन्मध्यादेकेन वृद्धशृगालेन प्रतिज्ञा कृता। मया बुद्धिप्रभावेनास्य मरणं साधयितव्यम्। अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्योवाच। देव दृष्टिप्रसादं कुरु। हस्ती ब्रूते। कस्त्वं कुतः समायातः। सो ऽवदत्। जम्बुको ऽहम्। सर्वैर्वनवासिभिः पशुभिर् मिलित्वा भवत्सकाशं प्रस्थापितः। यद्विना राज्ञा स्थातुं न युक्तम्। तदत्राटवीराज्ये ऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरूपितः।

यतः। कुलाचारजनाचारैर् अतिशुद्धः प्रतापवान्।
धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि ॥ २१५ ॥

अपरञ्च पश्य। राजानं प्रथमं विन्देत् ततो भार्यां ततो धनम्।
राजन्यसति लोके ऽस्मिन् कुतो भार्या कुतो धनम् ॥ २१६ ॥

अन्यच्च। पर्जन्य इव भूतानाम् आधारः पृथिवीपतिः।
विकले ऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥ २१७ ॥

किञ्च।

नियतविषयवर्ती प्रायशो दण्डयोगाज्जगति परवशे ऽस्मिन् दुर्लभः साधुवृत्तः।
कृशमपि विकलं वा व्याधितं वाधनं वा पतिमपि कुलनारी दण्डभीत्याभ्युपैति ॥

तद्यथा लग्नवेला न चलति तथा कृत्वा सत्वरमागम्यतां देवेन। इत्युक्त्वा उत्थाय चलितः। ततो ऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालदर्शितवर्त्मना धावन् महापङ्के निमग्नः। हस्तिनोक्तम्। सखे शृगाल किमधुना विधेयं महापङ्के पतितो ऽहं म्रिये परावृत्य पश्य। शृगालेन विहस्योक्तम्। देव मम पुच्छाग्रे हस्तं दत्त्वोत्तिष्ठ। यस्य वचसि त्वया विश्वासः कृतस्तस्य फलमेतत्।

तथा चोक्तम्। यदा सत्सङ्गरहितो भविष्यसि भविष्यसि।
तदासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ २१८ ॥

ततो महापङ्के निमग्नो हस्ती शृगालैर्भक्षितः। अतो ऽहं ब्रवीमि। उपायेन हि यच्छक्यमित्यादि। ततः कुट्टिन्युपदेशेन तं चारुदत्तनामानं बणिक्पुत्रं स राजपुत्रः सेवकं चकार। ततो ऽसौ तेन सर्वविश्वासकार्येषु नियोजितः। एकदा कुट्टिन्युपदेशेन तेन राजपुत्रेण स्नातानुलिप्तेन कनकालङ्कारधारिणा प्रोक्तम्। अये चारुदत्त मया मासमेकं यावद् गौरीव्रतं कर्तव्यम्। तदद्यारभ्य प्रतिरात्रमेकां कुलीनां युवतीमानीय समर्पय। सा च मया यथोचितेन विधिना पूजयितव्या। ततः स चारुदत्तस् तथाविधां तरुणीमानीय समर्पयति। पश्चात् प्रच्छन्नः सन् किमयं करोतीति निरूपयति। स च तुङ्गबलस् तां युवतीम् अस्पृशन्नेव दूराद् वस्त्रालङ्कारगन्धचन्दनैः सम्पूज्य रक्षकं दत्त्वा तत्क्षणमेव प्रस्थापयति। अथ तेन बणिक्पुत्रेण तद् दृष्ट्वोपजातविश्वासेन लोभाकृष्टमनसा स्ववधूः समानीय समर्पिता। स च तुङ्गबलस्तां हृदयप्रियां लावण्यवतीं विज्ञाय ससम्भ्रममुत्थाय निर्दयमालिङ्ग्यानन्दोन्मीलितलोचनः प्रहृष्टमना बहुविधाम् अनङ्गक्रीडां विधाय पर्यङ्के तया सह विललास। तदालोक्य बणिक्पुत्रश्चित्रलिखित इव इतिकर्तव्यतामूढः परं विषादमुपागतः। तथा त्वयापि भवितव्यमिति। ततस् तद्वचनमवधीर्य महता भयेन मन्थरो जलाशयमुत्सृज्य प्रचलितः। ते ऽपि हिरण्यकादयः स्नेहादनिष्टं शङ्कमानास् तमनुजग्मुः। ततः स्थले गच्छन् केनापि व्याधेन वनं पर्यटता स मन्थरः प्राप्तः। स च तं गृहीत्वा उत्थाप्य धनुषि बद्ध्वा धन्यो ऽस्मीत्यभिधाय स्वगृहाभिमुखं प्रयातः। अथ ते मृगवायसमूषिकाः परं विषादमुपगतास् तम् अनुगच्छन्ति स्म। ततो हिरण्यको विलपति।

एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य।
तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ॥ २२० ॥
स्वभावजं तु यन्मित्रं भाग्येनैवाभिजायते।
तद् अकृत्रिमसौहार्दम् आपत्स्वपि न मुञ्चति ॥ २२१ ॥

अपि च। न मातरि न दारेषु न सोदर्ये न चात्मजे।
विश्वासस् तादृशः पुंसां यादृङ्मित्रे स्वभावजे ॥ २२२ ॥

इति मुहुर्विचिन्त्य। अहो मे दुर्दैवम्।

यतः। स्वकर्मसन्तानविचेष्टितानि कालान्तरावर्त्तिशुभाशुभानि।
इहैव दृष्टानि मयैव तानि जन्मान्तराणीव दशान्तराणि ॥ २२३ ॥

अथवा इत्थमेवैतत्। कायः सन्निहितापायः सम्पदः पदम् आपदाम्।
समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम् ॥ २२४ ॥

पुनर्विमृश्याह । शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम् ।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥ २२५ ॥

किञ्च । मित्रं प्रीतिरसायनं नयनयोर् आनन्दनं चेतसः
पात्रं यत् सुखदुःखयोः सह भवेन्मित्रेण तद् दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुलास्
ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ॥ २२६ ॥

इति बहु विलप्य हिरण्यकश्चित्राङ्गलघुपतनकावाह । यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियताम् । तावूचतुः । सत्वरं यथाकार्यमुपदिश । हिरण्यको ब्रूते । चित्राङ्गो जलसमीपं गत्वा मृतमिव आत्मानं निश्चेष्टं दर्शयतु । काकश्च तस्योपरि स्थित्वा चञ्च्वा किमपि लिखतु । नूनमनेन लुब्धकेन मृगमांसार्थिना तत्र कच्छपं परित्यज्य सत्वरं उपगन्तव्यम् । ततो ऽहं मन्थरस्य बन्धनं छेत्स्यामि । ततश्चित्राङ्गलघुपतनकाभ्यां शीघ्रं गत्वा तथानुष्ठिते सति स व्याधः परिश्रान्तः पानीयं पीत्वा तरोर् अधस्तादुपविष्टः सन् तथाविधं मृगमवलोक्य कच्छपं जलसमीपे निधाय कर्तरिकामादाय प्रहृष्टमना मृगान्तिकं चलितः । अत्रान्तरे हिरण्यकेनागत्य छिन्नबन्धनः स कूर्मः सत्वरं जलाशयं प्रविष्टः । स च मृग आसन्नं तं व्याधं विलोक्य उत्थाय द्रुतं पलायितः । प्रत्यावृत्य लुब्धको यावत् तरुतलमायाति तावत् कूर्मम् अपश्यन्नचिन्तयत् । उचितमेवैतत् ममासमीक्ष्यकारिणः ।

यतः । यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥ २२७ ॥

ततो ऽसौ स्वकर्मवशान्निराशः कटकं प्रविष्टः । मन्थरादयश्च सर्वे मुक्तापदः स्वस्थानं गत्वा यथासुखमास्थिताः । अथ राजपुत्रैः सानन्दमुक्तम् । सर्वं श्रुतवन्तः सुखिनो वयम् । सिद्धं नः समीहितम् । विष्णुशर्मोवाच । एतावता भवताम् अभिलषितं सम्पन्नम् । अपरमपीदमस्तु ।

मित्रं प्राप्नुत सज्जना जनपदैर् लक्ष्मीः समालभ्यताम्
भूपालाः परिपालयन्तु वसुधां शश्वत् स्वधर्मे स्थिताः ।
आस्तां मानसतुष्टये सुकृतिनां नीतिर् नवोढेव वः ।
कल्याणं कुरुतां जनस्य भगवांश्चन्द्रार्धचूडामणिः ॥ २२८ ॥

॥ इति विष्णुशर्मसङ्गृहीतहितोपदेशे मित्रलाभो नाम प्रथमः कथासंग्रहः ॥

## ॥ सुहृद्भेदः ॥

अथ राजपुत्रा ऊचुः । आर्य मित्रलाभः श्रुतस्तावदस्माभिः । इदानीं सुहृद्भेदं श्रोतुमिच्छामो वयम् । विष्णुशर्मोवाच । सुहृद्भेदं शृणुत यस्यायमाद्यः श्लोकः ।

वर्धमानो महास्नेहो मृगेन्द्रवृषयोर्वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ॥ १ ॥

राजपुत्रैरुक्तम् । कथमेतत् । विष्णुशर्मा कथयति । अस्ति दक्षिणापथे सुवर्णवती नाम नगरी । तत्र वर्धमानो नाम वाणिजो महाधनः प्रतिवसति । तस्य प्रभूते ऽपि वित्ते ऽपरान् बन्धून् अतिसमृद्धान् विलोक्य पुनरर्थवृद्धिः करणीयेति मतिर्बभूव ।

यतः । अधो ऽधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥ २ ॥

अपरञ्च । ब्रह्महा ऽपि नरः पूज्यो यस्यास्ति विपुलं धनम् ।
शशिनम् तुल्यवंशो ऽपि निर्धनः परिभूयते ॥ ३ ॥

अन्यच्च । अव्यवसायिनम् अलसं दैवपरं साहसाच्च परिहीनम् ।
प्रमदेव हि वृद्धपतिं नेच्छत्युपगूहितुं लक्ष्मीः ॥ ४ ॥

किञ्च । आलस्यं स्त्रीसेवा सरोगता जन्मभूमिवात्सल्यम् ।
सन्तोषो भीरुत्वं षड् व्याघाता महत्त्वस्य ॥ ५ ॥

यतः । सम्पदा सुस्थितम्मन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥ ६ ॥

अपरञ्च । निरुत्साहं निरानन्दं निर्वीर्यम् अरिनन्दनम् ।
मास्म सीमन्तिनी काचित् जनयेत् पुत्रमीदृशम् ॥ ७ ॥

तथा ह्युक्तं । अलब्धं चैव लिप्सेत लब्धं रक्षेद् अवेक्षया ।
रक्षितं वर्धयेत् सम्यक् वृद्धं तीर्थेषु निक्षिपेत् ॥ ८ ॥

अवर्धमानश्चार्थः काले स्वल्पव्यये ऽप्यञ्जनवत् क्षयमेति । अनुपभुज्यमानश्च निष्प्रयोजन एव ।

तथा ह्युक्तं। अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च सञ्चयम्।
अवन्ध्यं दिवसं कुर्यात् दानाध्ययनकर्मभिः ॥ ९ ॥

यतः। जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥ १० ॥

इति सञ्चिन्त्य वर्धमानः सञ्जीवकनन्दकनामानौ द्वौ वृषभौ धुरि नियोज्य शकटं नानाविधद्रव्यपूर्णं कृत्वा वाणिज्येन काश्मीरं प्रति चलितः।

यतः। कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम्।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥ ११ ॥

अथ गच्छतस्तस्य दुर्गनाम्नि महारण्ये भग्नजानुः सञ्जीवको निपतितः। एतदालोक्य वर्धमानोऽचिन्तयत्।

करोतु नाम नीतिज्ञो व्यवसायमितस्ततः।
फलं पुनस्तदेव स्याद् यद् विधेर्मनसि स्थितम् ॥ १२ ॥

किन्तु। विस्मयः सर्वथा हेयः प्रत्यूहः सर्वकर्मणाम्।
तस्माद्विस्मयमुत्सृज्य साध्यसिद्धिर् विधीयते ॥ १३ ॥

इति सञ्चिन्त्य सञ्जीवकं तत्र परित्यज्य वर्धमानश्चलितः। सञ्जीवकोऽपि कथं कथमपि खुरत्रये भरं कृत्वा तत्रैव वने स्थितः।

यतः। निमग्नस्य पयोराशौ पर्वतात् पतितस्य च।
तक्षकेणापि दष्टस्य आयुर् मर्माणि रक्षति ॥ १४ ॥

अपरञ्च। नाकाले म्रियते जन्तुर् विद्धः शरशतैरपि।
कुशाग्रेणैव संस्पृष्टः प्राप्तकालो न जीवति ॥ १५ ॥

तथा। अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे न जीवति ॥ १६ ॥

ततो दिनेषु गच्छत्सु सञ्जीवकः स्वेच्छाहारादिलाभेन तामरण्यानीं परिभ्रमन् हृष्टपुष्टाङ्गो बलवन्ननाद। तस्मिन् वने पिङ्गलकनामा सिंहः स्वभुजोपार्जितराज्यसुखम् अनुभवन्नास्ते।

यथोक्तं। नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः।
विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता ॥ १७ ॥

स चैकदा पिपासाकुलितः पानीयं पातुं यमुनाकच्छम् अगमत्। तेन च तत्र सिंहेनाननुभूतपूर्वकं प्रलयघनगर्जितमिव सञ्जीवकनर्दितम् अश्रावि। तच्छ्रुत्वासौ पानीयमपीत्वा

सचकितं परिवृत्य स्वस्थानमागत्य किमिदमित्यालोच्य तूष्णीं स्थितः । स च तथाविधः करटकदमनकाभ्यां अस्य मन्त्रिपुत्राभ्यां शृगालाभ्यां दृष्टः । तं तथाविधं दृष्ट्वा दमनकः करटकमाह । सखे करटक किमित्ययमुदकार्थी स्वामी पानीयम् अपीत्वा मन्दं मन्दमवतिष्ठते । करटको ब्रूते । मित्र दमनक मम सम्मतेनास्य सेवैव न क्रियते । तत् किमस्य चेष्टानिरूपणेन । यतो ऽनेन राज्ञा ऽवधीरिताभ्याम् आवाभ्यां महद् दुःखम् अनुभूतम् ।

सेवया धनमिच्छद्भिः सेवकैः पश्य यत्कृतम् ।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितम् ॥ १८ ॥

अपरञ्च । शीतवातातपक्लेशान् सहन्ते ये पराश्रिताः ।
तदंशेनापि मेधावी तपस्तप्त्वा सुखी भवेत् ॥ १९ ॥

अन्यच्च । एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता ।
ये पराधीनतां यातास्ते वै जीवन्ति के मृताः ॥ २० ॥

अपरञ्च । एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनो ऽर्थिभिः ॥ २१ ॥

किञ्च । अबुधैर् अर्थलाभाय पण्यस्त्रीभिरिव स्वयम् ।
आत्मा संस्कृत्य संस्कृत्य परोपकरणीकृतः ॥ २२ ॥

अन्यच्च । या प्रकृत्यैव चपला निपतत्यशुचावपि ।
स्वामिनो बहु मन्यन्ते दृष्टिं तामपि सेवकाः ॥ २३ ॥

विशेषतश्च । प्रणमत्युन्नतिहेतोर् जीवितहेतोर् विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥ २४ ॥

अपरञ्च । मौनान्मूर्खः प्रवचनपटुर् वातुलो जल्पको वा
चान्त्या भीरुर् यदि न सहते प्रायशो नाभिजातः ।
धृष्टः पार्श्वे वसति नियतं दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ २५ ॥

दमनको ऽब्रवीत् । मित्र सर्वथा मनसा ऽपि नैतत्कर्तव्यम् ।

कथं नाम न सेव्यन्ते यत्नतः परमेश्वराः ।
अचिरेणैव ये तुष्टाः पूरयन्ति मनोरथान् ॥ २६ ॥

अन्यच्च । कुतः सेवाविहीनानां चामरोद्धूतसम्पदः ।
उद्दण्डधवलच्छत्रवाजिवारणवाहनाः ॥ २७ ॥

करटको ब्रूते । तथापि किमनेनाव्यापारेणास्माकम् । अव्यापारेषु व्यापारः सर्वथा परिहरणीयः ।

पश्य । अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स भूमौ निहतः शेते कीलोत्पाटीव वानरः ॥ २८ ॥

दमनकः पृच्छति । कथमेतत् । करटकः कथयति । अस्ति मगधदेशे धर्मारण्यसन्निहितायां वसुधायां शुभदत्तनाम्ना कायस्थेन विहारगृहं कारयितुमारब्धः । तत्र करपत्रविदार्यमाणकाष्ठस्तम्भस्य कियद्दूरस्फाटितस्य खण्डद्वयस्य मध्ये कीलकः सूत्रधारेण निहितः । तत्र त वनवासी बलवान् वानरयूथः क्रीडनार्थमायातः । तेष्वेको वानरः कालदण्डप्रेरित इव तं कीलकं हस्ताभ्यां धृत्वोपविष्टः । ततस्तस्य मुष्कद्वयं लम्बमानं काष्ठखण्डद्वयाभ्यन्तरे प्रविष्टम् । अनन्तरं सहजचपलतया महता प्रयत्नेन कीलकमाकृष्टवान् । आकृष्टे च कीलके काष्ठाभ्यां चूर्णिताण्डद्वयः पञ्चत्वं गतः । अतोऽहं ब्रवीमि । अव्यापारेषु व्यापारमित्यादि । दमनको ब्रूते । तथापि स्वामिचेष्टानिरूपणं भृत्येनावश्यं कर्तव्यम् । करटको ब्रूते । सर्वस्मिन्नधिकारे य एव नियुक्तः प्रधानमन्त्री स करोतु । यतोऽनुजीविना पराधिकारचर्चा न कर्तव्या ।

पश्य । पराधिकारचर्चां यः कुर्यात् स्वामिहितेच्छया ।
स विषीदति चित्कारात् ताडितो गर्दभो यथा ॥ २९ ॥

दमनकः पृच्छति । कथमेतत् । करटकः कथयति । अस्ति वाराणस्यां कर्पूरपटो नाम रजकः । स चैकदाभिनववयस्कया वध्वा सह चिरात् निधुवनं कृत्वा निर्भरं प्रसुप्तः । तदनन्तरं द्रव्याणि हर्तुं तद्गृहं कश्चिच्चौरः प्रविष्टः । तस्य प्राङ्गणे गर्दभो बद्धस्तिष्ठति । कुक्कुरश्चोपविष्टोऽस्ति । तं चौरमवलोक्य गर्दभः श्वानमाह । भवतोऽयं व्यापारः । तत् किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि । कुक्कुरो ब्रूते । नियोगस्यास्य चिन्ता त्वया न कार्या । त्वमेव जानासि यथाऽहमस्य गृहरक्षां करोमि । यतोऽयं चिरान्निर्वृतो ममोपयोगं न जानाति । तेनाधुना ममाहारदानेऽपि मन्दादरः । विना विधुरदर्शनं स्वामिनोऽनुजीविषु मन्दादरा भवन्ति । गर्दभो ब्रूते । शृणु रे बर्बर ।

याचते कार्यकाले यः स किं भृत्यः स किं सुहृत् ।
कुक्कुरो ब्रूते । यो न सम्भावयेद् भृत्यान् कार्यकाले स किं प्रभुः ॥ ३० ॥

किञ्च । आश्रितानां भृतौ स्वामिसेवायां धर्मसेवने ।
पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥ ३१ ॥

ततो गर्दभः सकोपमाह । आः पापीयांस्त्वं यः स्वामिकार्योपेक्षां करोषि । भवतु । यथा स्वामी जागर्ति तथा मया कर्तव्यम् ।

यतः । पृष्ठतः सेवयेद् अर्कं जठरेण हुताशनम् ।
स्वामिनं सर्वभावेन परलोकम् अमायया ॥ ३२ ॥

इत्युक्त्वा स अतीव चित्कारशब्दं कृतवान् । ततः स रजकस्तेन चित्कारेण प्रबुद्धो निद्राविमर्दकोपाद् उत्थाय गर्दभं लगुडेन ताडयामास । ततस्तेन ताडनेन गर्दभः पञ्चत्वं गतः । अतो ऽहं ब्रवीमि पराधिकारचर्चामित्यादि । पश्य पशूनाम् अन्वेषणमस्माकं नियोगः । अतः स्वनियोगस्यैव चर्चा क्रियताम् । विमृश्य । किन्त्वद्य तया ऽपि चर्चया न प्रयोजनम् । यतः । आवयोर्भक्षितशेषाहारः प्रचुरस्तिष्ठति । दमनकः सरोषमाह । कथम् आहारमात्रार्थी भवान् नृपं सेवते । सेत्रकेन एतद् अयुक्तमुक्तम् ।

यतः । सुहृदामुपकारकारणात् द्विषतामप्यपकारकारणात् ।
नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्ति केवलम् ॥ ३३ ॥
जीविते यस्य जीवन्ति विप्रा मित्राणि बान्धवाः ।
सफलं जीवितं तस्य आत्मार्थे को न जीवति ॥ ३४ ॥

अपि च । यस्मिन् जीवति जीवन्ति बहवः स तु जीवतु ।
काको ऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणम् ॥ ३५ ॥

पश्य । पञ्चभिर्याति दासत्वं पुराणैः को ऽपि मानवः ।
को ऽपि लक्षैः कृती को ऽपि लक्षैरपि न लभ्यते ॥ ३६ ॥

यतः । मनुष्यजातौ तुल्यायां भृत्यत्वम् अतिगर्हितम् ।
प्रथमो यो न तत्रापि स ऽपि जीवत्सु गण्यते ॥ ३७ ॥

तथाचोक्तं । वाजिवारणलोहानां काष्ठपाषाणवाससाम् ।
नारीपुरुषतोयानाम् अन्तरं महदन्तरम् ॥ ३८ ॥

तथा हि । अल्पस्नायु वसावशेषमलिनं निर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकम् अङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतो ऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ ३९ ॥

अपरञ्च । पश्य सेव्यसेवकयोर् अन्तरम् ।

लाङ्गूलचालनम् अधश्चरणावपातं भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ ४० ॥

किञ्च। यज्जीव्यते क्षणमपि प्रथितं मनुष्यैर्विज्ञानविक्रमयशोभिर् अभज्यमानम्।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः काको ऽपि जीवति चिराय बलिं च भुङ्क्ते॥
अपरञ्च। अहितहितविचारशून्यबुद्धेः श्रुतिविषयैर् बहुभिर् बहिष्कृतस्य।
उदरभरणमात्रकेवलेच्छोः पुरुषपशोश्च पशोश्च को विशेषः॥ ४२॥

करटको ब्रूते। आवां तावदप्रधानौ तदाप्यावयोः किमनया विचारणया। दमनकः पुनराह। कियता कालेनामात्यः प्रधानताम् अप्रधानतां वा लभेत।

यतः। न कस्यचित् कश्चिदिह स्वभावाद् भवत्युदारो ऽभिमतः खलो वा।
लोके गुरुत्वं विपरीततां वा स्वचेष्टितान्येव नरं नयन्ति॥ ४३॥

किञ्च। आरोप्यते शिला शैले यत्नेन महता यथा।
निपात्यते क्षणेनाधस् तथात्मा गुणदोषयोः॥ ४४॥

तद्भद्र स्वयत्नायत्तो ह्यात्मा सर्वस्य।
यात्यधो ऽधो व्रजत्युच्चैर् नरः स्वैरेव कर्मभिः।
कूपस्य खनिता यद्वत् प्राकारस्येव कारकः॥ ४५॥

करटको वदति। अथ भवान् किं ब्रवीति। दमनक आह। अयं तावत् स्वामी पिङ्गलकः पानीयमपीत्वा कुतो ऽपि भयात् सचकितं परिवृत्योपविष्टः। करटको ब्रूते। किं तत्र त्वं जानासि। दमनको वदति। किं प्रज्ञावताम् अविदितमस्ति।

उक्तञ्च। उदीरितो ऽर्थः पशुना ऽपि गृह्यते हयाश्च नागाश्च वहन्ति देशिताः।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः॥ ४६॥

अपि च। आकारैरिङ्गितैर् गत्या चेष्टया भाषणेन च।
नेत्रवक्त्रविकारेण लक्ष्यते ऽन्तर्गतं मनः॥ ४७॥

तदत्र भयप्रस्तावे ऽहमेनं प्रज्ञाबलेनात्मीयं करिष्यामि।

यतः। प्रस्तावसदृशं वाक्यं सद्भावसदृशं प्रियम्।
आत्मशक्तिसमं कोपं यो जानाति स पण्डितः॥ ४८॥

करटको वदति। सखे त्वं सेवानभिज्ञः।

पश्य। अनाहूतो विशेद् यस्तु अपृष्टो बहु भाषते।
आत्मानं मन्यते प्रेष्ठं भूपालस्य स दुर्मतिः॥ ४९॥

दमनको ब्रूते। भद्र कथमहं सेवानभिज्ञः।

पश्य। किमप्यस्ति स्वभावेन सुन्दरं वाप्यसुन्दरम्।
यदेव रोचते यस्मै तदेव तस्य सुन्दरम्॥ ५०॥

अपरञ्च । यस्य यस्य हि यो भावस्तेन तेन हि तं नरम् ।
अनुप्रविश्य मेधावी क्षिप्रम् आत्मवशं नयेत् ॥ ५१ ॥

अन्यच्च । को ऽत्रेत्यहमिति ब्रूयात् सम्यग् आदेशयेति च ।
आज्ञाम् अवितथां कुर्यात् यथाशक्ति महीपतेः ॥ ५२ ॥

किञ्च । अल्पेच्छुर् धृतिमान् प्राज्ञश्छायेवानुगतः सदा ।
आदिष्टो न विकल्पेत स राजवसतिं वसेत् ॥ ५३ ॥

करटको ब्रूते । कदाचित् त्वाम् अनवसरप्रवेशाद् अवमन्यते स्वामी । दमनक आह । अस्त्वेवं । तथाप्यनुजीविना सान्निध्यम् अवश्यं करणीयम् ।

यतः । दोषभीतेर् अनारम्भः कापुरुषस्य लक्षणम् ।
कैर् अजीर्णभयाद् भ्रातर् भोजनं परिहीयते ॥ ५४ ॥

पश्य । आसन्नमेव नृपतिर् भजते मनुष्यं विद्याविहीनम् अकुलीनम् असङ्गतं वा ।
प्रायेण भूमिपतयः प्रमदा लताश्च यः पार्श्वतो वसति तं परिवेष्टयन्ति ॥ ५५ ॥

करटको ब्रूते । अथ तत्र गत्वा किं वक्ष्यसि । दमनक आह । शृणु किमनुरक्तो विरक्तो वा मयि स्वामीति ज्ञास्यामि तावत् । करटको ब्रूते । किं तज्ज्ञानलक्षणम् । दमनको ब्रूते । शृणु ।

दूरादवेक्षणं हासः सम्प्रश्ने सादरो भृशम् ।
परोक्षे ऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु ॥ ५६ ॥
असेवके ऽनुरक्तिश्च दानं प्रीतिविवर्धनम् ।
सुरक्तेश्वरचिह्नानि दोषे ऽपि गुणसङ्ग्रहः ॥ ५७ ॥
कालयापनम् आशानां वर्धनं फलखण्डनम् ।
विरक्तेश्वरचिह्नानि जानीयान्मतिमान् नरः ॥ ५८ ॥

एतज्ज्ञात्वा यथा चायं ममायत्तो भविष्यति तद् वक्ष्यामि ।

यथा । अपायसन्दर्शनजां विपत्तिम् उपायसन्दर्शनजां च सिद्धिम् ।
मेधाविनो नीतिविधिप्रयुक्तां पुरः स्फुरन्तीमिव दर्शयन्ति ॥ ५९ ॥

अपरञ्च । दोषा गुणा गुणा दोषा दोषा दोषा गुणा गुणाः ।
रक्ते विरक्ते मध्यस्थे स्वामिनि त्रिविधा गुणाः ॥ ६० ॥

करटको ब्रूते । तथाप्यप्राप्ते प्रस्तावे न वक्तुमर्हसि ।

यतः । अप्राप्तकालवचनं बृहस्पतिरपि ब्रुवन् ।
प्राप्नुयाद् बुद्ध्यवज्ञानम् अपमानं च शाश्वतम् ॥ ६१ ॥

दमनको ऽब्रवीत्। मित्र मा भैषीः। नाहम् अप्राप्तावसरवचनं वक्ष्यामि।

यतः। आपद्युन्मार्गगमने कार्यकालात्ययेषु च।
अपृष्टेनापि वक्तव्यं भृत्येन हितम् इच्छता ॥ ६२ ॥

यदि च प्राप्तावसरे ऽपि मन्त्रो मया न वक्तव्यस् तदा मन्त्रित्वमेव ममानुपपन्नम्।

यतः। कल्पयति येन वृत्तिं येन च लोके प्रशस्यते सद्भिः।
स गुणस् तेन च गुणिना रक्ष्यः संवर्धनीयश्च ॥ ६३ ॥

तद्भद्रानुजानीहि पिङ्गलकसमीपम् अहं गच्छामि। करटको ब्रूते। शुभमस्तु यथाभिप्रेतम् अनुष्ठीयताम्।

गम्यताम् अर्थलाभाय क्षेमाय विजयाय च।
शत्रुपक्षविनाशाय पुनरागमनाय च ॥ ६४ ॥

ततो दमनको विस्मित इव पिङ्गलकसमीपं गतः। अथ दूरादेव राज्ञा दृष्टः सादरं प्रवेशितस् तं साष्टाङ्गं प्रणम्योपविष्टः। राजाह। चिराद् दृष्टो ऽसि। दमनको ब्रूते। यद्यपि मया सेवकेन श्रीमद्देवपादानां न किंचित् प्रयोजनम् अस्ति तथापि प्राप्तकाले ऽनुजीविना सान्निध्यम् अवश्यं कर्तव्यमित्यागतो ऽस्मि।

दन्तस्य निर्घर्षणकेन राजन् कर्णस्य कण्डूयनकेन वा ऽपि।
तृणेन कार्यं भवतीश्वराणां किम् अङ्गवाक्पाणिमता नरेण ॥ ६५ ॥

यद्यपि स्वामिना चिरावधीरितस्य मे बुद्धिविनाशः शङ्क्यते तदपि न।

यतः। मणिर्लुठति पादेषु काचः शिरसि धार्यते।
क्रयविक्रयवेलायां काचः काचो मणिर्मणिः ॥ ६६ ॥

अन्यच्च। कदर्थितस्यापि च धैर्यवृत्तेर् बुद्धेर्विनाशो न हि शङ्कनीयः।
अधः कृतस्यापि तनूनपातो नाधः शिखा याति कदाचिदेव ॥ ६७ ॥

देव सर्वथा विशेषज्ञेन स्वामिना भवितव्यम्।

यतः। निर्विशेषं यदा राजा समं सर्वेषु वर्तते।
तदोद्यमसमर्थानाम् उत्साहः परिहन्यते ॥ ६८ ॥

किं च। त्रिविधाः पुरुषा राजन् उत्तमाधममध्यमाः।
नियोजयेत् तथैवैतांस्त्रिविधेष्वेव कर्मसु ॥ ६९ ॥

यतः। स्थान एव हि युज्यन्ते भृत्याश्चाभरणानि च।
न हि चूडामणिः पादे नूपुरो न च मूर्धनि ॥ ७० ॥

अपि च। कनकभूषणसंग्रहणोचितो यदि मणिस् त्रपुणि प्रणिधीयते।

न स विरौति न चापि स शोभते भवति योजयितुर्वचनीयता ॥ ७१ ॥

अन्यच्च । मुकुटे रोपितः काचश्चरणाभरणे मणिः ।
न हि दोषो मणेरस्ति किन्तु साधोरविज्ञता ॥ ७२ ॥

पश्य । बुद्धिमाननुरक्तो ऽयमिहोभयगुणो जनः ।
इति भृत्यविचारज्ञो भृत्यैरापूर्यते नृपः ॥ ७३ ॥

तथा हि । अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
प्राप्य मनुष्यविशेषं भवन्ति योग्या अयोग्याश्च ॥ ७४ ॥

अन्यच्च । किं भक्तेनासमर्थेन किं शक्तेनापकारिणा ।
भक्तं शक्तं च मां राजन्नावज्ञातुं त्वमर्हसि ॥ ७५ ॥

यतः । अवज्ञानाद्राज्ञो भवति मतिहीनः परिजनस्
ततस्तत्प्रामाण्याद्भवति न समीपे बुधजनः ।
बुधैस्त्यक्ते राज्ये न हि भवति नीतिर्गुणवती
विपन्नायां नीतौ सकलमवशं सीदति जगत् ॥ ७६ ॥

अपरञ्च देव । जनं जनपदा नित्यमर्चयन्ति नृपार्चितम् ।
नृपेणावमतो यस्तु स सर्वैरवमन्यते ॥ ७७ ॥

किञ्च । बालादपि गृहीतव्यं युक्तमुक्तं मनीषिभिः ।
रवेरविषये किं न प्रदीपस्य प्रकाशनम् ॥ ७८ ॥

पिङ्गलको ब्रूते । भद्र दमनक किमेतत् । त्वमस्माकं प्रधानामात्यपुत्रः सुधीरियत्कालं नीत्वा कुतो ऽपि पिशुनवचनान्नागतो ऽसि । इदानीं यथाभिमतं ब्रूहि । दमनकः सधैर्यमाह । देव पृच्छामि किञ्चिदुच्यताम् । उदकार्थी स्वामी पानीयमपीत्वा किमिति विस्मित इवावतिष्ठते । पिङ्गलको ऽवदत् । भद्रमुक्तं त्वया किन्तु एतद्रहस्यं वक्तुमस्माकं विश्वासभूमिरस्ति न को ऽपि त्वं तु तद्विधस्ततः शृणु कथयामि । सम्प्रति वनम् इदम् अपूर्वसत्त्वाधिष्ठितं अतो ऽस्माकं त्याज्यम् । तथा च श्रुतस् त्वयाप्यपूर्वः शब्दो महान् । शब्दानुरूपेण च तस्य प्राणिनो बलेनापि सुमहता भवितव्यम् । दमनको ब्रूते । देव अस्ति तावदयं महान् भयहेतुः शब्दो ऽस्माभिर् अप्याकर्णितः । किन्तु स किं मन्त्री यः प्रथमं मन्त्राभावेन भूपतिं परित्यागं युद्धोद्योगं चोपदिशति । अपरं च देव अस्मिन् कार्यसन्देहे भृत्यानामुपयोग एव ज्ञातव्यः ।

यतः । बन्धुस्त्रीभृत्यवर्गस्य बुद्धेः सत्त्वस्य चात्मनः ।
आपन्निकषपाषाणे नरो जानाति सारताम् ॥ ७९ ॥

सिंहो ब्रूते । भद्र महती शङ्का मां बाधते । दमनकः स्वगतमाह । अन्यथा राज्यसुखं परित्यज्य स्थानान्तरं गन्तुं कथं मां सम्भाषसे । प्रकाशं ब्रूते । देव यावदहं जीवामि तावद्भयं न कर्तव्यम् । किन्तु करटकादयो ऽपि आश्वास्यन्ताम् । यस्माद् आपत्प्रतीकाराय दुर्लभः पुरुषसमवायः । ततस्तौ दमनककरटकौ राज्ञा महाप्रसादेन पूजितौ भयप्रतीकारं प्रतिज्ञाय चलितौ । करटको गच्छन् दमनकमाह । सखे किं शक्यप्रतीकारो ऽयं भयहेतुर् अशक्यप्रतीकारो वेति न ज्ञात्वा भयोपशमं प्रतिज्ञाय कथमयं महाप्रसादो गृहीतः । यतो ऽनुपकुर्वाणो न कस्यापि उपायनं गृह्णीयात् । विशेषतो राज्ञः ।

पश्य । यस्य प्रसादे पद्मास्ते विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ ८० ॥

तथा हि । बालो ऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ ८१ ॥

दमनको विहस्याह । मित्र तूष्णीमास्यतां ज्ञातं मया भयकारणम् । बलीवर्देन नर्दितम् । वृषभाश्चास्माकं भक्ष्याः किं पुनः सिंहस्य । करटको ब्रूते । यद्येवं तदा स्वामित्रासस् तत्रैव किं नापनीतः । दमनको ऽवदत् । यदि स्वामित्रासस् तत्रैव मुच्यते तदा कथमयं महाप्रसादलाभः स्यात् ।

अपरञ्च । निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदाचन ।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत् ॥ ८२ ॥

करटकः पृच्छति । कथमेतत् । दमनकः कथयति । अस्त्युत्तरापथे अर्बुदशिखरनाम्नि पर्वते महाविक्रमो नाम सिंहः । तस्य पर्वतकन्दरम् अधिशयानस्य केशराग्रं मूषिकः कश्चिच्छिनत्ति । स सिंहः केशराग्रं लूनं बुद्ध्वा कुपितो विवरान्तर्गतं मूषिकम् अलभमानो ऽचिन्तयत् । किं विधेयमत्र । भवत्वेवं श्रूयते ।

क्षुद्रशत्रुर् भवेद्यस्तु विक्रमान्नैव लभ्यते ।
तमाहर्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः ॥ ८३ ॥

इत्यालोच्य तेन ग्रामं गत्वा दधिकर्णनामा विडालो मांसाद्याहारेण सन्तोष्य प्रयत्नादानीय स्वकन्दरे धृतः । ततस् तद्भयान्मूषिको बहिर्न निःसरति । तेनासौ सिंहो ऽक्षतकेशरः सुखं स्वपिति । मूषिकशब्दं यदा यदा शृणोति तदा तदा सविशेषं तं विडालं मांसाहारदानेन संवर्धयति । अथैकदा स मूषिकः क्षुधापीडितो बहिः सञ्चरंस्तेन मार्जारेण प्राप्तो व्यापादितः खादितश्च । अनन्तरं स सिंहो यदा कदाचिदपि मूषि-

कशब्दं न शुश्राव। तदोपयोगाभावात् तस्य विडालस्याहारदाने मन्दादरो बभूव। अतो ऽहं ब्रवीमि निरपेक्षो न कर्तव्य इत्यादि। ततो दमनककरटकौ सञ्जीवकसमीपं गतौ। तत्र करटकस्तरुतले साटोपमुपविष्टः। दमनकः सञ्जीवकसमीपं गत्वा ऽब्रवीत्। अरे वृषभ एषो ऽहं राज्ञा पिङ्गलकेनारण्यरक्षार्थं नियुक्तः। सेनापतिः करटकः समाज्ञापयति सत्वरमागच्छ नो चेदस्मादरण्याद् दूरमपसर। अन्यथा ते विरुद्धं फलं भविष्यति। न जाने क्रुद्धः स्वामी किं विधास्यति।

यतः। आज्ञाभङ्गो नरेन्द्राणां ब्राह्मणानामनादरः।
पृथक् शय्या च नारीणाम् अशस्त्रविहितो वधः॥ ८४॥

ततो देशव्यवहारानभिज्ञः सञ्जीवकः सभयमुपसृत्य साष्टाङ्गपातं करटकं प्रणतवान्।

तथा चोक्तम्। मतिरेव बलाद्गरीयसी यदभावे करिणामियं दशा।
इति घोषयतीव डिण्डिमः करिणो हस्तिपकाहतः क्वणन्॥ ८५॥

अथ सञ्जीवकः साशङ्कमाह। सेनापते किं मया कर्तव्यं तदभिधीयताम्। करटको ब्रूते। वृषभ यदत्र कानने स्थातुमिच्छा वर्तते तदा देवपादारविन्दं गत्वा प्रणम। सञ्जीवको वदति। तदभयवाचं प्रयच्छ आगच्छामि। करटकेनोक्तम्। शृणु रे बलीवर्द अलमनया शङ्कया।

यतः। प्रतिवाचम् अदत्त केशवः शपमानाय न चेदिभूभुजे।
अनुहुङ्कुरुते घनध्वनिं न हि गोमायुरुतानि केशरी॥ ८६॥

अपरञ्च। तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचैः प्रणतानि सर्वतः।
समुच्छ्रितानेव तरून् प्रबाधते महान् महत्येव करोति विक्रमम्॥ ८७॥

ततस्तौ सञ्जीवकं नातिदूरे संस्थाप्य पिङ्गलकसमीपं गतौ। ततो राज्ञा सादरम् आलोकितौ प्रणम्योपविष्टौ। राजाह। स दृष्टः। दमनको ब्रूते। देव दृष्टः। यद् देवेनाकर्णितं तत्तथैव। महाबलो ऽसौ देवपादं द्रष्टुमिच्छति। सज्जीभूयोपविश्यतां महाराजेन। किन्तु शब्दमात्रान्न भेतव्यम्।

अम्भसा भिद्यते सेतुस्तथा मन्त्रो ऽप्यरक्षितः।
पैशुन्याद् भिद्यते स्नेहो वाग्भिर्भिद्यो हि कातरः॥ ८८॥

तथा चोक्तम्। शब्दमात्रान्न भेतव्यम् अज्ञात्वा शब्दकारणम्।
शब्दहेतुं परिज्ञाय कुट्टिनी गौरवं गता॥ ८९॥

राजाह। कथमेतत्। दमनकः कथयति। अस्ति श्रीपर्वतमध्ये ब्रह्मपुराख्यं नगरम्। तत्र शैलशिखरे घण्टाकर्णो नाम राक्षसः प्रतिवसतीति जनप्रवादः श्रूयते। एकदा

कस्यचिद् घण्टामादाय पलायमानः कश्चिच्चौरो व्याघ्रेण व्यापादितः । तत्पाणिपतिता घण्टा वानरैः प्राप्ता । ते च वानरास् तां घण्टामनुक्षणं वादयन्ति । ततो नगरजनैर्मनुष्यः खादितो दृष्टः प्रतिक्षणं घण्टारावश्च श्रूयते । अनन्तरं घण्टाकर्णः कुपितो मनुष्यान् खादति घण्टां च वादयति इत्युक्त्वा जनाः सर्वे नगरात् पलायिताः । ततः करालया नाम कुट्टिन्या विमृश्य मर्कटा घण्टां वादयन्ति स्वयं विज्ञाय राजा विज्ञापितः । देव यदि कियद्धनोपक्षयः क्रियते तदाहमेनं घण्टाकर्णं साधयामि । ततो राज्ञा तुष्टेन तस्यै धनं दत्तम् । कुट्टिन्या च मण्डलं कृत्वा तत्र गणेशादिगौरवं दर्शयित्वा स्वयं वानरप्रियफलान्यादाय वनं प्रविश्य फलान्याकीर्णानि । ततो घण्टां परित्यज्य वानराः फलासक्ता बभूवुः । कुट्टिनी च घण्टां गृहीत्वा नगरमागता सकललोकपूज्या ऽभवत् । अतो ऽहं ब्रवीमि शब्दमात्रान्न भेतव्यमिति । ततः सञ्जीवकमानीय दर्शनं कारितवन्तौ । पश्चात् तत्रैव वने चिरमतिप्रियेण वसति । अथ कदाचित् तस्य सिंहस्य भ्राता स्तब्धकर्णो नाम सिंहः समागतः । तस्यातिथ्यं कृत्वोपवेश्य पिङ्गलकस् तदाहाराय पशून् हन्तुं चलितः । अत्रान्तरे सञ्जीवको वदति । देव अद्य हतमृगाणां मांसानि क्व । राजाह । दमनककरटकौ जानीतः । सञ्जीवको ब्रूते । ज्ञायतां किमस्ति नास्ति वा । सिंहो विहस्याह । नास्त्येव तत् । सञ्जीवको ब्रूते । कथमेतावन्मांसं ताभ्यां खादितम् । राजाह । खादितं व्ययितं अवधीरितं च । प्रत्यहमेष क्रमः । सञ्जीवको ब्रूते । कथं श्रीमद्देवपादानाम् अगोचरेणैवं क्रियते । राजाह । मदीयागोचरेणैव क्रियते । सञ्जीवको ब्रूते । नैतदुचितम् ।

तथा चोक्तम् । नानिवेद्य प्रकुर्वीत भर्तुः किञ्चिदपि स्वयम् ।
कार्यम् आपत्प्रतीकाराद् अन्यत्र जगतीपते ॥ ९० ॥

अन्यच्च । कमण्डलूपमो ऽमात्यस् तनुत्यागो बहुग्रहः ।
नृपते किङ्क्षणो मूर्खो दरिद्रः किंवराटकः ॥ ९१ ॥
स ह्यमात्यः सदा श्रेयान् यः काकिन्या ऽपि वर्धयेत् ।
कोषः कोषवतः प्राणाः प्राणाः प्राणा न भूपतेः ॥ ९२ ॥
किञ्चान्यैर्न कुलाचारैः सेव्यताम् एति पूरुषः ।
धनहीनः स्वपत्न्यापि त्यज्यते किम्पुनः परैः ॥ ९३ ॥

एतच्च राज्ये प्रधानदूषणम् । पश्य ।

अतिव्ययो ऽनपेक्षा च तथार्जनम् अधर्मतः ।
मोषणं दूरसंस्थानां कोषव्यसनमुच्यते ॥ ९४ ॥

यतः । क्षिप्रम् आयम् अनालोच्य व्ययमानः स्ववाञ्छया ।
अमणायत एवासौ धनी वैश्रवणोपमः ॥ ९५ ॥

तदाकर्ण्य स्तब्धकर्णो ब्रूते । शृणु भ्रातः । चिराश्रितावेतौ दमनककरटकौ सन्धिविग्रहकार्याधिकारिणौ । कार्याधिकारी न धनाधिकारे नियोक्तव्यः । अपरं च नियोगिप्रस्तावे मया यत्किञ्चित् श्रुतं तत्कथयामि ।

ब्राह्मणः क्षत्रियो बन्धुर्नाधिकारे प्रशस्यते ।
ब्राह्मणः सिद्धमप्यर्थं कृच्छ्रेणापि न यच्छति ॥ ९६ ॥
नियुक्तः क्षत्रियो द्रव्ये खड्गं दर्शयते ध्रुवम् ।
सर्वार्थं ग्रसते बन्धुर् आक्रम्य ज्ञातिभावतः ॥ ९७ ॥
अपराधे ऽपि निःशङ्को नियोगी चिरसेवकः ।
स स्वामिनम् अवज्ञाय चरेच्च निरवग्रहः ॥ ९८ ॥
उपकर्ताधिकारास्थः स्वापराधं न मन्यते ।
उपकारं ध्वजीकृत्य सर्वमेव विलुम्पति ॥ ९९ ॥
उपांशुक्रीडितो ऽमात्यः स्वयं राजायते ऽयतः ।
अवज्ञा क्रियते तेन सदा परिचयाद्ध्रुवम् ॥ १०० ॥
अन्तर्दुष्टः क्षमायुक्तः सर्वानर्थकरः किल ।
शकुनिः शकटारश्च दृष्टान्तावत्र भूपते ॥ १०१ ॥
सदामात्यो न साध्यः स्यात् समृद्धः सर्व एव हि ।
सिद्धानाम् अयम् आदेश ऋद्धिश्चित्तविकारिणी ॥ १०२ ॥
प्राप्तार्थाग्रहणं द्रव्यपरिवर्तो ऽनुरोधनम् ।
उपेक्षा बुद्धिहीनत्वं भोगो ऽमात्यस्य दूषणम् ॥ १०३ ॥
नियोग्यर्थग्रहोपायो राज्ञां नित्यपरीक्षणम् ।
प्रतिपत्तिप्रदानं च तथा कर्मविपर्ययः ॥ १०४ ॥
नापीडिता वमन्त्युच्चैर् अन्तःसारं महीपतेः ।
दुष्टव्रणा इव प्रायो भवन्ति हि नियोगिनः ॥ १०५ ॥
मुहुर्नियोगिनो बोध्या वसुधारा महीपतेः ।
सकृत् किं पीडितं स्नानवस्त्रं मुञ्चेद् बहूदकम् ॥ १०६ ॥

एतत्सर्वं ज्ञात्वा यथावसरं व्यवहर्तव्यम् । पिङ्गलको ब्रूते । अस्ति तावदेवं किन्तु एतौ सर्वथा न मम वचनकरौ । स्तब्धकर्णो ब्रूते । एतत्सर्वथा ऽनुचितम् ।

यतः । आज्ञाभङ्गकरान् राजा न क्षमेत सुतानपि ।
विशेषः को नु राज्ञश्च राज्ञश्चित्रगतस्य च ॥ १०७ ॥

अन्यच्च । स्तब्धस्य नश्यति यशो विषमस्य मैत्री
नष्टेन्द्रियस्य कुलम् अर्थपरस्य धर्मः ।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥ १०८ ॥

विशेषतश्च । तस्करेभ्यो नियुक्तेभ्यः शत्रुभ्यो नृपवल्लभात् ।
नृपतिर्निजलोभाच्च प्रजा रक्षेत् पितेव हि ॥ १०९ ॥

भ्रातः सर्वथा मद्वचनं क्रियताम् । आहारो ऽप्यद्यास्माभिः कृत एव । अयं शस्यभक्षकः सञ्जीवको भोजनाधिकारे नियुज्यताम् । एतद्वचनात् तथानुष्ठिते सति पिङ्गलकसञ्जीवकयोः सर्वबन्धुपरित्यागेन महता स्नेहेन कालो ऽतिवर्तते । ततो ऽनुजीविनामप्याहारदाने शैथिल्यदर्शनाद् दमनककरटकावन्योन्यं चिन्तयतः । तदाह दमनकः । किमत्र विधेयम् । आत्मकृतो ऽयं दोषः । स्वयङ्कृते ऽपि दोषे परिदेवनमप्यनुचितम् ।

तथा चोक्तम् । स्वर्णरेखाम् अहं स्पृष्ट्वा बद्ध्वात्मानं च दूतिका ।
आदित्सुश्च मणिं साधुः स्वदोषाद् दुःखिता इमे ॥ ११० ॥

करटकः पृच्छति । कथमेतत् । दमनकः कथयति । अस्ति काञ्चनपुरनाम्नि नगरे वीरविक्रमः नाम राजा । तस्य धर्माधिकारिणा कश्चिन्नापितो वध्यभूमिं नीयमानः कन्दर्पकेतुनाम्ना परिव्राजकेन साधुद्वितीयेन नायं वध्य इत्युक्त्वा वस्त्राञ्चले धृतः । राजपुरुषा ऊचुः । किमिति नायं वध्यः । स आह श्रूयताम् । स्वर्णरेखाम् अहं स्पृष्ट्वा इत्यादि पठति । त आहुः । कथमेतत् । परिव्राजकः कथयति । अहं सिंहलद्वीपस्य भूपतेर्जीमूतकेतोः पुत्रः कन्दर्पकेतुः । अथैकदा केलिकाननावस्थितेन मया पोतवणिङ्मुखाच्छ्रुतं यदत्र समुद्रमध्ये चतुर्दश्याम् आविर्भूतकल्पतरुतले मणिकिरणावलीकर्बुरपर्यङ्के स्थिता सर्वालङ्कारभूषिता लक्ष्मीरिव वीणां वादयन्ती कन्या काचिद् दृश्यत इति । ततो ऽहं तं पोतवणिजम् आदाय पोतमारुह्य तत्र गतः । अनन्तरं तत्र गत्वा मया तथैव सा अवलोकिता । ततस् तल्लावण्यगुणाकृष्टेन पश्चान्मया ऽपि झम्पो दत्तः । तदनन्तरं कनकपत्तनं प्राप्य सुवर्णप्रासादे तथैव सा पर्यङ्कस्था विद्याधरीभिर् अभिनवयौवनाभिर् उपास्यमाना मयावलोकिता । तया ऽप्यहं दूरादेव दृष्ट्वा सखीं प्रस्थाप्य सादरं सम्भाषितः । ततस् तत्सख्या च मया पृष्टया समाख्यातम् । एषा कन्दर्पकेलिनाम्नो

विद्याधरचक्रवर्तिनः पुत्री रत्नमञ्जरी नाम। अनया प्रतिज्ञातम्। यः कनकपत्तनं स्वचक्षुषागत्य द्रक्ष्यति स एव पितुरगोचरे ऽपि मां परिणेष्यतीति। तदिमां गन्धर्वविवाहेन परिणीतवान्। अथ गन्धर्वविवाहे वृत्ते तया सहाहं रममाणश्चिरं तिष्ठामि। तत एकदा रहसि तयोक्तम्। स्वामिन् स्वेच्छया सर्वमिदमुपभोक्तव्यम्। किन्तु एषा चित्रगता स्वर्णरेखा नाम विद्याधरी न कदाचित् स्प्रष्टव्या। पश्चादुपजातकौतुकेन सा स्वर्णरेखा हस्तेन मया स्पृष्टा तया च चित्रगतयाप्यहं तथा कृत्वा चरणपद्मेनाहतः। यथा सौराष्ट्रदेशे पतितः। अतो दुःखार्तो ऽहं प्रव्रजितः पृथिवीं परिभ्रमन् इमां नगरीमनुप्राप्तः। अत्र चातिक्रान्ते दिवसे गोपगृहे सुप्तः सन्नपश्यम्। प्रदोषसमये सुहृदां पालनं कृत्वा स गोपो गोष्ठादागतः। स्ववधूं दूत्या सह मन्त्रयन्तीम् अपश्यत्। ततस्तां गोपीं ताडयित्वा गृहस्तम्भे हस्तौ बद्धा सुप्तः। ततो ऽर्धरात्रे ऽस्य नापितस्य वधूर्दूती पुनस्तां गोपीमुपेता ऽवदत्। तव वियोगानलदग्धो ऽसौ मुमूर्षुरिव वर्तते महानुभावः। तदहमात्मानमत्र बद्धा तिष्ठामि। त्वं तत्र गत्वा तं सम्भाष्य सत्वरमागच्छ। तथानुष्ठिते सति स गोपः प्रबुद्धो ऽवदत्। इदानीं जारान्तिकं कथं न यासि। ततो यदा सा दूती न किञ्चिद्ब्रूते। तदा दर्पान्मम वचनस्योत्तरं न ददासि इत्यभिधाय स पापः त्वरितं स्ववधूभ्रान्त्या तस्या नासिकां छिन्नवान्। तथा कृत्वा पुनः सुप्तो गोपो निद्रामुपगतः। अथ जारं सम्भाष्यागता सा गोपी सत्वरं दूतीम् अपृच्छत् कर्णे लगित्वा च भद्रे का वार्ता। दुती उवाच। पश्य मम मुखमेव वार्तां मुखरयति। अनन्तरं सा गोपी तथैवात्मानं बद्धावस्थिता। इयं च दूती छिन्ननासिकां गृहीत्वा निजगृहं प्रविश्य स्थिता। ततः प्रभाते ऽनेन नापितेन नगराटनाय क्षुरभाण्डं याचिता सती सा तस्मै क्षुरभाण्डमदत्त्वा क्षुरमेकं प्रादात्। पश्चादयं नापितो ऽसमग्रभाण्डप्राप्तिसमुपजातकोपो दूरादेव क्षुरं गृहे प्रक्षिप्तवान्। अथ कृतार्तरावा इयं विनापराधेन मम नासिका अनेन छिन्ना। इत्युक्त्वा धर्माधिकारिसमीपम् एनम् आनीतवती। सा च गोपी तेन गोपेन पृष्टा सत्युवाच। अरे पाप को मां महासतीं विरूपयितुं समर्थः। मम व्यवहारम् अष्टौ लोकपाला एव जानन्ति।

यतः। आदित्यचन्द्रावनिलो ऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्॥ १११॥

ततो ऽहं यदि परमसती स्यां त्वां विहायान्यं न जाने स्वप्ने ऽपि पुरुषान्तरं न हि भजे तदा मम मुखमक्षतं भवतु। ततो यावदसौ गोपः प्रदीपमानीय तस्या मुखमवलोकते तावदक्षतं मुखमवलोक्य तच्चरणयोः पतितः। तां निर्भरमालिङ्ग्य प्रबोधित-

वान्। यश्चायमास्ते साधुर् एतद्वृत्तान्तमपि शृणुत। अयं स्वगृहान्निःसृतो द्वादशभिर् वर्षैर् मलयोपकण्ठादिमां नगरीमागतः। अत्र च वेश्यागृहे सुप्तः। ततः कुट्टिन्या गृहद्वारि स्थापितकाष्ठघटितवेतालस्य मूर्ध्नि रत्नमेकम् उत्कृष्टम् आस्ते। तद् दृष्ट्वा ऽर्थलुब्धेनानेन साधुना रात्रावुत्थाय कियन्मूल्यं रत्नमिदम् आश्चर्यमवलोकयितुं तस्मिन् रत्ने हस्तो दत्तः। यत्नेनाकृष्टं च तद् रत्नम्। तदैव तेन वेतालेन सूत्रसञ्चारितबाहुभ्यां पीडितः सन्नार्तनादं चकार। पश्चादुत्थाय कुट्टिन्योक्तम्। पुत्र मलयोपकण्ठादागतो ऽसि। तत् सर्वरत्नानि प्रयच्छ नो चेदनेन न त्यक्तव्यो ऽसि। इत्थमेवायं चेटकः। ततो ऽनेन सर्वरत्नानि समर्पितानि। अधुना चायमपि हृतसर्वस्वो ऽस्मासु मिलितः। एतत्सर्वं श्रुत्वा राजपुरुषैर्न्यायः प्रवर्तितः। नापितवधूर्मुण्डिता। गोपी निःसारिता। कुट्टिनी च दण्डिता। साधोर् धनानि प्रदत्तानि। अतो ऽहं ब्रवीमि स्वर्णरेखामहं स्पृष्ट्वेत्यादि। अतः स्वयङ्कृतो ऽयं दोषः। अत्र विलपनमनुचितम्। क्षणं विमृश्य। मित्र सहसैव यथा ऽनयोः सौहार्दं मया कारितं तथा भेदो ऽपि कार्यः।

यतः। अतथ्यान्यपि तथ्यानि दर्शयन्ति हि पेशलाः।
समे निम्नोन्नतानीव चित्रकर्मविदो जनाः ॥ ११२ ॥

अपरञ्च। उत्पन्नेष्वपि कार्येषु मतिर्यस्य न हीयते।
स निस्तरति दुर्गाणि गोपी जारद्वयं यथा ॥ ११३ ॥

करटकः पृच्छति। कथमेतत्। दमनकः कथयति। अस्ति द्वारावत्यां पुर्यां कस्यचिद् गोपस्य वधूर्बन्धकी। सा च ग्रामस्य दण्डनायकेन तत्पुत्रेण च सह रमते।

तथा चोक्तम्। नाग्निस् तृप्यति काष्ठानां नापगानां महोदधिः।
नान्तकः सर्वभूतानां न पुंसां वामलोचनाः ॥ ११४ ॥

अन्यच्च। न दानेन न मानेन नार्जवेन न सेवया।
न शस्त्रेण न शास्त्रेण विषमाः सर्वथा स्त्रियः ॥ ११५ ॥

यतः। गुणाश्रयं कीर्तियुतं च कान्तं पतिं रतिज्ञं सधनं युवानम्।
विहाय शीघ्रं वनिता व्रजन्ति नरान्तिकं शीलगुणादिहीनम् ॥ ११६ ॥

अपरञ्च। न तादृशीं प्रीतिमुपैति नारी विचित्रशय्यां शयिता ऽपि कामम्।
यथा हि दूर्वादिविकीर्णभूमौ प्रयाति सौख्यं परकान्तसङ्गात् ॥ ११७ ॥

अथ सा कदाचिद् दण्डनायकसुतेन सह रममाणा तिष्ठति। अत्रान्तरे दण्डनायको ऽप्यागतः। तं दृष्ट्वा तत्पुत्रं कुशूले धृत्वा दण्डनायकेन समं तथैव क्रीडितवती।

अनन्तरं तस्या भर्ता गोपो गोष्ठात् समागतः। तमालोक्य गोप्योक्तम्। दण्डनायक त्वं लगुडं गृहीत्वा कोपं दर्शयन् सत्वरं याहि। तथानुष्ठिते सति स गोपस्तत्रागत्य भार्यां पृष्टवान्। केन कार्येण दण्डनायकः समागतोऽत्र। सा ब्रूते। अयं केनापि कारणेन पुत्रस्योपरि क्रुद्धः। स च मार्ग्यमाणोऽत्रागत्य भयेन प्रविष्टः। मया ऽसौ कुशूले निक्षिप्य रक्षितः। तत्पित्रा चान्विष्यता गृहे न दृष्टः। अतोऽयं कुपित एव गच्छति। ततः सा तत्पुत्रं कुशूलादवतार्य दर्शितवती।

तथा चोक्तम्। आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः॥ ११८॥

अतोऽहं ब्रवीमि। उत्पन्नेष्वपि कार्येषु इत्यादि। करटको ब्रूते। अस्त्वेवं किन्त्वनयोर् महान् नैसर्गिकः स्नेहः कथं भेदयितुं शक्यः। दमनक आह। उपायश्चिन्तनीयः।

तथा चोक्तम्। उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः।
काकी कनकसूत्रेण कृष्णसर्पम् अघातयत्॥ ११९॥

करटकः पृच्छति। कथमेतत्। दमनकः कथयति। कस्मिंश्चित् तरौ वायसदम्पती निवसतः। तयोश्चापत्यानि तरुकोटरावस्थितकृष्णसर्पेण खादितानि। ततः पुनर्गर्भवती वायसी ब्रूते। स्वामिन् त्यज्यतामयं तरुः। अत्र यावत् कृष्णसर्पस् तावदावयोः सन्ततिः कदाचिदपि न भविष्यति।

यतः। दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः।
ससर्पे च गृहे वासो मृत्युरेव न संशयः॥ १२०॥

वायसो ब्रूते। प्रिये न भेतव्यम्। वारं वारं मयैतस्य महापराधः सोढः। इदानीं पुनर्न क्षन्तव्यः। वायस्याह। कथमनेन बलवता कृष्णसर्पेण सार्धं भवान् विग्रहयितुं समर्थः। वायसो ब्रूते। अलमनया चिन्तया।

यतः। बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः॥ १२१॥

वायस्याह। कथमेतत्। वायसः कथयति। अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम सिंहः। स च सर्वदा पशूनां वधं विदधान एवास्ते। ततः सर्वैः पशुभिर्मेलकं कृत्वा स सिंहो विज्ञप्तः। देव किमर्थं एकदैव सर्वपशुवधः क्रियते। वयमेव भवदाहारार्थं प्रत्यहमेकैकं कृत्वा पशुमुपढौकयामः। सिंहेनोक्तम्। यद्येतदभिमतं भवतां तर्हि तदेव भवतु। अथ सर्वे पर्यायक्रमेण प्रत्यहं पशुं ददति। ततः प्रभृति प्रत्यहमेकैकं

पशुमुपकल्पितं भक्षयन्नास्ते। अथ कदाचित् कस्यापि वृद्धशशकस्य वासरः प्राप्तः। ततः सो ऽचिन्तयत्।

त्रासहेतोर्विनीतिस्तु क्रियते जीविताशया।
पञ्चत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे ॥ १२२ ॥

तन्मन्दं मन्दमुपगच्छामि। ततः सिंहो ऽपि क्षुधापीडितः कोपात् तमुवाच। कुतस्त्वं विलम्बादागतो ऽसि। शशको ऽब्रवीत्। नाहमपराद्धः पथि सिंहान्तरेण बलाद्धृतः। तस्याग्रे पुनरागमनाय शपथं कृत्वा स्वामिनं निवेदयितुमत्रागतो ऽस्मि। सिंहः सकोपमाह। सत्वरं गत्वा मां दर्शय स दुरात्मा क्वास्ते। ततः शशकस्तं गृहीत्वा गभीरकूपसमीपमागतः। अत्रागत्य पश्यतु स्वामीत्युक्त्वा तस्मिन् कूपजले तस्यैव प्रतिबिम्बं दर्शितवान्। ततो ऽसौ क्रोधाध्मातो दर्पात् तस्योपरि आत्मानं निक्षिप्य पञ्चत्वं गतः। अतो ऽहं ब्रवीमि। बुद्धिर्यस्य इत्यादि। वायसी ब्रूते। श्रुतं मया कर्तव्यतां ब्रूहि। वायसो ऽवदत्। प्रिये आसन्ने सरसि राजपुत्रः सततमागत्य स्नाति। तस्मिन् प्रस्तरे तदङ्गादवतारितं कनकसूत्रं चञ्च्वा धृत्वानीयास्मिन् कोटरे धरिष्यसि। अथ कदाचित् कनकसूत्रं दृषदि संस्थाप्य स्नातुं प्रविष्टे राजपुत्रे वायस्या तदनुष्ठितम्। अथ कनकसूत्रानुसरणप्रवृत्तैः राजपुरुषैः कोटरे निरूप्यमाणः कृष्णसर्पो व्यापादितः। अतो ऽहं ब्रवीमि। उपायेन हि यच्छक्यमित्यादि। करटक आह। यद्येवं तदा गच्छ पन्थानः सन्तु ते शिवाः। ततो दमनकः पिङ्गलकसमीपं गत्वा प्रणम्योवाच। देव आत्ययिकं किमपि महाभयकारि कार्यं मन्यमानो निवेदयितुमागतः।

यतः। आपद्युन्मार्गगमने कार्यकालात्ययेषु च।
कल्याणवचनं ब्रूयादपृष्टो ऽपि हितो नरः ॥ १२३ ॥

अन्यच्च। भोगस्य भाजनं राजा मन्त्री कार्यस्य भाजनम्।
राजकार्यपरिध्वंसान्मन्त्री दोषेण लिप्यते ॥ १२४ ॥

अमात्यानामेष क्रमः। वरं प्राणपरित्यागः शिरसो वापि कर्तनम्।
न तु स्वामिपदावाप्तिपातकेच्छोर् उपेक्षणम् ॥ १२५ ॥

पिङ्गलकः सादरं ब्रूते। अथ भवान् किं वक्तुमिच्छति। दमनक आह। अयं तावत् सञ्जीवकस् तवोपरि असदृशव्यवहारी लक्ष्यते। तथा चास्मत्सन्निधाने स्वामिनः शक्तित्रयनिन्दां कृत्वा राज्यमेवाभिलषति। एतच्छ्रुत्वा पिङ्गलकः सभयं साश्चर्यं तूष्णीं स्थितः। दमनकः पुनराह। देव सर्वामात्यपरित्यागं कृत्वा त्वयैक एवायं सकलकार्याधिकारे नियुक्तः। अयं च महान् दोषः। यतः।

अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः ।
सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति ॥ १२६ ॥

अपरञ्च । एकं भूमिपतिः करोति सचिवं राज्ये प्रधानं यदा
तं मोहाच्छ्रयते मदः स च मदालस्येन निर्भिद्यते ।
निर्भिन्नस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा
स्वातन्त्र्यस्पृहया ततः स नृपतेः प्राणान्तकं द्रुह्यति ॥ १२७ ॥

तथा चोक्तम् । विषदिग्धस्य भक्तस्य दन्तस्य चलितस्य च ।
अमात्यस्य च दुष्टस्य मूलादुद्धरणं सुखम् ॥ १२८ ॥

किञ्च । यः कुर्यात् सचिवायत्तां श्रियं तद्व्यसने सति ।
सो ऽन्धवज्जगतीपालः सीदेत् सञ्चारकैर्विना ॥ १२९ ॥

स च सर्वकार्येषु स्वेच्छातः प्रवर्तते । तदत्र स्वामी प्रमाणम् । एतच्चाहं जानामि कार्यतः ।

न सो ऽस्ति पुरुषो लोके यो न कामयते श्रियम् ।
परस्य युवतीं रम्यां साकाङ्क्षं वीक्षते न कः ॥ १३० ॥

सिंहो विमृश्याह । भद्र यद्यपि एवं तथापि सञ्जीवकेन सह मम महान् स्नेहः ।

पश्य । कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ।
अशेषदोषदुष्टो ऽपि कायः कस्य न वल्लभः ॥ १३१ ॥

अन्यच्च । अप्रियाण्यपि कुर्वाणो यः प्रियः प्रिय एव सः ।
दग्धमन्दिरसारे ऽपि कस्य वह्नावनादरः ॥ १३२ ॥

दमनको वदति । देव स एव दोषः ।

यतः । यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः ।
सुते ऽमात्ये ऽप्युदासीने स लक्ष्म्याश्रीयते जनः ॥ १३३ ॥

श्रूयतां देव । अप्रियस्यापि पथ्यस्य परिणामः सुखावहः ।
वक्ता श्रोता च यत्रास्ते रमन्ते तत्र सम्पदः ॥ १३४ ॥

त्वया च मूलभृत्यान् अपास्यायम् आगन्तुकः पुरस्कृतः । एतच्चानुचितं कृतम् ।

यतः । मूलभृत्यापराधेन नागन्तून् प्रतिपालयेत् ।
नातः परतरो ऽन्यो ऽस्ति राज्यभेदकरो यतः ॥ १३५ ॥

सिंहो ब्रूते । महदाश्चर्यम् । यन्मया ऽयम् अभयवाचं दत्त्वा समानीतः संवर्धितश्च । तत् कथं द्रुह्यति । दमनको वदति । देव ।

दुर्जनः प्रकृतिं याति सेव्यमानो ऽपि नित्यशः ।

स्वेदनाभ्यञ्जनोपायैः श्वपुच्छमिव नामितम् ॥ १३६ ॥

अपरञ्च । स्वेदितो मर्दितश्चैव रज्जुभिः परिवेष्टितः ।
मुक्तो द्वादशभिर्वर्षैः श्वपुच्छः प्रकृतिं गतः ॥ १३७ ॥

अन्यच्च । वर्धनं चाथ सन्मानं खलानां प्रीतये कुतः ।
फलन्त्यमृतसेके ऽपि न पथ्यानि विषद्रुमाः ॥ १३८ ॥

अतो ऽहं ब्रवीमि । अपृष्टो ऽपि हितं ब्रूयात् यस्य नेच्छेत् पराभवम्
एष एव सतां धर्मो विपरीतमतो ऽसताम् ॥ १३९ ॥

तथा चोक्तम् । स स्निग्धो ऽकुशलान्निवारयति यस् तत्कर्म यन्निर्मलं
सा स्त्री यानुविधायिनी स मतिमान् यः सद्भिर् अभ्यर्च्यते ।
सा श्रीर्या न मदं करोति स सुखी यस् तृष्णया मुच्यते
तन्मित्रं यद् अकृत्रिमं स पुरुषो यः खिद्यते नेन्द्रियैः ॥ १४० ॥

यदि सञ्जीवकव्यसनार्दितो विज्ञापितो ऽपि स्वामी न निवर्तते तदा भृत्यस्य न दोषः ।

तथा च । नृपः कामासक्तो न गणयति कार्यं न च हितं
यथेष्टं स्वच्छन्दः प्रविचरति मत्तो गज इव ।
ततो मानध्मातः स पतति यदा शोकगहने
तदा भृत्ये दोषान् क्षिपति न निजं वेत्त्यविनयम् ॥ १४१ ॥

पिङ्गलकः स्वगतम् । न परस्यापवादेन परेषां दण्डम् आचरेत् ।
आत्मनावगमं कृत्वा बध्नीयात् पूजयेत वा ॥ १४२ ॥

तथा चोक्तम् । गुणदोषावनिश्चित्य विधिना ग्रहनिग्रहौ ।
स्वनाशाय यथा न्यस्तो दर्पात् सर्पमुखे करः ॥ १४३ ॥

प्रकाशं ब्रूते । तदा सञ्जीवकः किं प्रत्यादिश्यताम् । दमनकः ससम्भ्रमम् आह । देव मा मैवं तावत् । मन्त्रभेदो जायते ।

तथा चोक्तम् । मन्त्रवीजम् इदं गुप्तं रक्षणीयं तथा यथा ।
मनागपि न भिद्येत तद् भिन्नं न प्ररोहति ॥ १४४ ॥

किञ्च । आदेयस्य प्रदेयस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रम् अक्रियमाणस्य कालः पिबति तद्रसम् ॥ १४५ ॥

तदवश्यं समारब्धं महता प्रयत्नेन सम्पादनीयम् ।

किञ्च । मन्त्रो योध इवाधीरः सर्वाङ्गैः संवृतैरपि ।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥ १४६ ॥

यदि असौ दृष्टदोषो ऽपि दोषान्निवर्त्य सन्धातव्यस् तद् अतीवानुचितम्।

यतः। सकृद् दुष्टं यो तु मित्रं पुनः सन्धातुमिच्छति।
स मृत्युमेव गृह्णाति गर्भम् अश्वतरी यथा ॥ १४७ ॥

सिंहो ब्रूते। ज्ञायतां तावत् किम् अस्माकमसौ कर्तुं समर्थः। दमनक आह। देव।

अङ्गाङ्गिभावम् अज्ञात्वा कथं सामर्थ्यनिर्णयः।
पश्य टिट्टिभमात्रेण समुद्रो व्याकुलीकृतः ॥ १४८ ॥

सिंहः पृच्छति। कथमेतत्। दमनकः कथयति। समुद्रतीरे टिट्टिभदम्पती निवसतः। अथ टिट्टिभी आसन्नप्रसवा भर्तारमाह। नाथ प्रसवयोग्यस्थानम् अन्विष्यताम्। टिट्टिभो ऽवदत्। नन्विदमेव स्थानं प्रसूतियोग्यम्। सा ब्रूते। समुद्रवेलया प्लाव्यते स्थानमेतत्। सो ऽब्रवीत्। भद्रे किमहं निरङ्कः। मम गृहावस्थितान्यण्डानि समुद्रेणापहर्तव्यानि। टिट्टिभी विहस्याह। नाथ त्वया समुद्रेण च महदन्तरम्।

अथवा। दुःखमात्मा परिच्छेत्तुमेव योग्यो न वेति वा।
अस्तीदृग् यस्य विज्ञानं स कृच्छ्रे ऽपि न सीदति ॥ १४९ ॥

अपिच। अनुचितकर्मारम्भः स्वजनविरोधो बलीयसा स्पर्धा।
प्रमदाजनविश्वासो मृत्योर् द्वाराणि चत्वारि ॥ १५० ॥

ततः स्वामिवचनात् तत्रैव प्रसूता सा। एतत्सर्वं श्रुत्वा समुद्रेणापि तच्छक्तिज्ञानार्थिना तदण्डान्यपहृतानि। ततस्तु टिट्टिभी शोकार्ता भर्तारमाह। नाथ कष्टमापतितम्। अण्डानि मे नष्टानि। टिट्टिभो ऽवदत्। प्रिये मा भैषीः। इत्युक्त्वा पक्षिणां मेलकं कृत्वा पक्षिस्वामिनो गरुडस्य समीपं गतः। निजाण्डानां विनाशकथां निवेदयति। ततस्तेन गरुत्मता तद्वचनमाकर्ण्य प्रभुर्भगवान् नारायणः सृष्टिस्थितिप्रलयहेतुर् विज्ञप्तः। ततो भगवदाज्ञां मौलौ निधाय समुद्रसमीपं गतः। ततस् तद्वचनमाकर्ण्य समुद्रस् तान्यण्डानि समर्पितवान्। अतो ऽहं ब्रवीमि। अङ्गाङ्गिभावम् अज्ञात्वा इत्यादि। राजाह। कथमसौ ज्ञातव्यो द्रोहबुद्धिरिति। दमनकः पुनराह। यदा ऽसौ शृङ्गाग्रप्रहरणाभिमुखश्चकित इवागच्छति तदा ज्ञास्यति स्वामी। एवमुक्त्वा सञ्जीवकसमीपं गतः। तत्र गतश्च मन्दं मन्दमुपसर्पन् विस्मितमिवात्मानम् अदर्शयत्। ततः सञ्जीवकेन सादरमुक्तम्। भद्र दमनक कुशलं ते। दमनको ब्रूते। अनुजीविनां कुतः कुशलम्।

यतः। सम्पत्तयः पराधीनाः सदा चित्तमनिर्वृतम्।
स्वजीविते ऽप्यविश्वासस्तेषां ये राजसंश्रयाः ॥ १५१ ॥

अन्यच्च । को ऽर्थान् प्राप्य न गर्वितो विषयिणः कस्यापदो ऽस्तङ्गताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः ।
कः कालस्य भुजान्तरं न च गतः को ऽर्थी गतो गौरवं
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ॥ १५२ ॥

सञ्जीवकेनोक्तम् । सखे ब्रूहि किमेतत् । दमनक आह । किं ब्रवीमि मन्दभाग्यः ।

पश्य । यथा समुद्रे निमग्नो लब्ध्वा सर्पावलम्बनम् ।
न मुञ्चति न चाधत्ते तथा मुग्धो ऽस्मि सम्प्रति ॥ १५३ ॥

यतः । एकत्र राजविश्वासो नश्यत्यन्यत्र बान्धवः ।
किं करोमि क्व गच्छामि पतितो दुःखसागरे ॥ १५४ ॥

इत्युक्त्वा दीर्घं निःश्वस्योपविष्टः । सञ्जीवको ब्रूते । तथापि सुविस्तरं मनोगतं मित्र कथ्यताम् । दमनकः सुनिभृतमाह । यद्यपि राजविश्वासो ऽन्यस्मै न कथनीयस्तथापि भवान् अस्मदीयप्रत्ययाद् आगतः स्थितश्च । तन्मया परलोकार्थिना ऽवश्यं तव हितम् आख्येयम् । शृणु । अयं स्वामी तवोपरि विकृतबुद्धी रहस्येवमुक्तवान् । सञ्जीवकमेव हत्वा स्वपरिवारं तर्पयामि । एतच्छ्रुत्वा सञ्जीवकः परं विषादमगमत् । दमनकः पुनराह । अलं विषादेन प्राप्तकालकार्यम् अनुष्ठीयताम् । सञ्जीवकः क्षणं विमृश्याह । स्पष्टार्थं खल्विदमुच्यते ।

दुर्जनगम्या नार्यः प्रायेणापात्रभृद् भवति राजा ।
कृपणानुसारि च धनं देवो गिरिजलधिवर्षी ॥ १५५ ॥

तथा । नीचम् आश्रयते लक्ष्मीर् अकुलेन सरस्वती ।
अपात्रं भजते नारी गिरौ वर्षति वासवः ॥ १५६ ॥

स्वगतं । किम् इदम् एतद्विचेष्टितं न वेत्येतद्व्यवहारादेव निर्णेतुं न शक्यते ।

यतः । कश्चिद् आश्रयसौन्दर्याद् धत्ते शोभामसज्जनः ।
प्रमदालोचनन्यस्तं मलीमसमिवाञ्जनम् ॥ १५७ ॥

तत्र विचिन्त्योक्तम् । कष्टं किमिदमापतितम् । यतः ।

आराध्यमानो नृपतिः प्रयत्नान्न तोषमायाति किमत्र चित्रम् ।
अयं त्वपूर्वः प्रतिमाविशेषो यः सेव्यमानो रिपुतामुपैति ॥ १५८ ॥

तदयमशक्यार्थः प्रयत्नः ।

यतः । निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै कथं जनस्तं परितोषयिष्यति ॥ १५९ ॥

किं मयापकृतं राज्ञः । अथवा निर्निमित्तापकारिणो हि राजानः । दमनको ब्रूते । एवमेवैतत् । शृणु ।

विज्ञैः स्निग्धैर् उपकृतमपि द्वेष्यतामेति कैश्चित्
साक्षाद् अन्यैर् अपकृतमपि प्रीतिमेवोपयाति ।
चित्रं चित्रं किमथ चरितं नैकभावाश्रयाणां
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ १६० ॥

अन्यच्च । कृतशतम् असत्सु नष्टं सुभाषितशतं च नष्टम् अबुधेषु ।
वचनशतम् अवचनकरे बुद्धिशतम् अचेतने नष्टम् ॥ १६१ ॥

किञ्च । चन्दनतरुषु भुजङ्गा जलेषु कमलानि तत्र च ग्राहाः ।
गुणघातिनश्च पिशुना भोगे न सुखान्यविघ्नानि ॥ १६२ ॥

अन्यच्च । मूलं भुजङ्गैः कुसुमानि भृङ्गैः शाखाः प्लवङ्गैः शिखराणि भल्लैः ।
नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं दुष्टतरैः कुपङ्कैः ॥ १६३ ॥

दमनको ब्रूते । अयं तावत् स्वामी वाङ्मधुरः विषहृदयो मया ज्ञायते ।

यतः । दूरादुच्छ्रितपाणिर् आर्द्रनयनः प्रोत्सारितार्धासनो
गाढालिङ्गनतत्परः प्रियकथाप्रश्नेषु दत्तादरः ।
अन्तर्गूढविषो बहिर् मधुमयश्चातीव मायापटुः
को नामायम् अपूर्वनाटकविधिर्यः शिक्षितो दुर्जनैः ॥ १६४ ॥

तथा हि । पोतो दुस्तरवारिराशितरणे दीपो ऽन्धकारागमे
निर्वाते व्यजनं मदान्धकरिणो दर्पोपशान्त्यै सृणिः ।
इत्थं तद् भुवि नास्ति यस्य विधिना नोपायचिन्ता कृता
मन्ये दुर्जनचित्तवृत्तिहरणे धाता ऽपि भग्नोद्यमः ॥ १६५ ॥

सञ्जीवकः स्वगतम् । कष्टं भो कथमहं शस्यभक्षकः सिंहेन व्यापादयितव्यः ।

यतः । द्वयोरेव समं वित्तं द्वयोरेव समं बलम् ।
तयोर्विवादो मन्तव्यो नोत्तमाधमयोः क्वचित् ॥ १६६ ॥

पुनर्विचिन्त्याह । केनायं राजा ममोपरि विकारितः । भेदमुपगताद्राज्ञः सदा भेतव्यम् ।

यतः । मन्त्रिणा पृथिवीपालचित्तं विघटितं क्वचित् ।
वलयं स्फटिकस्येव को हि सन्धातुमीश्वरः ॥ १६७ ॥

अन्यच्च । वज्रं च राजतेजश्च द्वयमेवातिभीषणम् ।
एकमेकत्र पतति पतत्यन्यत् समन्ततः ॥ १६८ ॥

तत् सङ्ग्रामे मृत्युरेवाश्रीयताम् इदानीं तदाज्ञानुवर्तनम् अयुक्तम्।

यतः। मृतः प्राप्नोति वा स्वर्गं शत्रुं हत्वा सुखानि वा।
उभावपि हि शूराणां गुणावेतौ सुदुर्लभौ ॥ १६९ ॥

युद्धकालश्चायम्। यत्रायुद्धे ध्रुवं नाशो युद्धे जीवितसंशयः।
तमेव कालं युद्धस्य प्रवदन्ति मनीषिणः ॥ १७० ॥

यतः। अयुद्धे हि यदा पश्येन्न किञ्चिद्धितम् आत्मनः।
युध्यमानस् तदा प्राज्ञो म्रियते रिपुणा सह ॥ १७१ ॥
जये च लभते लक्ष्मीं मृतेनापि सुराङ्गनाम्।
क्षणविध्वंसिनः कायाः का चिन्ता मरणे रणे ॥ १७२ ॥

एतच्चिन्तयित्वा सञ्जीवक आह। भो मित्र कथमसौ मां जिघांसुरिति ज्ञातव्यः। दमनको ब्रूते। यदासौ स्तब्धकर्णः समुद्धतलाङ्गूल उन्नतचरणो विवृतास्यस् त्वां पश्यति तदा त्वमपि स्वविक्रमं दर्शयिष्यसि।

यतः। बलवानपि निस्तेजाः कस्य नाभिभवास्पदम्।
निःशङ्कं दीयते लोकैः पश्य भस्मचये पदम् ॥ १७३ ॥

किन्तु सर्वमेतत् सुगुप्तमनुष्ठातव्यं नो चेन्न त्वं नाहम् इत्युक्त्वा दमनकः करटकसमीपं गतः। करटकेनोक्तम्। किं निष्पन्नम्। दमनकेनोक्तम्। निष्पन्नोऽनयोरन्योन्यभेदः। करटको ब्रूते। कोऽत्र सन्देहः।

यतः। बन्धुः को नाम दुष्टानां कुप्येत् को नातियाचितः।
को न दृप्यति वित्तेन कुकृत्ये को न पण्डितः ॥ १७४ ॥

अन्यच्च। दुर्वृत्तः क्रियते धूर्तैः श्रीमान् आत्मविवृद्धये।
किं नाम खलसंसर्गः कुरुते नाश्रयाशवत् ॥ १७५ ॥

ततो दमनकः पिङ्गलकसमीपं गत्वा देव समागतोऽसौ पापाशयस्तत् सज्जीभूय स्थीयताम्। इत्युक्त्वा पूर्वोक्ताकारं कारयामास। सञ्जीवकोऽप्यागत्य तथाविधं विकृताकारं सिंहं दृष्ट्वा स्वानुरूपं विक्रमं चकार। ततस्तयोः प्रवृत्ते महाहवे सञ्जीवकः सिंहेन व्यापादितः। अथ पिङ्गलकः सञ्जीवकं सेवकं व्यापाद्य विश्रान्तः सशोक इवासीनः। ब्रूते च। किं मया दारुणं कर्म कृतम्।

यतः। परैः सम्भुज्यते राज्यं स्वयं पापस्य भाजनम्।
धर्मातिक्रमतो राजा सिंहो हस्तिवधादिव ॥ १७६ ॥

अपरञ्च। भूम्येकदेशस्य गुणान्वितस्य भृत्यस्य वा बुद्धिमतः प्रणाशे।

भृत्यप्रणाशो मरणं नृपाणां नष्टा ऽपि भूमिः सुलभा न भृत्याः ॥ १७७ ॥

दमनको ब्रूते। स्वामिन् को ऽयं नूतनो न्यायः। यदरातिं हत्वा सन्तापः क्रियते। तथा ह्युक्तम्।

पिता वा यदि वा भ्राता पुत्रो वा यदि वा सुहृत्।
प्राणच्छेदकरा राज्ञा हन्तव्या भूतिमिच्छता ॥ १७८ ॥

अपि च।

धर्मार्थकामतत्त्वज्ञो नैकान्तकरुणो भवेत्।
न हि हस्तस्थमप्यर्थं क्षमावान् रक्षितुं क्षमः ॥ १७९ ॥

किञ्च।

क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम्।
अपराधिषु सत्त्वेषु नृपाणां सैव दूषणम् ॥ १८० ॥

अपरञ्च।

राज्यलोभाद् अहङ्कारादिच्छतः स्वामिनः पदम्।
प्रायश्चित्तं हि तत्रैकं जीवोत्सर्गो न चापरम् ॥ १८१ ॥

अन्यच्च।

राजा घृणी ब्राह्मणः सर्वभक्षः स्त्री चावशा दुष्प्रकृतिः सहायः।
प्रेष्यः प्रतीपो ऽधिकृतः प्रमादी त्याज्या अमी यश्च कृतं न वेत्ति ॥ १८२ ॥

विशेषतश्च।

सत्या ऽनृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि चार्थपरा वदान्या
नित्यव्यया प्रचुररत्नधनागमा च वाराङ्गनेव नृपनीतिर् अनेकरूपा ॥ १८३ ॥

इति कपटवचनेन दमनकेन सन्तोषितः स्वां प्रकृतिम् आपन्नः पिङ्गलकः सिंहासने समुपविष्टः। दमनकः प्रहृष्टमना भूत्वा राजानमाह। विजयतां महाराजः। शुभमस्तु सर्वजगताम्। इत्युक्त्वा यथासुखमवस्थितः। विष्णुशर्मोवाच। सुहृद्भेदः श्रुतः। राजपुत्रा ऊचुः। सुखिनो वयम्। विष्णुशर्मा ऽब्रवीत्। अपरमपीदमस्तु।

सुहृद्भेदस् तावद्भवतु भवतां शत्रुनिलये
खलः कालाकृष्टः प्रलयमुपसर्पत्वहरहः।
जनो नित्यं भूयात् सकलसुखसम्पत्तिवसतिः
कथारामे रम्ये सततमिह बालो ऽपि रमताम् ॥ १८४ ॥

॥ इति हितोपदेशे सुहृद्भेदो नाम द्वितीयः कथासङ्ग्रहः ॥

## ॥ विग्रहः ॥

पुनः कथारम्भकाले राजपुत्रैरुक्तम्। आर्य राजपुत्रा वयं तद्विग्रहं श्रोतुं नः कुतूहलमस्ति। विष्णुशर्मोवाच। यदेव भवद्भ्यो रोचते तत्कथयामि। विग्रहः श्रूयतां यस्यायमाद्यः श्लोकः।

हंसैः सह मयूराणां विग्रहे तुल्यविक्रमे।
विश्वास्य वञ्चिता हंसाः काकैः स्थित्वा ऽरिमन्दिरे॥ १॥

राजपुत्रा ऊचुः। कथमेतत्। विष्णुशर्मा कथयति। अस्ति कर्पूरद्वीपे पद्मकेलिनामधेयं सरः। तत्र हिरण्यगर्भो नाम राजहंसः प्रतिवसति। स च सर्वैर्जलचरैः पक्षिभिर् मिलित्वा पक्षिराज्ये ऽभिषिक्तः।

यतः। यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव॥ २॥

अपरञ्च। प्रजां संरक्षति नृपः सा वर्धयति पार्थिवम्।
वर्धनाद्रक्षणं श्रेयस् तदभावे सदप्यसत्॥ ३॥

एकदा ऽसौ राजहंसः सुविस्तीर्णकमलपर्यङ्के सुखासीनः परिवारपरिवृतस्तिष्ठति। ततः कुतो ऽपि देशादागत्य दीर्घमुखो नाम बकः प्रणम्योपविष्टः। राजोवाच। दीर्घमुख देशान्तरादागतो ऽसि। वार्तां कथय। स ब्रूते। देव अस्ति महती वार्ता। ताम् आख्यातुकाम एव सत्वरमागतो ऽहम्। अवधीयताम्। अस्ति जम्बुद्वीपे विन्ध्यो नाम गिरिः। तत्र चित्रवर्णो नाम मयूरः पक्षिराजो निवसति। तस्यानुचरैरहं दग्धारण्यमध्ये चरन्नवलोकितः पृष्टश्च। कस्त्वं कुतः समागतो ऽसि। ततो मयोक्तम्। अहं कर्पूरद्वीपस्य राज्ञो हिरण्यगर्भस्यानुचरः। कौतुकाद् देशान्तरं द्रष्टुमागतो ऽस्मि। तच्छ्रुत्वा पक्षिभिरुक्तम्। तदनयोः कीदृशो देशो भद्रतरो राजा वा। ततो मयोक्तम्। आः किमेवमुच्यते। महदन्तरम्। यतः कर्पूरद्वीपः स्वर्गैकदेशः। राजा च द्वितीयस्वर्गपतिः। कथं वर्णयितुं शक्यते। अत्र मरुस्थले पतिता यूयं किं कुरुथ। आगच्छतास्मद्देशे गम्यताम्। ततस् तद्वचनमाकर्ण्य पक्षिणः सकोपा बभूवुः।

तथा चोक्तम्। पयःपानं भुजङ्गानां केवलं विषवर्धनम्।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥ ४ ॥

अन्यच्च। विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन।
वानरानुपदिश्याज्ञान् स्थानभ्रष्टा ययुः खगाः ॥ ५ ॥

राजोवाच। कथमेतत्। दीर्घमुखः कथयति। अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः। तत्र स्वयंनिर्मिते नीडे पक्षिणः सुखेन वर्षास्वपि निवसन्ति। अथ नीलपटलैरिव जलधरपटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव। ततो वानरांस्तरुतले ऽवस्थितान् शीतार्तान् कम्पमानानवलोक्य कृपया पक्षिभिरुक्तम्। भो भो वानराः श्रूयताम्।

अस्माभिर् निर्मिता नीडाश्चञ्चुमात्राहृतैस्तृणैः।
हस्तपादादिसंयुक्ता यूयं किमिति सीदथ ॥ ६ ॥

तच्छ्रुत्वा वानरैर् जातामर्षैरालोचितम्। अहो निर्वातनीडगर्भावस्थिताः सुखिनः पक्षिणो ऽस्मान् निन्दन्ति। तद्भवतु तावद्वृष्टेरुपशमः। अनन्तरं शान्ते पानीयवर्षे तैर्वानरैर् वृक्षमारुह्य सर्वे नीडा भग्नाः। तेषां पक्षिणामण्डानि चाधःपातितानि। अतो ऽहं ब्रवीमि। विद्वानेवोपदेष्टव्य इत्यादि। राजोवाच। तदा पक्षिभिः किमुक्तम्। दीर्घमुखः कथयति। ततः पक्षिभिः कोपादुक्तम्। केनासौ राजहंसः कृतो राजा। ततो मयोपजातकोपेनोक्तं। अयं युष्मदीयमयूरः केन राजा कृतः। तच्छ्रुत्वा ते पक्षिणो मां हन्तुमुद्यताः। ततो मयापि सुविक्रमो दर्शितः।

यतः। अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥ ७ ॥

राजा विहस्याह। आत्मनश्च परेषां च यः समीक्ष्य बलाबलम्।
अन्तरं नैव जानाति स तिरस्क्रियते ऽरिभिः ॥ ८ ॥

अन्यच्च। सुचिरं हि चरन् नित्यं क्षेत्रे शस्यम् अबुद्धिमान्।
द्वीपिचर्मपरिच्छन्नो वाग्दोषाद्गर्दभो हतः ॥ ९ ॥

बकः पृच्छति। कथमेतत्। राजा कथयति। अस्ति हस्तिनापुरे विलासो नाम रजकः। तस्य गर्दभो ऽतिभारवाहनाद् दुर्बलो मुमूर्षुरभवत्। ततस्तेन रजकेनासौ व्याघ्रचर्मणा प्रच्छाद्यारण्यसमीपे शस्यक्षेत्रे मोचितः। ततो दूरादवलोक्य व्याघ्रबुद्ध्या क्षेत्रपतयः सत्वरं पलायन्ते। अथ केनापि शस्यरक्षकेण धूसरकम्बलकृततनुत्राणेन धनुःकाण्डं सज्जीकृत्यावनतकायेन एकान्ते स्थितम्। ततस्तं च दूरे दृष्ट्वा गर्दभः जातबलो गर्द-

भीयमिति मत्वा शब्दं कुर्वाणस्तदभिमुखं धावितः। ततस्तेन शस्यरक्षकेण गर्दभो ऽयमिति ज्ञात्वा लीलयैव व्यापादितः। अतो ऽहं ब्रवीमि। सुचिरं हि चरन्नित्यमित्यादि। दीर्घमुखो ब्रूते। पश्चात्तैः पक्षिभिरुक्तम्। अरे पाप दुष्ट बक अस्माकं भूमौ चरन्नस्माकं स्वामिनमधिक्षिपसि। तन्न क्षन्तव्यमिदानीम्। इत्युक्त्वा सर्वे मां चञ्चुभिर्हत्वा सकोपा ऊचुः। पश्य रे मूर्ख स हंसस्तव राजा सर्वथा मृदुस्तस्य राज्याधिकारो नास्ति। यतः। एकान्ततो मृदुः करतलगतमप्यर्थं रक्षितुमक्षमः। कथं स पृथिवीं शास्ति। राज्यं वा तस्य किम्। त्वं च कूपमण्डूकस्तेन तदाश्रयणमुपदिशसि।

शृणु। सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
यदि दैवात्फलं नास्ति छाया केन निवार्यते ॥ १० ॥

अन्यच्च। हीनसेवा न कर्तव्या कर्तव्यो महदाश्रयः।
पयो ऽपि शौण्डिकीहस्ते वारुणीत्यभिधीयते ॥ ११ ॥
अजा सिंहप्रसादेन वने चरति निर्भयम्।
राममासाद्य लङ्कायां लेभे राज्यं विभीषणः ॥ १२ ॥

अन्यच्च। महानप्यल्पतां याति निर्गुणे गुणविस्तरः।
आधाराधेयभावेन गजेन्द्र इव दर्पणे ॥ १३ ॥

विशेषतश्च। व्यपदेशे ऽपि सिद्धिः स्यादतिशक्ते नराधिपे।
शशिनो व्यपदेशेन वसन्ति शशकाः सुखम् ॥ १४ ॥

मयोक्तम्। कथमेतत्। पक्षिणः कथयन्ति। कदाचिद् वर्षास्वपि वृष्टेरभावात्तृषार्तो गजयूथो यूथपतिमाह। नाथ को ऽप्युपायो ऽस्माकं जीवनाय नास्ति। क्षुद्रजन्तूनां निमज्जनस्थानं वयं च निमज्जनाभावादन्धा इव क्व यामः किं वा कुर्मः। ततो हस्तिराजो नातिदूरं गत्वा निर्मलं ह्रदं दर्शितवान्। अनन्तरं तत्तीरवासिनः शशका गजयूथपादाहतिभिश्चूर्णिताः। अनन्तरं शिलीमुखो नाम शशकश्चिन्तयामास। अनेन गजयूथेन पिपासाकुलितेन प्रत्यहमत्रागन्तव्यम् अतो विनष्टमस्मत्कुलम्। ततो विजयो नाम वृद्धशशको ऽवदत्। मा विषीदत प्रतीकारो मया कर्तव्यः। इति प्रतिज्ञाय चलितः। पथि गच्छता च तेनालोचितम्। कथं मया गजयूथपनिकटे गत्वा वक्तव्यम्।

यतः। स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः।
पालयन्नपि भूपालः प्रहसन्नपि दुर्जनः ॥ १५ ॥

अतो ऽहं पर्वतशिखरमारुह्य यूथनाथमभिवादयामि। तथा ऽनुष्ठिते सति यूथनाथ

उवाच। कस्त्वं कुतः समायातः। स ब्रूते। दूतो ऽहं भगवता चन्द्रेण प्रेषितः। यूथपतिराह। कार्यमुच्यताम्। विजयो वदति।

उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा।
सदैवावध्यभावेन यथार्थस्य हि वाचकः॥ १६॥

तदहं तदाज्ञया ब्रवीमि। शृणु। यदेते शशकाश्चन्द्रसरोरक्षकास्त्वया निःसारितास् तन्न युक्तं कृतम्। यतो रक्षकास्ते शशका मदीयाः। अत एव मे शशाङ्क इति प्रसिद्धिः। एवमुक्तवति दूते यूथपतिर्भयादिदमाह। देव इदमज्ञानतः कृतम्। पुनर्न गमिष्यामि। दूत उवाच। तदत्र सरसि भगवन्तं चन्द्रमसं कोपात् प्रकम्पमानं प्रणम्य प्रसाद्य च गच्छ। ततस्तेन रात्रौ नीत्वा तत्र जले चञ्चलं चन्द्रप्रतिबिम्बं दर्शयित्वा स यूथपतिः प्रणामं कारितः। देव अनेनाज्ञानेनापराधः कृतः तत्क्षम्यतामित्युक्त्वा तेन शशकेन स यूथपतिः प्रस्थापितः। अतो ऽहं ब्रवीमि। व्यपदेशे ऽपि सिद्धिः स्यादित्यादि। ततो मयोक्तम्। स एवास्मत्प्रभुर् महाप्रतापो ऽतिसमर्थस् त्रैलोक्यस्यापि प्रभुत्वं तत्र युज्यते किम्पुना राज्यमिति। तदाहं तैः पक्षिभिर्दुष्ट कथमस्मद्भूमौ चरसि इत्यभिधाय चित्रवर्णस्य राज्ञः समीपं नीतः। ततो राज्ञः पुरतो मां प्रदर्श्य तैः प्रणम्योक्तम्। देव अवधीयताम्। एष दुष्टबको ऽस्मद्देशे चरन्नपि देवपादान् अधिक्षिपति। राजाह। को ऽयं कुतः समायातः। त ऊचुः। हिरण्यगर्भनाम्नो राजहंसस्यानुचरः कर्पूरद्वीपादागतः। अथाहं गृध्रेण मन्त्रिणा पृष्टः। कस्तत्र मुख्यो मन्त्रीति। मयोक्तम्। सर्वशास्त्रार्थपारगः सर्वज्ञो नाम चक्रवाकः। गृध्रो ब्रूते। युज्यते स्वदेशजो ऽसौ।

यतः। स्वदेशजं कुलाचारे विशुद्धमुपधाशुचिम्।
शास्त्रज्ञम् अव्यसनिनं व्यभिचारविवर्जितम्॥ १७॥
अधीतव्यवहाराङ्गं ख्यातं मौलं विपश्चितम्।
अर्थस्योत्पादकं सम्यग्विदध्यान्मन्त्रिणं नृपः॥ १८॥

अत्रान्तरे शुकेन धर्माधिकारिणोक्तं। देव कर्पूरद्वीपादयो लघुद्वीपा जम्बुद्वीपान्तर्गता एव तत्रापि देवपादानामाधिपत्यम्। ततो राज्ञाप्युक्तम्। एवमेव।

यतः। राजा मत्तः शिशुश्चैव प्रमदा धनगर्वितः।
अप्राप्यमपि वाञ्छन्ति किम्पुनर्लभ्यमेव यत्॥ १९॥

ततो मयोक्तम्। यदि वचसैव तत्रापि श्रीमद्देवपादानाम् आधिपत्यं सिध्यति तदा जम्बुद्वीपे ऽप्यस्मत्प्रभोर्हिरण्यगर्भस्य स्वाम्यमस्ति। शुक उवाच। कथमत्र निर्णयः। मयोक्तम्। सङ्ग्राम एव। राज्ञा विहस्योक्तम्। स्वस्वामिनं गत्वा सज्जीकुरु। तदा मयोक्तम्।

स्वदूतो ऽपि प्रस्थाप्यताम्। राजाह। कः प्रयातु दौत्येन यत एवम्भूतो दूतः कार्यः।

भक्तो गुणी शुचिर्दक्षः प्रगल्भो ऽव्यसनी क्षमी।
ब्राह्मणः परमर्मज्ञो दूतः स्यात् प्रतिभानवान्॥ २०॥

गृध्रो वदति। सन्त्येवम्भूता बहवः। किन्तु ब्राह्मण एव दूतः कर्तव्यः।

यतः। प्रसादः कुरुते पत्युः सम्पत्तिं नाभिजातता।
कालिमा कालकूटस्य नापैतीश्वरसङ्गमात्॥ २१॥

राजाह। ततः शुक एव व्रजतु। शुक त्वमेवानेन सह तत्र गत्वा अस्मदभिलषितं ब्रूहि। शुको ऽवदत्। यथाज्ञापयति देवः। किन्त्वयं दुर्जनो बकः। दुर्जनेन सह न व्रजामि।

तथा ह्युक्तम्। खलः करोति दुर्वृत्तं नूनं फलति साधुषु।
दशाननो हरेत् सीतां बन्धनं स्यान्महोदधेः॥ २२॥

अपरञ्च। न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित्।
काकसङ्गाद्धतो हंसस्तिष्ठन् गच्छंश्च वर्तकः॥ २३॥

राजोवाच। कथमेतत्। शुकः कथयति। अस्त्युज्जयिनीवर्त्मनि प्रान्तरे महान् पिप्पलवृक्षः। तत्र हंसकाकौ निवसतः। कदाचिद्ग्रीष्मसमये परिश्रान्तः कश्चित् पथिकस्तत्र तरुतले धनुःकाण्डं निधाय सुप्तः। ततः क्षणान्तरे तन्मुखाद् वृक्षच्छाया ऽपगता। अनन्तरं सूर्यतेजसा तन्मुखं व्याप्तमवलोक्य कृपया पुण्यात्मना पापरहितेन तत्पिप्पलवृक्षस्थितेन हंसराजेन पक्षौ प्रसार्य पुनस्तन्मुखे छाया कृता। ततो निर्भरं निद्रासुखिना पथि भ्रमणाकुलेन परिश्रान्तेन पान्थेन मुखव्यादानं कृतम्। अनन्तरं स्वभावदौर्जन्येन परसुखमसहिष्णुः स काकस्तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः। ततो यावदसावुत्थाय ऊर्ध्वं निरीक्षते तावत् तेनावलोकितो हंसः। अथानेन तन्मुखपुरीषत्यागो विहित इति उपजातक्रोधेन काण्डेन हत्वा व्यापादितः। अतो ऽहं ब्रवीमि। न स्थातव्यमित्यादि।

यतः। त्यज दुर्जनसंसर्गं भज साधुसमागमम्।
कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम्॥ २४॥

देव वर्तकवार्तामपि कथयामि। एकः काको वृक्षशाखायां स्वपिति। वर्तकस्याधस्ताद् भूमौ निवसति। एकदा सर्वे पक्षिणो भगवतो गरुडस्य यात्राप्रसङ्गेन समुद्रतीरं प्रचलिताः। तत्र काकेन सह वर्तकश्चलितः। अथ पथि गच्छतो गोपालस्य मस्तकावस्थितभाण्डाद् दधि वारं वारं तेन काकेन खाद्यते। ततो यावदसौ दधिभाण्डं भूमौ

निधाय ऊर्ध्वमवलोकते तावत् काकवर्तकौ दृष्टौ । ततस्तेन खेटितः काकः पलायितः । वर्तको मन्दगतिस्तेन प्राप्तो व्यापादितः । अतो ऽहं ब्रवीमि । न गन्तव्यमित्यादि । ततो मयोक्तम् । भ्रातः शुक किमेवं ब्रवीषि । मां प्रति यथा श्रीमद्देवपादास्तथा भवानपि । शुको ब्रूते । अस्त्वेवम् । किन्तु ।

दुर्जनैरुच्यमानानि सस्मितानि प्रियाण्यपि ।
अकालकुसुमानीव भयं सञ्जनयन्ति मे ॥ २५ ॥

दुर्जनत्वं च तव वाग्व्यापारादेव प्रत्यक्षीकृतम् । यतः । अनयोर्भूपालयोर्विग्रहे भवद्वचनमेव निदानम् ।

पश्य । प्रत्यक्षे ऽपि कृते दोषे मूर्खः सान्त्वेन तुष्यति ।
रथकारो निजां भार्यां सजारां शिरसा ऽकरोत् ॥ २६ ॥

राजोवाच । कथमेतत् । शुकः कथयति । अस्ति श्रीनगरे मन्दमतिर्नाम रथकारः । स च स्वभार्यां बन्धकीं जानाति । किन्तु जारेण समम् एकस्थाने स्वचक्षुषा न पश्यति । ततो द्रष्टुकामो ऽसौ रथकारो ऽहमद्य ग्रामान्तरं गमिष्यामीत्युक्त्वा प्रचलितः । स कियद्दूरं गत्वा निभृतं पुनरागत्य स्वगृहे खट्वातले पतित्वा स्थितः । अथ मम भर्ता ग्रामान्तरं गत इत्युपजातविश्वासया तद्वध्वा जारः सन्ध्याकाल एवाहूतः । पश्चात् तेन जारेण समं तस्यां खट्वायां निर्भरं क्रीडन्ती रथकारपत्नी खट्वातलस्थितस्य भर्तुः किञ्चिदङ्गस्पर्शात् स्वामिनं मायाविनमिति विज्ञाय विषण्णा ऽभवत् । ततो जारेणोक्तम् । किमिति मया सहाद्य निर्भरं न रमसे । विस्मितेव प्रतिभासि । अथ तयोक्तम् । अनभिज्ञस्त्वं । यो ऽसौ मे प्राणेश्वरः सो ऽद्य ग्रामान्तरं गतः । तेन विना सकलजनपूर्णो ऽप्ययं ग्रामो मां प्रत्यरण्यवत् प्रतिभाति । किं भावि तत्र परस्थाने किं खादितवान् कथं वा प्रसुप्त इत्यस्मद्धृदयं विदीर्यते । जारेणोक्तम् । तत् किमेवंविधा स्नेहभूमिः स ते भर्ता कलहकारः । बन्धकी ब्रूते । रे बर्बर किं ब्रवीषि । शृणु ।

परुषेणापि चोक्ता या दृष्टा वा क्रुद्धचक्षुषा ।
सुप्रसन्नमुखी भर्तुः सा नारी धर्मभागिनी ॥ २७ ॥

अपरञ्च । नगरस्थो वनस्थो वा पापो वा यदि वा शुचिः ।
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥ २८ ॥

अन्यच्च । भर्ता हि परमं नार्या भूषणं भूषणैर्विना ।
एषा विरहिता तेन शोभना ऽपि न शोभते ॥ २९ ॥

त्वं जारो पापमतिर् मनोलौल्यात् पुष्पताम्बूलचन्दनसदृशः कदाचित् सेव्यसे । स

च मे स्वामी पाणिग्रहकरो दूरस्थो ऽपि मां विक्रेतुं देवेभ्यो ब्राह्मणेभ्यो वा दातुं समर्थः। किं बहुना। तस्मिन् जीवति जीवामि तन्मरणे चानुमरणं करिष्यामि इति प्रतिज्ञा वर्तते।

यतः। तिस्रः कोट्यो ऽर्धकोटी च यानि लोमानि मानवे।
तावद्वर्षं वसेत् स्वर्गे भर्तारं या ऽनुगच्छति ॥ ३० ॥

अन्यच्च। व्यालग्राही यथा व्यालं बिलादुद्धरते बलात्।
तद्वद्भर्तारम् आदाय तेनैव सह मोदते ॥ ३१ ॥

अपरञ्च। चितौ परिष्वज्य विचेतनं पतिं प्रिया हि या मुञ्चति देहमात्मनः।
हत्वा ऽपि पापं शतलक्षमप्यसौ पतिं गृहीत्वा सुरलोकमाप्नुयात् ॥ ३२ ॥

यतः। यस्मै दद्यात् पिता त्वेनां भ्राता चानुमते पितुः।
तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत् ॥ ३३ ॥

एतत्सर्वं श्रुत्वा स रथकारो धन्यो ऽहं यस्यैतादृशी भार्या प्रियवादिनी स्वामिवत्सला इति मनसि निधाय तां खट्वां स्त्रीपुरुषसहितां मूर्ध्नि धृत्वा स मन्दमतिः सानन्दं ननर्त। अतो ऽहं ब्रवीमि। प्रत्यक्षे ऽपि कृते दोष इत्यादि। ततो ऽहं तेन राज्ञा यथाव्यवहारं सम्पूज्य प्रस्थापितः। शुको ऽपि मम पश्चादागच्छन्नास्ते। एतत्सर्वं ज्ञात्वा यथाकार्यमनुसन्धीयताम्। महामन्त्री चक्रवाको विहस्याह। देव बकेन तावद् देशान्तरं गत्वा यथाशक्ति राजकार्यमनुष्ठितम्। किन्तु स्वभाव एव मूर्खाणाम्।

यतः। शतं दद्यान्न विवदेदिति विज्ञस्य सम्मतम्।
विना हेतुमपि द्वन्द्वमिति मूर्खस्य लक्षणम् ॥ ३४ ॥

राजाह। अलम् अनेनातीतोपालम्भेन। प्रस्तुतम् अनुसन्धीयताम्। चक्रवाको ब्रूते। देव विजने ब्रवीमि।

यतः। वर्णाकारप्रतिध्वानैर् नेत्रवक्त्रविकारतः।
अभ्यूहन्ति मनो धीरास् तस्माद्रहसि मन्त्रयेत् ॥ ३५ ॥

ततो राजा मन्त्री च स्थितौ तत्र। अन्ये ऽन्यत्र गताः। चक्रवाको ब्रूते। देव अहमेवं जानामि कस्याप्यस्मन्नियोगिनः प्रेरणया बकेनेदमनुष्ठितम्।

यतः। वैद्यानामातुरः श्रेयान् व्यसनी यो नियोगिनाम्।
विदुषां जीवनं मूर्खः सद्वन्द्वो नृपतेर्जनः ॥ ३६ ॥

राजाब्रवीत्। भवतु कारणमत्र पश्चान्निरूपणीयं सम्प्रति यत्कर्तव्यं तद् ब्रूहि। चक्रवाको ब्रूते। देव प्रणिधिस्तावत् तत्र यातु ततस्तदनुष्ठानं बलाबलं च जानीमः।

तथा हि । भवेत् स्वपरराष्ट्राणां कार्याकार्यावलोकने ।
चारश्चक्षुर् महीभर्तुर् यस्य नास्त्यन्ध एव सः ॥ ३७ ॥

स च द्वितीयं विश्वासपात्रं गृहीत्वा यातु । तेनासौ स्वयं तत्रावस्थाय द्वितीयं तत्रत्यमन्त्रकार्यं सुनिभृतं निश्चित्य निगद्य प्रस्थापयतु ।

तथा चोक्तम् । तीर्थाश्रमसुरस्थाने शास्त्रविज्ञानहेतुना ।
तपस्विव्यञ्जनोपेतैः स्वचरैः सह संवदेत् ॥ ३८ ॥

गूढचारश्च यो जले स्थले चरति । ततो ऽसावेव बको नियुज्यताम् । एतादृश एव कश्चिद्बको द्वितीयत्वेन प्रयातु तद्गृहलोकश्च राजद्वारे तिष्ठतु । किन्तु देव एतदपि सुगुप्तम् अनुष्ठातव्यम् ।

यतः । षट्कर्णो भिद्यते मन्त्रस्तथा प्राप्तश्च वार्तया ।
इत्यात्मना द्वितीयेन मन्त्रः कार्यो महीभृता ॥ ३९ ॥

अपरञ्च । मन्त्रभेदेन ये दोषा भवन्ति पृथिवीपतेः ।
न शक्यास्ते समाधातुं इति नीतिविदां मतम् ॥ ४० ॥

राजा विमृश्योवाच । प्राप्तस्तावन्मया प्रणिधिः । मन्त्री ब्रूते । देव सङ्ग्रामे जयो ऽपि प्राप्तः । अत्रान्तरे प्रतीहारः प्रविश्य प्रणम्योवाच । देव अवधीयताम् । जम्बुद्वीपादागतो द्वारि शुकस्तिष्ठति । राजा चक्रवाकमुखमालोकते । चक्रवाकेणोक्तम् । कृतावासे गत्वा तावद्भवतु । पश्चादानीय द्रष्टव्यः । यथाज्ञापयति देव इत्यभिधाय प्रतीहारः शुकं गृहीत्वा गतः । राजाह । विग्रहस्तावदुपस्थितः । चक्रवाको ब्रूते । देव तथापि सहसा विग्रहो न विधिः

सचिवः किं स मन्त्री वा य आदावेव भूपतिम् ।
युद्धोद्योगं स्वभूत्यागं निर्दिशत्यविचारितम् ॥ ४१ ॥

अपरञ्च । विजेतुं प्रयतेतारीन् न युद्धेन कदाचन ।
अनित्यो विजयो यस्माद् दृश्यते युध्यमानयोः ॥ ४२ ॥

अन्यच्च । साम्ना दानेन भेदेन समस्तैरथवा पृथक् ।
साधितुं प्रयतेतारीन् न युद्धेन कदाचन ॥ ४३ ॥

यतः । सर्व एव जनः शूरो यो नासादितविग्रहः ।
अदृष्टपरसामर्थ्यः सदर्पः को भवेन्न हि ॥ ४४ ॥

किञ्च । न तथोत्थाप्यते ग्रावा प्राणिना दारुणा यथा ।
अल्पोपायान्महासिद्धिर् एतन्मन्त्रफलं महत् ॥ ४५ ॥

किन्तु विग्रहमुपस्थितं विलोक्य व्यवह्रियताम्।

यतः। यथा कालकृतोद्योगात् कृषिः फलवती भवेत्।
तद्वन्नीतिरियं देव चिरात् फलति न क्षणात्॥ ४६॥

अपरञ्च। महतो दूरे भीरुत्वम् आसन्ने शूरता गुणः।
विपत्तौ हि महाँल्लोके धीरत्वम् अधिगच्छति॥ ४७॥

अन्यच्च। प्रत्यूहः सर्वसिद्धीनामुत्तापः प्रथमः किल।
अतिशीतलमप्यम्भः किं भिनत्ति न भूतलम्॥ ४८॥

विशेषतश्च। देव महाबलो ऽसौ राजा चित्रवर्णो मयूरराजः।

यतः। बलिना सह योद्धव्यमिति नास्ति निदर्शनम्।
न युद्धं हस्तिना सार्धं नराणां पादयुद्धवत्॥ ४९॥

अन्यच्च। स मूर्खः कालमप्राप्य यो ऽपकर्तरि वर्तते।
कलिर्बलवता सार्धं कीटपक्षोद्गमो यथा॥ ५०॥

किञ्च। कौर्मं सङ्कोचमास्थाय प्रहारमपि मर्षयेत्।
प्राप्तकालस्तु नीतिज्ञ उत्तिष्ठेत् क्रूरसर्पवत्॥ ५१॥

शृणु देव। महत्यल्पे ऽप्युपायज्ञः सममेव भवेत् क्षमः।
समुन्मूलयितुं वृक्षान् तृणानीव नदीरयः॥ ५२॥

अतो दूतो ऽयं शुको ऽत्राश्वास्य तावद्ध्रियतां यावद्दुर्गं सज्जीक्रियते।

यतः। एकः शतं योधयति प्राकारस्थो धनुर्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते॥ ५३॥

किञ्च। अदुर्गविषयः कस्य नारेः परिभवास्पदम्।
अदुर्गो ऽनाश्रयो राजा पोतच्युतमनुष्यवत्॥ ५४॥
दुर्गं कुर्यान्महाखातम् उच्चप्राकारसंयुतम्।
सयन्त्रजलशैलं हि सरिन्मरुवनाश्रयम्॥ ५५॥
विस्तीर्णता ऽतिवैषम्यं रसधान्येध्मसङ्ग्रहः।
प्रवेशश्चापसारश्च सप्तैता दुर्गसम्पदः॥ ५६॥

राजाह। दुर्गानुसन्धाने को नियुज्यताम्। चक्रवाको ब्रूते।
यो यत्र कुशलः कार्ये तं तत्र विनियोजयेत्।
कर्मस्वदृष्टकर्मा यो शास्त्रज्ञो ऽपि विमुह्यति॥ ५७॥

तदाहूयतां सारसः सेनापतिः। तथानुष्ठिते सति समागतं सारसम् आलोक्य राजो-

वाच। सारस त्वं सत्वरं दुर्गमनुसन्धेहि। सारसः प्रणम्योवाच। देव दुर्गं तावदिदमेव चिरात् सुविहितमास्ते । महत् सरः। किन्त्वेतन्मध्यद्वीपे भक्ष्यवस्तूनां सङ्ग्रहः क्रियताम्।

यतः। धान्यानां सङ्ग्रहो राजन्नुत्तमः सर्वसङ्ग्रहात्।
निक्षिप्तं हि मुखे रत्नं न कुर्यात् प्राणधारणम्॥ ५८ ॥

किञ्च। ख्यातः सर्वरसानां हि लवणो रस उत्तमः।
विना तेन हि राजेन्द्र व्यञ्जनं गोमयायते ॥ ५९ ॥

राजाह। सेनापते सारस सत्वरं गत्वा सर्वमनुष्ठीयताम्। ततः पुनरपि प्रविश्य प्रतीहारो ब्रूते। देव सिंहलद्वीपाद् आगतो मेघवर्णो नाम वायसराजो द्वारि वर्तते। स च परिवारवृतः प्रणमति। देवपादान् द्रष्टुमिच्छति। राजाह। काकः प्राज्ञः बहुदृश्वा च। तद्भवति सङ्ग्राह्य इत्यनुबुध्यते। चक्रवाको ब्रूते। देव अस्त्वेवम्। किन्त्वस्मद्विपक्षः काकः स्थलचरः। तेनास्माकं विपक्षपक्षे नियुक्तः। कथं सङ्ग्राह्यो भवति।

तथा चोक्तम्। आत्मपक्षपरित्यागात् परपक्षेषु यो रतः।
स परैर् हन्यते मूढो नीलवर्णशृगालवत्॥ ६० ॥

राजोवाच। कथमेतत्। मन्त्री कथयति। अस्ति शृगालः कश्चित् स्वेच्छया नगरोपान्ते भ्रमन् नीलसन्धानकुण्डे निपतितः। पश्चादुत्थातुम् असमर्थः प्रातरात्मानं मृतवत् सन्दर्श्य स्थितः। अथ नीलीकुण्डस्वामिना ऽसावुत्थाप्य दूरे नीत्वा परित्यक्तः। ततो ऽसौ वनं गत्वात्मानं नीलवर्णम् अवलोक्याचिन्तयत्। अहमिदानीम् उत्तमवर्णस्तदात्मनः किमुत्कर्षं न साधयामि। इत्यालोच्य शृगालान् आहूय तेनोक्तम्। रे रे वनचराः। अहं भगवत्या वनदेवतया स्वहस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः। पश्यन्तु मम वर्णम्। तदद्यारभ्य अस्मदाज्ञया ऽस्मिन्नरण्ये व्यवहारः कार्यः। अथ शृगालाश् तं विशिष्टवर्णम् अवलोक्य साष्टाङ्गपातं प्रणम्योचुः। यथाज्ञापयति देवः। इत्यनेन क्रमेण सर्वेष्वरण्यवासिष्वाधिपत्यं तस्य बभूव। ततस्तेन स्वज्ञातिभिर् आवृतेनाधिक्यं साधितम्। ततस्तेन सिंहव्याघ्रादीन् उत्तमपरिजनान् प्राप्य सदसि शृगालान् अवलोक्य लज्जमानेनावज्ञाय दूरीकृताः स्वज्ञातयः। ततो विषण्णान् शृगालान् अवलोक्य वृद्धशृगालेन प्रतिज्ञातम्। मा विषीदत चेदनेनानीतिज्ञेन वयं मर्मज्ञाः परिभूताः। तद्यथा ऽयं नश्यति तन्मया विधेयम्। यतो ऽमी व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालम् अज्ञात्वा राजानम् अमुं मन्यन्ते। तद्यथायं परिचीयते

तत्कुरुत । तत्रैवम् अनुष्ठेयं यथा वदामि । सर्वे सन्ध्यासमये तत्सन्निधाने महारावमेकदा करिष्यथ । ततस्तं शब्दमाकर्ण्य स्वभावात् तेनापि शब्दः कर्तव्यः ।

यतः । यः स्वभावो हि यस्य स्यात् तस्यासौ दुरतिक्रमः ।
श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम् ॥ ६१ ॥

ततः शब्दादभिज्ञाय व्याघ्रेण हन्तव्यः । तथा ऽनुष्ठिते सति तद् वृत्तम् ।

तथा चोक्तम् । छिद्रं मर्म च वीर्यं च सर्वं वेत्ति निजो रिपुः ।
दहत्यन्तर्गतश्चैव शुष्कवृक्षमिवानलः ॥ ६२ ॥

अतो ऽहं ब्रवीमि । आत्मपक्षपरित्यागादित्यादि । राजाह । यद्यप्येवं तथापि दृश्यतां तावत् । अयं दूरादागतः । तत्सङ्ग्रहे विचारः कर्तव्यः । चक्रवाको ब्रूते । देव प्रणिधिः प्रहितो दुर्गं च सज्जीकृतम् । अतः शुको ऽप्यालोक्य प्रत्युत्तरं दत्त्वा प्रस्थाप्यताम् ।

किन्तु । नन्दं जघान चाणक्यस् तीक्ष्णदूतप्रयोगतः ।
तद्दूरान्तरितं दूतं पश्येद् वीरसमन्वितः ॥ ६३ ॥

तत् सभां कृत्वाहूतः शुकः काको ऽपि । शुकः किञ्चिदुन्नतशिरा दत्तासनमुपविश्य ब्रूते । भो भो हिरण्यगर्भ सकलभूपालमौलिमाणिक्यकिरणावलीरञ्जितचरणकमलो महाराजाधिराजश्चित्रवर्णो मयूरराजस्त्वां समाज्ञापयति । यदि जीवितेन श्रिया वा प्रयोजनमस्ति तदा सत्वरम् आगत्यास्मच्चरणौ प्रणम नो चेदवस्थातुं स्थानान्तरं परिचिन्तय । एतच्छ्रुत्वा राजा सकोपमाह । आः सभायाम् अस्माकं पुरतो न को ऽपि विद्यते य एनं गलहस्तयति । तत उत्थाय मेघवर्णो ब्रूते । देव समाज्ञापय हन्मि चैनं दुष्टशुकम् । मन्त्री ब्रूते । भद्र मैवम् । शृणु तावत् ।

न सा सभा यत्र न सन्ति वृद्धा वृद्धा न ते ये न वदन्ति धर्मम् ।
धर्मः स नो यत्र न सत्यमस्ति सत्यं न तद् यद् भयम् अभ्युपैति ॥ ६४ ॥

यतो धर्मो ह्येषः । दूतो म्लेच्छो ऽप्यवध्यः स्याद्राजा दूतमुखो यतः ।
उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ॥ ६५ ॥

अन्यच्च । स्वापकर्षं परोत्कर्षं दूतोक्तैर् मन्यते तु कः ।
सदैवावध्यभावेन दूतः सर्वं हि जल्पति ॥ ६६ ॥

ततो राजा काकश्च प्रकृतिमापन्नः । शुकश्च तूर्णमुत्थाय चलितः । पश्चाच्चक्रवाकेणानीय प्रबोध्य कनकालङ्कारादिकं दत्त्वा शुकः सम्प्रेषितः । स्वदेशं ययौ । ततो विन्ध्याचलं गत्वा स्वराजानं चित्रवर्णं प्रणतवान् । तमालोक्य चित्रवर्णो राजाह । शुक का वार्ता । कीदृशो ऽसौ देशः । शुको ब्रूते । देव सङ्क्षेपादियं वार्ता । सम्प्रति युद्धो-

योगः क्रियताम्। देशश्चासौ कर्पूरद्वीपः स्वर्गैकदेशः कथं वर्णयितुं शक्यते। राजा सर्वान् शिष्टानाहूय मन्त्रयितुमुपविष्टः। आह च। तात सम्प्रति यत्कर्तव्यं तद्ब्रूत। विग्रहः पुनरवश्यं कर्तव्यः।

तथा चोक्तम्। असन्तुष्टा द्विजा नष्टाः सन्तुष्टाः पार्थिवाः सदा।
सलज्जा गणिका नष्टा निर्लज्जा च कुलाङ्गना ॥ ६७ ॥

दूरदर्शी नाम गृध्रो मन्त्री ब्रूते। देव व्यसनितया विग्रहो न विधिः।

यतः। मित्रामात्यसहायाश्च यदा स्युर्दृढभक्तयः।
शत्रूणां विपरीताश्च कर्तव्यो विग्रहस्तदा ॥ ६८ ॥

अन्यच्च। भूमिर्मित्रं हिरण्यं च विग्रहस्य फलं त्रयम्।
यदैतन्निश्चितं भावि कर्तव्यो विग्रहस्तदा ॥ ६९ ॥

राजाह। मम बलानि तावदवलोकयतु मन्त्री। तदैतेषामुपयोगो ज्ञायताम्। तदाहूयतां मौहूर्तिकः शुभलग्नं यात्रार्थं विदधातु। मन्त्री वदति। देव तथापि सहसा यात्राकरणमयुक्तम्।

यतः। विशन्ति सहसा मूढा ये ऽविचार्य द्विषद्बलम्।
खड्गधारापरिष्वङ्गं लभन्ते ते सुनिश्चितम् ॥ ७० ॥

राजाह। मन्त्रिन् ममोत्साहभङ्गं सर्वथा मा कृथाः। विजिगीषुर्यथा परभूमिम् आक्रमति तथोपदिश। गृध्रो ऽब्रवीत्। देव तत्कथयामि। किन्तु तदनुष्ठितमेव फलप्रदम्।

तथा चोक्तम्। किं मन्त्रेणाननुष्ठाने शास्त्रवत् पृथिवीपतेः।
न ह्यौषधपरिज्ञानाद् व्याधेः शान्तिः क्वचिद्भवेत् ॥ ७१ ॥

राजादेशश्चानतिक्रमणीय इति यथाश्रुतं निवेदयामि। शृणु देव।

नद्यद्रिवनदुर्गेषु यत्र यत्र भयं नृप।
तत्र तत्र च सेनानीर् यायाद् व्यूहीकृतैर्बलैः ॥ ७२ ॥
बलाध्यक्षः पुरो यायात् प्रवीरपुरुषान्वितः।
मध्ये कलत्रं स्वामी च कोषः फल्गु च यद् बलम् ॥ ७३ ॥
पार्श्वयोर् उभयोरश्वा अश्वानां पार्श्वतो रथाः।
रथानां पार्श्वतो नागा नागानां च पदातयः ॥ ७४ ॥
पश्चात् सेनापतिर्यायात् खिन्नान् आश्वासयन् शनैः।
मन्त्रिभिः सुभटैर्युक्तः प्रतिगृह्य बलं नृपः ॥ ७५ ॥

समेयाद्विषमं नागैर्जलाढ्यं समहीधरम् ।
समम् अश्वैर्जलं नौभिः सर्वत्रैव पदातिभिः ॥ ७६ ॥
हस्तिनां गमनं प्रोक्तं प्रशस्तं जलदागमे ।
तदन्यत्र तुरङ्गाणां पत्तीनां सर्वदैव हि ॥ ७७ ॥
शैलेषु दुर्गमार्गेषु विधेयं नृपरक्षणम् ।
स्वयोधै रक्षितस्यापि शयनं योगनिद्रया ॥ ७८ ॥
नाशयेत् कर्षयेच्छत्रुं दुर्गकण्टककर्दमैः ।
परदेशप्रवेशे च कुर्यादाटविकान् पुरः ॥ ७९ ॥
यत्र राजा तत्र कोषो विना कोषं न राजता ।
सुभटेभ्यस्ततो दद्यात् को हि दातुर् न युध्यते ॥ ८० ॥
यतः । न नरस्य नरो दासः किन्तु वित्तस्य भूपते ।
गौरवं लाघवं चापि धनाधननिबन्धनम् ॥ ८१ ॥
अभेदेन च युध्येयू रक्षेयुश्च परस्परम् ।
फल्गुसैन्यं च यत्किञ्चिन्मध्ये व्यूहस्य कारयेत् ॥ ८२ ॥
पदातींश्च महीपालः पुरोऽनीकस्य योजयेत् ।
उपरुध्यारिम् आसीत राष्ट्रं चास्योपपीडयेत् ॥ ८३ ॥
स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैर् असिचर्मायुधैः स्थले ॥ ८४ ॥
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम् ।
भिन्द्याच्चैव तडागानि प्राकारान् परिखास्तथा ॥ ८५ ॥
बलेषु प्रमुखो हस्ती न तथाऽन्यो महीपतेः ।
निजैरवयवैरेव मातङ्गोऽष्टायुधः स्मृतः ॥ ८६ ॥
बलम् अश्वश्च सैन्यानां प्राकारो जङ्गमो मतः ।
तस्माद् अश्वाधिको राजा विजयी स्थलविग्रहे ॥ ८७ ॥
तथा ह्युक्तम् । युध्यमाना हयारूढा देवानामपि दुर्जयाः ।
अपि दूरस्थितास् तेषां वैरिणो हस्तवर्तिनः ॥ ८८ ॥
प्रथमं युद्धकारित्वं समस्तबलपालनम् ।
दिङ्मार्गाणां विशोधित्वं पत्तिकर्म प्रचक्षते ॥ ८९ ॥
स्वभावशूरम् अस्त्रज्ञम् अविरक्तं जितश्रमम् ।

प्रसिद्धक्षत्रियप्रायं बलं श्रेष्ठतमं विदुः ॥ ९० ॥
यथा प्रभुकृतान्मानाद् युध्यन्ते भुवि मानवाः ।
न तथा बहुभिर् दत्तैर् द्रविणैरपि भूपते ॥ ९१ ॥
वरम् अल्पबलं सारं न बह्वी मुण्डमण्डली ।
कुर्याद् असारभङ्गो हि सारभङ्गमपि स्फुटम् ॥ ९२ ॥
अप्रसादो ऽनधिष्ठानं देयांशहरणं च यत् ।
कालयापो ऽप्रतीकार एतद् वैराग्यकारणम् ॥ ९३ ॥
अपीडयन् बलं शत्रून् जिगीषुरभिषेणयेत् ।
सुखसाध्यं द्विषां सैन्यं दीर्घप्रयाणपीडितम् ॥ ९४ ॥
दायादाद् अपरो मन्त्रो नास्ति भेदकरो द्विषाम् ।
तस्मादुत्थापयेद् यत्नाद् दायादं तस्य विद्विषः ॥ ९५ ॥
सन्धाय युवराजेन यदि वा मुख्यमन्त्रिणा ।
अन्तःप्रकोपनं कुर्याद् अभियोक्ता स्थिरात्मनः ॥ ९६ ॥
क्रूरं मित्रं रणे चापि भङ्गं दत्त्वा ऽभिघातयेत् ।
अथवा गोग्रहाकृष्ट्या तन्मुख्याश्रितबन्धनात् ॥ ९७ ॥
स्वराष्ट्रं वासयेद् राजा परदेशापहारणात् ।
अथवा दानमानाभ्यां वासितं धनदं हि तत् ॥ ९८ ॥

राजाह । आः किं बहुनोदितेन ।

आत्मोदयः परज्यानिर् द्वयं नीतिर् इतीयती ।
तदूरीकृत्य कृतिभिर् वाचस्पत्यं प्रतीयते ॥ ९९ ॥

मन्त्रिणा विहस्योक्तम् । सर्वं सत्यमेतत् । किन्तु ।

अन्यदुच्छृङ्खलं सत्त्वम् अन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥ १०० ॥

तत उत्थाय राजा मौहूर्तिकावेदितलग्ने प्रस्थितः । अथ प्रणिधिप्रहितश्चरो हिरण्यगर्भसमीपम् आगत्य प्रणम्योवाच । देव समागतप्रायो राजा चित्रवर्णः सम्प्रति मलयपर्वतोपत्यकायां समावासितो वर्तते । दुर्गशोधनं प्रतिक्षणम् अनुसन्धातव्यम् । यतो ऽसौ गृध्रो महामन्त्री । किञ्च केनचित् सह तस्य विश्वासकथाप्रसङ्गेन एतदिङ्गितम् अवगतं मया यदनेन प्रागेव को ऽप्यस्मद्दुर्गे नियुक्तः । चक्रवाको ब्रूते । देव काक एवासौ सम्भविष्यति । राजाह । न कदाचिदेतत् । यद्येवं तदा कथं तेन शुकस्याभि-

भवाय समुद्योगः कृतः । अपरञ्च शुकस्यागमनात् प्रभृति तस्य विग्रहोत्साहः । स च चिराद् अत्रास्ते । मन्त्री वदति । तथाप्यागन्तुकः शङ्कनीयः । राजाह । आगन्तुका अपि प्रत्युपकारकारिणो दृश्यन्ते । शृणु ।

परो ऽपि हितवान् बन्धुर् बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर् हितमारण्यम् औषधम् ॥ १०१ ॥

अपरञ्च । आसीद् वीरवरो नाम शूद्रकस्य महीपतेः ।
सेवकः स्वल्पकालेन स ददौ सुतमात्मनः ॥ १०२ ॥

चक्रवाकः पृच्छति । कथमेतत् । राजा कथयति । अहं पुरा शूद्रकस्य राज्ञः क्रीडासरसि कर्पूरकेलिनाम्नो राजहंसस्य पुत्र्या कर्पूरमञ्जर्या सहानुरागवान् बभूव । तत्र वीरवरो नाम राजपुत्रः कुतश्चिद्देशाद् आगत्य राजद्वारि प्रतीहारमुपागम्य उवाच । अहं वर्तनार्थी राजपुत्रो मां राजदर्शनं कारय । ततस्तेनासौ राजदर्शनं कारितो ब्रूते । देव यदि मया सेवकेन प्रयोजनमस्ति तदास्मद्वर्तनं क्रियताम् । शूद्रक उवाच । किं ते वर्तनम् । वीरवरेणोक्तम् । प्रत्यहं सुवर्णशतचतुष्टयम् । राजाह । का ते सामग्री । वीरवरो ब्रूते । द्वौ बाहू तृतीयश्च खड्गः । राजा क्षणं विमृश्य सविस्मयमाह । भद्र नैतच्छक्यम् । तच्छ्रुत्वा वीरवरो प्रणम्य चलितः । अथ मन्त्रिभिरुक्तम् । देव दिनचतुष्टयस्य वर्तनं दत्त्वा ज्ञायतामस्य स्वरूपं किमुपयुक्तो ऽयं एतावद्वर्तनं गृह्णात्यनुपयुक्तो वेति । ततो मन्त्रिवचनाद् आहूय ताम्बूलं दत्त्वा तद्वर्तनं दत्तवान् ।

यतः । ताम्बूलं कटुतिक्तमिश्रमधुरं क्षारं कषायान्वितं
वातघ्नं कफनाशनं कृमिहरं दौर्गन्ध्यदोषापहम् ।
वक्त्रस्याभरणं मलापहरणं कामाग्निसन्दीपनं
ताम्बूलस्य सखे त्रयोदश गुणाः स्वर्गे ऽप्यमी दुर्लभाः ॥ १०३ ॥

वर्तनविनियोगश्च राज्ञा सुनिभृतं निरूपितः । तदर्धं वीरवरेण देवेभ्यो ब्राह्मणेभ्यो दत्तम् । स्थितस्यार्धं दुःखितेभ्यः । तदवशिष्टं भोज्यव्ययविलासव्ययेन । एतत्सर्वं नित्यकृत्यं कृत्वा राजद्वारम् अहर्निशं खड्गपाणिः सेवते । यदा च राजा स्वयं समादिशति तदा स्वगृहमपि याति । अथ कृष्णचतुर्दश्यां रात्रौ सकरुणं क्रन्दनध्वनिं स राजा शुश्राव । तच्छ्रुत्वा राजा ब्रूते । कः को ऽत्र द्वारि तिष्ठति । तदा तेनोक्तम् । देव अहं वीरवरः । राजोवाच । क्रन्दनानुसरणं क्रियताम् । वीरवरो ऽपि यथा आज्ञापयति देव इत्युक्त्वा चलितः । ततो राज्ञा चिन्तितम् । अयमेकाकी राजपुत्रो मया सूचीभेद्ये तमसि प्रहितः । तदनुचितम् । अहमपि गत्वा निरूपयामि किमेतदिति । ततो

राजा ऽपि खड्गमादाय अनुसरणक्रमेण नगरद्वारात् बहिर्निर्जगाम । ततो गत्वा वीरवरेण रुदती रूपयौवनसम्पन्ना सर्वालङ्कारभूषिता काचित् स्त्री दृष्टा पृष्टा च । का त्वं किमर्थं रोदिषीति । स्त्रियोक्तम् । अहमेतस्य शूद्रकस्य राज्ञो लक्ष्मीश्चिरादेतस्य भुजच्छायायां महता सुखेन विश्रान्ता । तृतीयदिवसे राजा पञ्चत्वं यास्यति । अहम् अनाथा भविष्यामि । इदानीं न स्थास्यामि इति रोदिमि । वीरवरो ब्रूते । कथं पुनरिहावासो भगवत्या भवति । लक्ष्मीरुवाच । यदि त्वमात्मनः पुत्रस्य शक्तिधरस्य द्वात्रिंशन्महापुरुषलक्षणोपेतस्य मस्तकं स्वहस्तेन छित्त्वा भगवत्याः सर्वमङ्गलाया उपहारीकरोषि तदा राजा शतायुर्भविष्यति अहं सुखं निवसामि । इत्युक्त्वा ऽदृश्या ऽभवत् । ततो हर्षयुक्तेन वीरवरेण स्वगृहं गत्वा निद्रालसा वधूः प्रबोधिता पुत्रस्य । तौ निद्रां परित्यज्योपविष्टौ । वीरवरस् तत्सर्वं लक्ष्मीवचनमुक्तवान् । तच्छ्रुत्वा शक्तिधरः सानन्दं ब्रूते । धन्यो ऽहं एवम्भूतः स्वामिराज्यरक्षार्थं यस्योपयोगः । तात को ऽधुना विलम्बहेतुः । यतः । कदापि तावदेवंविधे कर्मणि एतस्य देहस्य विनियोगः श्लाघ्यः ।

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ १०४ ॥

शक्तिधरस्य माता ब्रूते । स्वामिन् यद्ययं निजप्रभुहिताय न कर्तव्यं तदा केनान्यकर्मणा महावर्तनस्य निस्तारो भविष्यति । इत्यालोच्य सर्वे सर्वमङ्गलायतनं गताः । तत्र सर्वमङ्गलां सम्पूज्य वीरवरो ब्रूते । देवि प्रसीद विजयतां शूद्रको महाराजः । गृह्यताम् अयमुपहारः । इत्युक्त्वा पुत्रस्य शिरश्चिच्छेद । ततो वीरवरश्चिन्तयामास । गृहीतराजवर्तनस्य तावन्निस्तारः कृतः । अधुना निष्पुत्रजीवनं विडम्बनमित्यालोच्यात्मनः शिरश्चिच्छेद । ततस् तत्पत्न्या ऽपि स्वामिनः पुत्रस्य च शोकार्तया तदनुष्ठितम् । एतत्सर्वं श्रुत्वा दृष्ट्वा च राजा साश्चर्यं चिन्तयामास ।

जायन्ते च म्रियन्ते च मद्विधाः क्षुद्रजन्तवः ।
अनेन सदृशो लोके न भूतो न भविष्यति ॥ १०५ ॥

तदेतत्परित्यक्तेन राज्येनापि किं प्रयोजनम् । इत्युक्त्वा शूद्रकेण स्वशिरश्छेत्तुमुल्लासितः खड्गः । अथ सकरुणया भगवत्या सर्वमङ्गलया प्रत्यक्षभूतया राजा करे धृतः । पुत्र अलं साहसेन । इदानीं ते राज्यभङ्गो नास्ति । राजा साष्टाङ्गं प्रणम्योवाच । देवि न मे राज्येन जीवितेन श्रिया वा प्रयोजनमस्ति । यद्यहं अनुकम्पनीयस्तदा ममायुःशेषेण अमात्यविशेषो ऽयं मम सेवकः सदारपुत्रो राजपुत्रो जीवतु । अन्यथा ऽहं यथा प्राप्तां गतिं यास्यामि । भगवत्युवाच । अनेन ते सत्योत्कर्षेण भृत्यवात्सल्येन

च सर्वथा सन्तुष्टाऽस्मि। गच्छ विजयी भव। अयमपि सपरिवारो राजपुत्रो जीवतु। ततो वीरवरः सपुत्रदारः प्राप्तजीवनः स्वगृहं गतः। राजा तैरलक्षितः प्रासादपृष्ठं गत्वा तथैव सुप्तः। अथ वीरवरो द्वारस्थः पुनर्भूपालेन पृष्टः सन्नुवाच। देव सा रुदती स्त्री माम् अवलोक्यादृश्या ऽभवत्। न का ऽप्यन्या वार्ता विद्यते। तद्वचनम् आकर्ण्य सन्तुष्टो राजा साश्चर्यं चिन्तयामास। कथमयं श्लाघ्यतां महासत्त्वः।

यतः। प्रियं ब्रूयाद् अकृपणः शूरः स्याद् अविकत्थनः।
दाता सत्पात्रवर्षी स्यात् प्रगल्भः स्यादनिष्ठुरः॥ १०६॥

एतन्महापुरुषलक्षणम्। एतस्मिन् सर्वमस्ति। ततः स राजा प्रातः शिष्टसभां कृत्वा सर्वरात्रिवृत्तान्तं प्रस्तुत्य प्रसादं तस्य कर्णाटराज्यं ददौ। तत् किमागन्तुरेव विरुद्धः। तत्रापि उत्तमाधममध्यमाः सम्भवन्ति। चक्रवाको ब्रूते।

यो ऽकार्यं कार्यवच्छास्ति स किं मन्त्री नृपेच्छया।
वरं स्वामिमनोदुःखं तन्नाशो न त्वकार्यतः॥ १०७॥
वैद्यो गुरुश्च मन्त्री च यस्य राज्ञः प्रियंवदाः।
शरीरधर्मकोषेभ्यः क्षिप्रं स परिहीयते॥ १०८॥

शृणु देव। पुण्याल्लब्धं यदेकेन तन्ममापि भविष्यति।
हत्वा भिक्षुं यतो मोहान्निध्यर्थी नापितो हतः॥ १०९॥

राजा पृच्छति। कथमेतत्। मन्त्री कथयति। अस्त्ययोध्यायां पुरि चूडामणिर्नाम क्षत्रियः। तेन धनार्थिना कायक्लेशेन भगवांश्चन्द्रार्धचूडामणिश् चिरमाराधितः। ततः क्षीणपापो ऽसौ स्वप्ने दर्शनं दत्त्वा भगवतः शम्भोः प्रसादाद्यक्षेश्वरेण समादिष्टः। भो क्षत्रियराज त्वमद्य प्रातरेव क्षौरं कारयित्वा लगुडहस्तः सन् स्वगृहद्वारि निभृतं स्थास्यसि। ततो यमेवागतं भिक्षुकं प्राङ्गणे पश्यसि तं निर्दयं लगुडप्रहारेण हनिष्यसि। ततो ऽसौ भिक्षुकः तत्क्षणात् सुवर्णपूर्णकलशो भविष्यति। तेन त्वया यावज्जीवं स्वपरिवारेण सुखिना भवितव्यम्। तदनन्तरं तदनुष्ठिते सति तद् वृत्तम्। ततः क्षौरकरणायानीतेन नापितेन तत्सर्वम् आलोक्य चिन्तितम्। अहो निधिप्राप्तेर् अयमुपायः। तदहमप्येवं किं न करोमि। ततः प्रभृति स नापितः प्रतिदिनं तथाविधो लगुडहस्तः भिक्षुकागमनं प्रतीक्षते। एकदा तेन तथाविधो भिक्षुकः प्राप्तो लगुडेन हत्वा व्यापादितः। तेनापराधेन सो ऽपि नापितो राजपुरुषैस् ताडितः पञ्चत्वं गतः। अतो ऽहं ब्रवीमि। पुण्याल्लब्धं यदेकेन इत्यादि। राजाह।

पुरावृत्तकथोद्गारैः कथं निर्णीयते परः ।
किं स्यान्निष्कारणो बन्धुः किंवा विश्वासघातकः ॥ ११० ॥

यातु यातु । प्रस्तुतमनुष्ठीयताम् । मलयाधित्यकायां समावासितो वर्तते चित्रवर्णो नाम राजा । तदधुना किं विधेयम् । मन्त्री वदति । देव समागतप्रणिधिमुखान्मया श्रुतम् । यन्महामन्त्रिणो गृध्रस्योपदेशे चित्रवर्णेनानादरः कृतः । अतो मूढो ऽसौ सुखेन जेतुं शक्यः ।

तथा चोक्तम् । लुब्धः क्रूरो ऽवशो ऽसत्यः प्रमादी भीरुर् अस्थिरः ।
मूढो योधावमन्ता च सुखच्छेद्यो रिपुः स्मृतः ॥ १११ ॥

ततो ऽसौ यावद् अस्मद्दुर्गावरोधं न विदधाति तावन्नद्यद्रिवनवर्त्मसु तद्बलानि हन्तुं सारसादयः सेनापतयो नियुज्यन्तां ।

तथा चोक्तम् । दीर्घवर्त्मपरिश्रान्तं नद्यद्रिवनसङ्कुलम् ।
घोराग्निभयसन्त्रस्तं क्षुत्पिपासाहितक्लमम् ॥ ११२ ॥
प्रमत्तं भोजनव्यग्रं व्याधिदुर्भिक्षपीडितम् ।
असंस्थितम् अभूयिष्ठं वृष्टिवातसमाकुलम् ॥ ११३ ॥
पङ्कपांशुजलाच्छन्नं सुव्यस्तं दस्युविद्रुतम् ।
एवम्भूतं महीपालः परसैन्यं विघातयेत् ॥ ११४ ॥

अन्यच्च । अवस्कन्दभयाद् राजा प्रजागरकृतश्रमम् ।
दिवासुप्तं सदा हन्यान्निद्राव्याकुलसैनिकम् ॥ ११५ ॥

अतस् तस्य प्रमादिनो बलं गत्वा यथावकाशं सारसादयो दिवानिशं च निघ्नन्तु । तथानुष्ठिते सैनिकाश् चित्रवर्णस्य बहवः सेनापतयश्च निहताः । ततश्चित्रवर्णो विषण्णः स्वमन्त्रिणं दूरदर्शिनमाह । तात किमिति त्वयास्मदुपेक्षा क्रियते किं वा क्वाप्यस्माकम् अविनयो ऽस्ति ।

तथा चोक्तम् । न राज्यं प्राप्तमित्येवं वर्तितव्यम् असाम्प्रतम् ।
श्रियं ह्यविनयो हन्ति जरा रूपमिवोत्तमम् ॥ ११६ ॥

अन्यच्च । दक्षः श्रियम् अधिगच्छति पथ्याशी कल्यतां सुखम् अरोगी ।
उद्योगी विद्यान्तं धर्मार्थयशांसि च विनीतः ॥ ११७ ॥

गृध्रो ऽवदत् । देव श्रूयताम् ।
अविद्वानपि भूपालो विद्यावृद्धोपसेवया ।
परां श्रियम् अवाप्नोति जलासन्नतरुर्यथा ॥ ११८ ॥

अन्यच्च । पानं स्त्री मृगया द्यूतम् अर्थदूषणमेव च ।
वाग्दण्डयोश्च पारुष्यं व्यसनानि महीभुजाम् ॥ ११९ ॥

किञ्च । न साहसैकान्तरसानुवर्तिना न वाप्युपायोपहतान्तरात्मना ।
विभूतयः शक्यम् अवाप्तुमूर्जिता नये च शौर्ये च वसन्ति सम्पदः ॥ १२० ॥

त्वया स्वबलोत्साहम् अवलोक्य साहसैकरसिकेन मयोपन्यस्तेष्वपि मन्त्रेष्वनवधानं वाक्पारुष्यं च कृतम् । अतो दुर्नीतेः फलमिदम् अनुभूयते भवता ।

तथा चोक्तम् । दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः
सन्तापयन्ति कम् अपथ्यभुजं न रोगाः ।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः
कं स्त्रीकृता न विषयाः परितापयन्ति ॥ १२१ ॥

मुदं विषादः शरदं हिमागमस् तमो विवस्वान् सुकृतं कृतघ्नता ।
प्रियोपपत्तिः शुचम् आपदं नयः श्रियं समृद्धामपि हन्ति दुर्णयः ॥१२२॥

ततो मयाप्यालोचितम् । हा कष्टं एष मयूरराजः प्रज्ञाहीनो नो चेत् कथं नीतिशास्त्रकथाकौमुदीं वागुल्काभिस् तिमिरयति । यतः ।

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ १२३ ॥

तेनाहमपि तूष्णीं स्थितः । अथ राजा बद्धाञ्जलिः स्वकीयम् अपराधमवगम्य सविनयमाह । तात अस्त्वयं ममापराधः । इदानीं यथा ऽहम् अवशिष्टबलसहितः प्रत्यावृत्य विन्ध्याचलं गच्छामि तथा सत्वरमुपदिश । गृध्रः स्वगतं चिन्तयति । कर्तव्यो ऽत्र प्रतीकारः ।

यतः । देवतासु गुरौ गोषु राजसु ब्राह्मणेषु च ।
नियन्तव्यः सदा कोपो बालवृद्धातुरेषु च ॥ १२४ ॥

ब्रूते च विहस्य । देव मा भैषीः समाश्वसिहि । शृणु देव ।

मन्त्रिणां भिन्नसन्धाने भिषजां सन्निपातके ।
कर्मणि व्यज्यते प्रज्ञा सुस्थे को वा न पण्डितः ॥ १२५ ॥

अपरञ्च । अल्पारम्भे ऽप्यल्पधियः कामं व्यग्रा भवन्ति च ।
महारम्भाः कृतधियस् तिष्ठन्ति च निराकुलाः ॥ १२६ ॥

देव ततस्तव प्रतापादेव दुर्गं भङ्क्त्वा कीर्तिप्रतापबलसहितं त्वाम् अचिरेणैव कालेन विन्ध्याद्रिं नयामि । राजाह । कथम् अधुना स्वल्पबलेन तत्सम्पद्यते । गृध्रो वदति । देव सर्वं

भविष्यति । यतः । विजिगीषोर् अदीर्घसूत्रता विजयसिद्धेर् अवश्यं भावः । तदद्य दुर्गद्वारावरोधो विधीयताम् । अथ प्रणिधिना बकेनागत्य हिरण्यगर्भस्य कथितम् । देव स्वल्पबल एवायं राजा चित्रवर्णो गृध्रस्य वचनोपष्टम्भादागत्य दुर्गद्वारावरोधनं करिष्यति । राजहंसो ब्रूते । भो सर्वज्ञ किमधुना विधेयम् । चक्रवाको वक्ति । न भेतव्यं स्वकीयबले सारासारविचारः क्रियताम् । तज्ज्ञात्वा सुवर्णवस्त्रादिकं यथार्हं प्रसादप्रदानं च क्रियताम् ।

तथा चोक्तम् । यः काकिनीमप्यपथप्रपन्नां समुद्धरेन्निष्कसहस्रतुल्याम् ।
कालेषु कोटिष्वपि मुक्तहस्तस् तं राजसिंहं न जहाति लक्ष्मीः ॥१२७॥

अन्यच्च । क्रतौ विवाहे व्यसने रिपुक्षये यशस्करे कर्मणि मित्रसङ्ग्रहे ।
प्रियासु नारीष्वधनेषु बन्धुषु ह्यतिव्ययो नास्ति नराधिपाष्टसु ॥ १२८ ॥

यतः । मूर्खः स्वल्पव्ययत्रासात् सर्वनाशं करोति हि ।
कः सुधीः सन्त्यजेद् भाण्डं शुल्कस्यैवातिसाध्वसात् ॥ १२९ ॥

राजाह । कथमिह समये ऽतिव्ययो युज्यते । उक्तं च । आपदर्थे धनं रक्षेत् । मन्त्री ब्रूते । श्रीमतां कुत आपदः । राजाह । कदाचिच्चलते लक्ष्मीः । पुनर्मन्त्री ब्रूते । देव सञ्चितार्थो विनश्यति । तद्देव कार्पण्यं परित्यज्य स्वसुभटाः दानमानाभ्यां पुरस्क्रियन्ताम् ।
तथाचोक्तम् ।

परस्परज्ञाः संहृष्टाः त्यक्तप्राणाः सुनिश्चिताः ।
कुलीनाः पूजिताः सम्यग्विजयन्ते द्विषां बलम् ॥ १३० ॥

अपरञ्च । सुभटाः शीलसम्पन्नाः संहताः कृतनिश्चयाः ।
अपि पञ्चशतं शूरा मृद्नन्ति रिपुवाहिनीम् ॥ १३१ ॥

किञ्च । शिष्टैरप्यविशेषज्ञ उग्रश्च कृतनाशकः ।
स्त्रिया ऽपि त्यज्यते नान्यैः किम्पुनः कृपणो नरः ॥ १३२ ॥

यतः । सत्यं शौर्यं तथा त्यागो नृपस्यैते त्रयो गुणाः ।
एतैस्त्यक्तो महीपालः प्राप्नोति खलु वाच्यताम् ॥ १३३ ॥

ईदृशि प्रस्तावे अमात्यास् तावदेव पुरस्कर्तव्याः । तथा चोक्तम् ।

यो येन प्रतिबद्धः स्यात् सह तेनोदयी व्ययी ।
सुविश्वस्तो नियोक्तव्यः प्राणेषु च धनेषु च ॥ १३४ ॥

यतः । धूर्तः स्त्री वा शिशुर्यस्य मन्त्रिणः स्युर्महीपतेः ।
अनीतिपवनक्षिप्तः कार्याब्धौ स निमज्जति ॥ १३५ ॥

पश्य देव । हर्षक्रोधौ यतौ यस्य कोषः स्वल्पव्ययेन च ।
नित्यं भृत्यानवेक्षा च तस्य स्याद्धनदा धरा ॥ १२६ ॥
येषां राज्ञा सह स्याताम् उच्चयापचयौ ध्रुवम् ।
अमात्यान् नीतिमान् राजा नावमन्येत् कदाचन ॥ १२७ ॥

यतः । महीभुजो मदान्धस्य मज्जतः कार्यसागरे ।
स्खलतो हि करालम्बः सुश्लिष्टैरेव दीयते ॥ १२८ ॥

अथागत्य प्रणम्य मेघवर्णो ब्रूते । देव दृष्टिप्रसादं कुरु । एष युद्धार्थी विपक्षो मयूरो दुर्गद्वारि वर्तते । तद्यदि देवपादानामादेशो भवति तदाहं बहिर् निःसृत्य स्वविक्रमं दर्शयामि । तेन देवप्रसादस्यानृण्यम् उपगच्छामि । चक्रवाको ब्रूते । मैवम् । यदि बहिर्निःसृत्य योद्धव्यं तदा दुर्गाश्रयणमेव निष्प्रयोजनम् ।

तथा हि पश्य । विषमो ऽपि यथा नक्रः सलिलान्निःसृतो ऽवशः ।
वनात् तु प्रच्युतः सत्यं सिंहो ऽपि स्याच्छृगालवत् ॥ १२९ ॥

मन्त्री वदति । देव स्वयं गत्वा युद्धं दृश्यताम् ।

यतः । पुरस्कृत्य बलं राजा योधयेद् अवलोकयन् ।
स्वामिना ऽधिष्ठितः श्वा ऽपि किं न सिंहायते ध्रुवम् ॥ १४० ॥

अनन्तरं ते सर्वे दुर्गद्वारं गत्वा महाहवं कृतवन्तः । परेद्युश्चित्रवर्णो नाम राजा गृध्रमुवाच । तात स्वप्रतिज्ञातम् अधुना विधीयताम् । गृध्रो ब्रूते । शृणु तावत् ।

अकालसहम् अत्यल्पं मूर्खव्यसनिनायकम् ।
अगुप्तं भीरुयोधं च दुर्गव्यसनमुच्यते ॥ १४१ ॥

तत्तावदत्र नास्ति । उपजापश्चिरारोधो ऽवस्कन्दस् तीव्रपौरुषम् ।
दुर्गस्य लङ्घनोपायाश्चत्वारः कथिता इमे ॥ १४२ ॥

अत्र च यथाशक्ति क्रियते यत्नः । चित्रवर्णः कथयत्येवमेव । तत अनुदिते भास्करे प्रातःकाले चतुर्ष्वपि द्वारेषु युद्धे प्रवृत्ते दुर्गाभ्यन्तरे गृहे गृहे काकैरेकदा अग्निर् निक्षिप्तः । ततो गृहीतं गृहीतं दुर्गमिति कोलाहलं श्रुत्वा अनेकगृहेषु च पावकं प्रदीप्तं प्रत्यक्षेणावलोक्य राजहंसस्य बहवः सैनिकास्तथान्ये दुर्गनिवासिनः सत्वरं ह्रदं प्रविष्टाः ।

यतः । सुमन्त्रितं सुविक्रान्तं सुयुद्धं सुपलायितम् ।
प्राप्तकाले यथाशक्ति कुर्यान्न तु विचारयेत् ॥ १४३ ॥

राजहंसः सुखिस्वभावान्मन्दगतिः । सारसद्वितीयस्य चित्रवर्णस्य सेनापतिना कुक्कु-

टेनागत्य वेष्टितः । हिरण्यगर्भो राजाह । सेनापते सारस ममानुरोधाद् आत्मानं न व्यापादयिष्यसि । अधुना ऽहं गन्तुमसमर्थः । त्वं गन्तुमधुना ऽपि समर्थः । तद्गत्वा जलं प्रविश । गत्वा च मत्पुत्रं चूडामणिनामानं सर्वज्ञस्य सम्मत्या राजानं करिष्यसि । सारसो ब्रूते । देव न वक्तव्यम् एवंदुःसहं वचः । यावत् चन्द्रार्कौ विद्येते तावद्विजयतां देवः । अहं देवदुर्गाधिकारी तन्मम मांसासृग्विलिप्तेन द्वारवर्त्मना तावत् प्रविशतु शत्रुः ।

अपरञ्च देव । क्षमी दाता गुणग्राही स्वामी भाग्येन लभ्यते ।

राजाह । अस्त्येवं किन्तु । शुचिर्दक्षो ऽनुरक्तश्च भृत्यः खलु सुदुर्लभः ॥ १४४ ॥

सारसो ब्रूते । शृणु देव ।

यदि समरम् अपास्य नास्ति मृत्योर् भयमिति युक्तमितो ऽन्यतः प्रयातुम् ।
अथ मरणम् अवश्यमेव जन्तोः किमिति मुधा मलिनं यशः क्रियेत ॥ १४५ ॥

अन्यच्च । भवे ऽस्मिन् पवनोद्भ्रान्तवीचिविभ्रमभङ्गुरे ।
जायते पुण्ययोगेन परार्थे जीवितव्ययः ॥ १४६ ॥

त्वं देव सर्वदा स्वामी रक्षणीयः ।

यतः । प्रकृतिः स्वामिना त्यक्ता समृद्धा ऽपि न जीवति ।
अपि धन्वन्तरिर् वैद्यः किं करोति गतायुषि ॥ १४७ ॥

अपरञ्च । नरेशे जीवलोको ऽयं निमीलति निमीलति ।
उदेत्युदीयमाने च रवाविव सरोरुहम् ॥ १४८ ॥

अपि च । स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोषो बलं सुहृत् ।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयो ऽपि च ॥ १४९ ॥

अत्रापि प्रधानाङ्गं राजा । अथ कुक्कुटेनागत्य राजहंसस्य शरीरे खरतरनखाघातः कृतः । ततः सत्वरमुपसृत्य सारसेन स्वदेहान्तरितो राजा । अनन्तरं कुक्कुटेन नखमुखप्रहारैर् जर्जरीकृतेन सारसेन स्वाङ्गेनाच्छाद्य राजा जले प्रक्षिप्तः । कुक्कुटो ऽपि सेनापतिना सारसेन बहुभिश्चञ्चुप्रहारपक्षाहतिभिर् जर्जरीकृत्य व्यापादितः । पश्चात् सारसो ऽपि बहुभिः पक्षिभिः सम्भूय व्यापादितः । अथ चित्रवर्णो दुर्गं प्रविश्य दुर्गावस्थितं द्रव्यं ग्राहयित्वा वन्दिभिर् जयशब्देनानन्दितः जगाम । राजपुत्रैरुक्तम् । तस्मिन् राजहंसबले पुण्यवान् सारस एव । येन स्वदेहदानेन स्वामी रक्षितः ।

यतः । जनयन्ति सुतान् गावः सर्वानेव गवाकृतीन् ।
विषाणोल्लिखितस्कन्धं कश्चिदेव गवाम्पतिम् ॥ १५० ॥

विष्णुशर्मणोक्तम्। स तावत् सत्त्वक्रीतान् अक्षयलोकान् विद्याधरीपरिजनो ऽनुभवतु महासत्त्वः। तथा चोक्तम्।

आहवेषु च ये शूराः स्वाम्यर्थं त्यक्तजीविताः।
भर्तृभक्ताः कृतज्ञाश्च ते नराः स्वर्गगामिनः॥ १५१॥
यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः।
अक्षयान् लभते लोकान् यदि क्लैब्यं न गच्छति॥ १५२॥

विग्रहः श्रुतो भवद्भिः। राजपुत्रैरुक्तम्। श्रुत्वा सुखिनो भूता वयम्। विष्णुशर्मा ऽब्रवीत्। अपरमप्येवमस्तु।

विग्रहः करितुरङ्गपत्तिभिर्नो कदापि भवतां महीभृताम्।
नीतिमन्त्रपवनैः समाहताः संश्रयन्तु गिरिगह्वरं द्विषः॥ १५३॥

॥ इति हितोपदेशे विग्रहो नाम तृतीयः कथासङ्ग्रहः॥

## ॥ सन्धिः ॥

पुनः कथारम्भकाले राजपुत्रैरुक्तम्। आर्य विग्रहः श्रुतोऽस्माभिः। सन्धिर् अधुनाभिधीयताम्। विष्णुशर्मणोक्तम्। श्रूयताम्। सन्धिमपि कथयामि यस्यायमाद्यश्लोकः।

वृत्ते महति सङ्ग्रामे राज्ञोर्निहतसेनयोः।
स्थेयाभ्यां गृध्रचक्राभ्यां वाचा सन्धिः कृतः क्षणात्॥ १॥

राजपुत्रा ऊचुः। कथमेतत्। विष्णुशर्मा कथयति। ततस्तेन राजहंसेनोक्तम्। केनास्मद्दुर्गे निक्षिप्तोऽग्निः किं पारक्येण अथवाऽस्मद्दुर्गवासिना केनचिद्विपक्षप्रयुक्तेन। चक्रवाको वदति। देव भवतो निष्कारणबन्धुरसौ मेघवर्णः सपरिवारो नात्रावलोक्यते। तन्मन्ये तस्य विचेष्टितमिदम्। राजा क्षणं विचिन्त्याह। अस्ति तावदेवं मम दुर्भाग्यम् एतत्।

तथा चोक्तम्। अपराधः स दैवस्य न पुनर्मन्त्रिणाम् अयम्।
कार्यं सुघटितं यत्नात् दैवयोगाद्विनश्यति॥ २॥

मन्त्री ब्रूते। उक्तमेवैतत्। विषमां हि दशां प्राप्य दैवं गर्हयते नरः।
आत्मनः कर्मदोषं च नैव जानात्यपण्डितः॥ ३॥

अपरञ्च। सुहृदां हितकामानां यो वाक्यं नाभिनन्दति।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति॥ ४॥

राजाह। कथमेतत्। मन्त्री कथयति। अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः। तत्र चिरात् सङ्कटविकटनामानौ हंसौ निवसतः। तयोर्मित्रं कम्बुग्रीवनामा कूर्मः प्रतिवसति। अथैकदा धीवरैरागत्य तत्रोक्तम्। यदत्रास्माभिरद्योषित्वा प्रातर् मत्स्यकूर्मादयो व्यापादयितव्याः। तदाकर्ण्य कूर्मो हंसावाह। सुहृदौ श्रुतोऽयं धीवरालापः। तदधुना किं मया कर्तव्यम्। हंसावाहतुः। ज्ञायतां तावत् पश्चाद्यदुचितं तत्सुचिन्त्य कर्तव्यम्। कूर्मो ब्रूते। मैवम्। यतो दृष्टव्यतिकरोऽहमत्र।

तथा चोक्तम्। अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति॥ ५॥

तावाहतुः । कथमेतत् । कूर्मः कथयति । पुरा एतस्मिन्नेव सरसि एवंविधेष्वेव धीवरेषूपस्थितेषु मत्स्यत्रयेणालोचितम् । तत्रानागतविधाता नामैको मत्स्यः । तेनोक्तम् । अद्यैवाहं जलाशयान्तरं गच्छामीत्युक्त्वा यथाकथञ्चिद्दुःखेन स ह्रदान्तरं गतः । अपरेण प्रत्युत्पन्नमतिनाम्ना मत्स्येनाभिहितम् । भविष्यदर्थे प्रमाणाभावात् कुत्र मया गन्तव्यम् । तदुत्पन्ने कार्ये यथाकार्यमनुष्ठेयम् ।

तथा चोक्तम् । उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान् ।
वणिजो भार्यया जारः प्रत्यक्षे निह्नुतो यथा ॥ ६ ॥

यद्भविष्यः पृच्छति । कथमेतत् । प्रत्युत्पन्नमतिः कथयति । अस्ति विक्रमपुरे समुद्रदत्तो नाम वणिक् । तस्य रत्नप्रभा नाम वधूः केनापि स्वसेवकेन समं सर्वदा रमते ।

यतः । न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥ ७ ॥

अथैकदा सा रत्नप्रभा तस्य सेवकस्य मुखे चुम्बनं ददती समुद्रदत्तेनालोकिता । ततः सा बन्धकी भर्तुः समीपं द्रुतमागत्य उवाच । नाथ एतस्य सेवकस्य महती निर्वृतिः । यतो युष्मदर्थं नीयमानं कर्पूरमश्नाति । कर्पूरगन्धः प्रत्यक्षो ऽस्य मुखे मया घ्रातः

तथा चोक्तम् । आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥ ८ ॥

तदाकर्ण्य सेवकेनाप्युपक्रुध्योक्तम् । यस्य गृहे ईदृशी भार्या तत्र सेवकेन कथं स्थातव्यम् । यत्र प्रतिक्षणं गृहिणी सेवकस्य मुखं जिघ्रति । ततो ऽसावुत्थाय चलितः । ततस् तेन साधुना प्रयत्नाद् बहुभिर् अतिप्रणयवचोभिः प्रबोध्यानीय ताम्बूलादिकं दत्त्वा सन्तोष्य धृतः । अतो ऽहं ब्रवीमि । उत्पन्नामापदमित्यादि । ततो यद्भविष्येणोक्तम् ।

यदभावि न तद् भावि भावि चेन्न तदन्यथा ।
इति चिन्ताविषघ्नो ऽयम् अगदः किं न पीयते ॥ ९ ॥

ततः प्रातर्जालेन बद्धः प्रत्युत्पन्नमतिर् मृतवदात्मानं सन्दर्श्य स्थितः । ततो जालाद् अपसारितः स्थलादुत्प्लुत्य गम्भीरं नीरं प्रविष्टः । यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः । अतो ऽहं ब्रवीमि । अनागतविधातेत्यादि । तद्यथा ऽहमन्यह्रदं प्राप्नोमि तदद्य विधीयताम् । हंसावाहतुः । जलाशयान्तरे प्राप्ते तव कुशलम् । स्थले गच्छतस्ते को विधिः । कूर्मो ब्रूते । यथा ऽहं भवद्भ्यां सहाकाशवर्त्मना यामि स उपायो विधीयताम् । हंसौ ब्रूतः । कथमुपायः सम्भवति । कच्छपो वदति । युवाभ्यां चञ्चुधृतं

काष्ठमेकं मया मुखेनावलम्बितव्यम्। अतो भवतोः पक्षबलेन मया ऽपि सुखेन गन्तव्यम्। हंसौ ब्रूतः। सम्भवत्येष उपायः। अस्त्वेवम्।

किन्तु। उपायं चिन्तयन् प्राज्ञस् त्वपायमपि चिन्तयेत्।
पश्यतो वकमूर्खस्य नकुलैर्भक्षिताः सुताः ॥ १० ॥

कूर्मः पृच्छति। कथमेतत्। हंसौ कथयतः। अस्त्युत्तरापथे गृध्रकूटो नाम पर्वतः। तत्रैव रेवातीरे न्यग्रोधपादपे वका निवसन्ति। तस्य वटस्याधस्ताद्विवरे सर्पस्तिष्ठति। स च वकानां बालापत्यानि खादति। ततः शोकार्तानां वकानां प्रलापं श्रुत्वा केनचिद् वृद्धवकेनोक्तम्। भो एवं कुरुथ यूयम्। मत्स्यान् आनीय नकुलविवरादारभ्य सर्पविवरं यावत् पङ्क्तिक्रमेण एकैकशो मत्स्यान् विकीर्य धरिष्यथ। ततस्तदाहारवर्त्मना नकुलेनागत्य द्रष्टव्यः स्वभावद्वेषाद् व्यापादयितव्यः सर्पः। तथा ऽनुष्ठिते सति तद् वृत्तम्। अथ नकुलैर्वृक्षोपरि पक्षिशावकानां रावः श्रुतः। पश्चात् तेन नकुलेन वकशावकाः खादिताः। अत आवां ब्रूवः। उपायं चिन्तयन्नित्यादि। आवाभ्यां नीयमानं त्वां दृष्ट्वा लोकैः किञ्चिद्वक्तव्यमेव। तदाकर्ण्य यदि त्वमुत्तरं ददासि तदा तव मरणं भविष्यति। तत् सर्वथा ऽत्रैव स्थीयताम्। कूर्मो वदति। तत् किमहमज्ञः। न किमपि मया वक्तव्यम्। तत एवमनुष्ठिते सति आकाशे नीयमानं तं कूर्ममालोक्य सर्वे गोरक्षकाः पश्चाद्धावन्ति वदन्ति च। अहो महद् आश्चर्यं पक्षिभ्यां कूर्मः समुह्यते। तत्र कश्चिदाह। यद्ययं कूर्मः पतति तदात्रैव पक्त्वा खादितव्यः। को ऽपि निगदति। गृहं नेतव्यः। अपरो वदति। एनं पातयित्वा अग्निमानीय दग्ध्वा अत्रैव भक्षयिष्यामि। तत्परुषवचनमाकर्ण्य क्रोधाद्विस्मृतसंस्कारो ऽवदत्। युष्माभिर्भस्म भक्षितव्यमिति वदन्नेव काष्ठात् पतितो गोरक्षकैर्व्यापादितस्य। अतो ऽहं ब्रवीमि। सुहृदां हितकामानामित्यादि। अथ प्रणिधिर् वकस् तत्रागत्योवाच। देव प्रागेव मया निवेदितम्। दुर्गशोधनं प्रतिक्षणं कर्तव्यमिति। तच्च युष्माभिर्न कृतम्। अतस्तदनवधानस्य फलमिदमनुभूतम्। देव दुर्गदाहश्चायं मेघवर्णनाम्ना वायसेन गृध्रप्रयुक्तेन कृतः। राजा निःश्वस्याह।

प्रणामादुपकाराद्वा यो विश्वसिति शत्रुषु।
स सुप्त इव वृक्षाग्रात् पतितः सन् प्रबुध्यते ॥ ११ ॥

अतः प्रणिधिरुवाच। इतो दुर्गदाहं विधाय यदागतो ऽसौ मेघवर्णस्तदा चित्रवर्णेन प्रसादितेनोक्तम्। अयं मेघवर्णो ऽत्र कर्पूरद्वीपचक्रे ऽभिषिच्यताम्।

तथा चोक्तम्। कृतकृत्यस्य भृत्यस्य कृतं नैव प्रणाशयेत्।
फलेन मनसा वाचा दृष्ट्या चैनं प्रहर्षयेत् ॥ १२ ॥

चक्रवाको ब्रूते। देव श्रुतं यत्प्रणिधिः कथयति। राजाह ततस्ततः। प्रणिधिरुवाच। ततः प्रधानमन्त्रिणा गृध्रेणोक्तम्। देव नेदमुचितम्। प्रसादान्तरं किमपि क्रियताम्।

यतः। अधिकारेण यो युक्तः कथं तस्यास्ति खण्डनम्।
नीचेषूपकृतं राजन् बालुकास्विव मुद्रितम्॥ १३॥

महतामास्पदे नीचः कदापि न कर्तव्यः।

तथा चोक्तम्। नीचः श्लाघ्यपदं प्राप्य स्वामिनं लोप्तुमिच्छति।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा॥ १४॥

चित्रवर्णः पृच्छति। कथमेतत्। गृध्रः कथयति। अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः। तेनाश्रमसन्निधाने मूषिकशावकः काकमुखात् परिभ्रष्टः प्राप्तः। पश्चाद् दयालुना तेन मुनिना नीवारकणैः संवर्धितः। तदनन्तरं मूषिकं खादितुम् अनुधावन् विडालो मुनिना दृष्टः। पश्चात् तपःप्रभावात् तेन मुनिना मूषिको बलिष्ठो विडालः कृतः। स चापि विडालः कुक्कुराद्बिभेति। ततो ऽसौ कुक्कुरः कृतः। कुक्कुरस्य व्याघ्रान्महद्भयम्। तदनन्तरं स व्याघ्रः कृतः। अथ व्याघ्रमपि तं मूषिकनिर्विशेषं पश्यति मुनिः। अतः सर्वे तत्रस्था जनास्तं व्याघ्रं दृष्ट्वा वदन्ति। अनेन मुनिना मूषिको ऽयं व्याघ्रतां नीतः। एतच्छ्रुत्वा स व्याघ्रः सव्यथो ऽचिन्तयत्। यावदनेन मुनिना जीवितव्यं तावदिदं मम स्वरूपाख्यानम् अकीर्तिकरं न पलायिष्यते। इति समालोच्य मुनिं हन्तुं समुद्यतः। मुनिस्तस्य चिकीर्षितं ज्ञात्वा पुनर्मूषिको भव इत्युक्त्वा मूषिक एव कृतः। अतो ऽहं ब्रवीमि। नीचः श्लाघ्यपदं प्राप्य इत्यादि। अपरं च देव। सुकरम् इदमिति न मन्तव्यम्।

शृणु। भक्षयित्वा बहून् मत्स्यानुत्तमाधममध्यमान्।
अतिलौल्याद्बको मूर्खो मृतः कर्कटसङ्ग्रहात्॥ १५॥

चित्रवर्णः पृच्छति। कथमेतत्। मन्त्री कथयति। अस्ति मालवविषये पद्मगर्भाभिधानं सरः। तत्रैको वृद्धबकः सामर्थ्यहीनस् तथोद्विग्नमिवात्मानं दर्शयित्वा स्थितः। स च केनचित् कुलीरेण दूरादेव पृष्टः। किमिति भवानत्राहारपरित्यागेन तिष्ठति। बकेनोक्तम्। भद्र शृणु। मत्स्या मम जीवनहेतवः। मत्स्याश्चावश्यमेव कैवर्तैर्व्यापादयितव्या इति नगरोपान्ते कैवर्तालाप आकर्णितः। तदितो वर्तनाभावाद् अस्मन्मरणमुपस्थितमिति ज्ञात्वा आहारस्यापि निरादरः कृतः। ततः सर्वैर्मत्स्यैरालोचितम्।

इहसमये तावदुपकारक एवायमुपलक्ष्यते ऽस्माकम्। तदयमेव यथाकर्तव्यं पृच्छ्यताम्।

तथा चोक्तम्। उपकर्त्रा ऽरिणा सन्धिर्न मित्रेणापकारिणा।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ १६ ॥

मत्स्या ऊचुः। भो वक अस्माकं कुत्र रक्षणोपायः। वको ब्रूते। अस्ति रक्षणहेतुर् जलाशयान्तरम्। तत्राहमेकैकशो युष्मान् नयामि। मत्स्यैरपि भयादुक्तमेवमस्तु। ततो ऽसौ दुष्टवकस्तान् मत्स्यानेकैकान् नीत्वा कस्मिंश्चिद्देशे खादित्वा पुनरागत्य वदति। ते मया जलाशयान्तरे स्थापिताः। अनन्तरं कुलीरस् तमुवाच। भो वक मामपि तत्र नय। ततो वको ऽप्यपूर्वकुलीरमांसार्थी सादरं तं नीत्वा स्थले धृतवान्। कुलीरो ऽपि मत्स्यकण्टकाकीर्णं भूतलमालोक्याचिन्तयत्। हा हतो ऽस्मि मन्दभाग्यः। भवतु। इदानीं समयोचितं व्यवहरामि।

यतः। तावद्भयात् तु भेतव्यं यावद्भयमनागतम्।
आगतं तु भयं वीक्ष्य प्रहर्तव्यमभीतवत् ॥ १७ ॥

अपरञ्च। अभियुक्तो यदा पश्येन्न किञ्चिद्गतिमात्मनः।
युध्यमानस्तदा प्राज्ञो म्रियते रिपुणा सह ॥ १८ ॥

इत्यालोच्य स कुलीरस्तस्य वकस्य ग्रीवां चिच्छेद। स वकः पञ्चत्वं गतः। अतो ऽहं ब्रवीमि। भक्षयित्वा बहून् मत्स्यानित्यादि। ततः पुनरपि राजा स चित्रवर्णो ऽब्रवीत्। शृणु तावन्महामन्त्रिन् मयैतदालोचितम्। यदत्रावस्थितेनानेन मेघवर्णेन राज्ञा यावन्ति कर्पूरद्वीपस्योत्तमवस्तूनि तावन्त्यस्माकमुपनेतव्यानि। तेन महता विलासेनास्माभिर् विन्ध्याचले स्थातव्यम्। दूरदर्शी विहस्याह। देव।

अनागतवतीं चिन्तां कृत्वा यस्तु प्रहृष्यति।
स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा ॥ १९ ॥

राजाह। कथमेतत्। दूरदर्शी कथयति। अस्ति देवीकोट्टनगरे देवशर्मा नाम ब्राह्मणः। तेन विषुवत्सङ्क्रान्तौ सक्तुपूर्णशरावः प्राप्तः। ततस्तमादायासौ भाण्डपूर्णकुम्भकारमण्डपिकायां रौद्रेणाकुलितः सुप्तः। ततः सक्तुरक्षार्थं हस्ते दण्डमादायाचिन्तयत्। यद्यहमिमं सक्तुशरावं विक्रीय दश कपर्दकान् प्राप्नोमि तदा तैरिहसमये कपर्दकैर् घटशरावादिकमुपक्रीय अनेकधा वृद्धैस्तैर्धनैः पुनः पुनः पूगवस्त्रादिकमुपक्रीय विक्रीय वाणिज्यं कृत्वा लक्षसङ्ख्यकधनान्युत्पाद्य विवाहचतुष्टयं करोमि। ततस्तासु पत्नीषु या रूपयौवनवती तस्यामधिकानुरागं करोमि। तदनन्तरं सञ्जातेर्ष्यास्ताः

सपत्न्य अन्योन्यं यदा द्वन्द्वं करिष्यन्ति तदा ऽहं कोपाकुलः सर्वाः सपत्नीर् लगुडेन ताडयिष्यामि। इत्यभिधाय तेन लगुडः प्रक्षिप्तः शक्तुशरावश्चूर्णितः। कुम्भकारागारस्थितानि बहूनि भाण्डानि च भग्नानि। ततो भग्नभाण्डश्रवणादागत्य कुम्भकारेण गले हस्तं दत्त्वा मण्डपिकाद्बहिःकृतः। अतो ऽहं ब्रवीमि। अनागतवतीं चिन्तामित्यादि। ततो राजा रहसि गृध्रं मन्त्रिणं पप्रच्छ। तात यथा कर्तव्यं तथोपदिश। गृध्रो वदति।

मदोद्धतस्य नृपतेः प्रकीर्णस्येव दन्तिनः।
गच्छन्त्युन्मार्गया तस्य नेतारः खलु वाच्यताम्॥ २०॥

शृणु तावद्देव किमस्माभिर् बलदर्पाद् दुर्गं भग्नं नोवा भवतः प्रतापाधिष्ठितेनोपायेन। राजाह। भवतामुपायेन। गृध्रो ब्रूते। यद्यस्मद्वचनं क्रियते तदा स्वदेशे गम्यताम्। अन्यथा प्रत्यासन्ने वर्षाकाले तुल्यबलेन सह पुनर्विग्रहे सत्यस्माकं परभूमिष्ठानां स्वदेशगमनमपि दुर्लभं भविष्यति। सुखशोभार्थं सन्धाय गम्यताम्। दुर्गं भग्नं कीर्तिश्च लब्धैव। मम सम्मतं तावदेतत्।

यतः। यो हि धर्मं पुरस्कृत्य हित्वा भर्तुः प्रियाप्रियम्।
अप्रियाण्याह पथ्यानि तेन राजा सहायवान्॥ २१॥

अपरञ्च। सन्धिम् इच्छेत् समेनापि सन्दिग्धो विजयो युधि।
न हि सांशयिकं कुर्यात् इत्युवाच बृहस्पतिः॥ २२॥

अन्यच्च। सुहृद्बलं तथा राज्यम् आत्मानं कीर्तिमेव च।
युधि सन्देहदोलस्थं को हि कुर्याद् अबालिशः॥ २३॥

परन्तु। युद्धे विनाशो भवति कदाचिदुभयोरपि।
सुन्दोपसुन्दावन्योन्यं समवीर्यौ हतौ न किम्॥ २४॥

राजोवाच। कथमेतत्। मन्त्री कथयति। पुरा दैत्यौ महोदारौ सुन्दोपसुन्दनामानौ महता कायक्लेशेन त्रैलोक्यराज्यकामनया चिराच्चन्द्रशेखरम् आराधितवन्तौ। ततस् तयोर्भगवान् परितुष्टः सन् वरं वरयतमित्युवाच। अनन्तरं तयोर्भीरुमययोः समधिष्ठया सरस्वत्या तावन्यद् वक्तुकामावन्यदभिहितौ। यद्यावयोर् भगवान् परितुष्टस् तदा स्वप्रियां पार्वतीं परमेश्वरो ददातु। अथ भगवता क्रुद्धेन वरदानस्यावश्यकतया मूढतया च पार्वती प्रदत्ता। ततस्तस्या रूपलावण्यलुब्धाभ्यां जगद्घातिभ्यां मनसोत्सुकाभ्यां पापतिमिराभ्यां ममेत्यन्योन्यकलहाभ्यां प्रमाणपुरुषः कश्चित् पृच्छ्यतामिति मतौ कृतायां स एव भट्टारको वृद्धद्विजरूपी समागत्य तत्रो-

पस्थितः। अनन्तरम् आवाभ्यामियं स्वबललब्धा कस्येयम् आवयोर्भवति ब्राह्मणम् अपृच्छताम्। ब्राह्मणो ब्रूते।

ज्ञानश्रेष्ठो द्विजः पूज्यः क्षत्रियो बलवानपि।
धनधान्याधिको वैश्यः शूद्रस्तु द्विजसेवया ॥ २५ ॥

तद्युवां क्षत्रियधर्माणौ। युद्ध एव युवयोर्नियमः। इत्यभिहिते सति साधूक्तमनेनेति कृत्वा अन्योन्यतुल्यवीर्यौ समकाले ऽन्योन्यघातेन विनाशमुपगतौ। अतो ऽहं ब्रवीमि। सन्धिमिच्छेत् समेनापीत्यादि। राजाह। तत् किं प्रागेव नेदमुपदिष्टम्। मन्त्री वदति। तदा किं मम वचनम् अवसानपर्यन्तं श्रुतं भवद्भिः। तदापि मम सम्मत्या नायं विग्रहारम्भः। यतः सन्धेयगुणयुक्तो ऽयं हिरण्यगर्भो न विग्राह्यः।

तथा चोक्तम्।

सत्यार्यौ धार्मिको ऽनार्यो भ्रातृसङ्घातवान् बली।
अनेकयुद्धविजयी सन्धेयाः सप्त कीर्तिताः ॥ २६ ॥
सत्यो ऽनुपालयन् सत्यं सन्धितो नैति विक्रियाम्।
प्राणबाधे ऽपि सुव्यक्तम् आर्यो नायात्यनार्यताम् ॥ २७ ॥
धार्मिकस्याभियुक्तस्य सर्व एव हि युध्यते।
प्रजानुरागाद्धर्माच्च दुःखच्छेद्यो हि धार्मिकः ॥ २८ ॥
सन्धिः कार्यो ऽप्यनार्येण विनाशे समुपस्थिते।
विना तस्याश्रयेणान्यः कुर्यान्न कालयापनम् ॥ २९ ॥
संहतत्वाद् यथा वेणुर् निविडः कण्टकैर्वृतः।
न शक्यते समुच्छेत्तुं भ्रातृसङ्घातवांस्तथा ॥ ३० ॥
बलिना सह योद्धव्यमिति नास्ति निदर्शनम्।
प्रतिवातं न हि घनः कदाचिदुपसर्पति ॥ ३१ ॥
जमदग्नेः सुतस्येव सर्वः सर्वत्र सर्वदा।
अनेकयुद्धजयिनः प्रतापादेव भुज्यते ॥ ३२ ॥
अनेकयुद्धविजयी सन्धानं यस्य गच्छति।
तत्प्रतापेन तस्याशु वशम् आयान्ति शत्रवः ॥ ३३ ॥

तदत्र बहुभिर् गुणैरुपेतः सन्धेयो ऽयं राजहंसः। चक्रवाको ऽवदत्। प्रणिधे सर्वम् अवगतम्। पुनश्च गत्वा तं परिज्ञाय सत्वरमागमिष्यसि। अथ हिरण्यगर्भश्चक्रवाकं पृष्टवान्। मन्त्रिन् असन्धेयाः कति। तान् विज्ञातुमिच्छामि। मन्त्री ब्रूते। देव कथयामि।

अट्ण । बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः ।
भीरुको भीरुकजनो लुब्धो लुब्धजनस् तथा ॥ ३४ ॥
विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् ।
अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ ३५ ॥
दैवोपहतकश्चैव दैवचिन्तक एव च ।
दुर्भिक्षव्यसनोपेतो बलव्यसनसङ्कुलः ॥ ३६ ॥
अदेशस्थो बहुरिपुर् युक्तः कालेन यश्च न ।
सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥ ३७ ॥
एतैः सन्धिं न कुर्वीत विगृह्णीयात् तु केवलम् ।
एते विगृह्यमाणा हि क्षिप्रं यान्ति रिपोर्वशम् ॥ ३८ ॥
बालस्याल्पप्रभावत्वान्न लोको योद्धुमिच्छति ।
युद्धायुद्धफलं यस्मात् ज्ञातुं शक्तो न बालिशः ॥ ३९ ॥
उत्साहशक्तिहीनत्वाद् वृद्धो दीर्घामयस्तथा ।
स्वैरेव परिभूयेते द्वावप्येतावसंशयम् ॥ ४० ॥
सुखोच्छेद्यश्च भवति सर्वज्ञातिबहिष्कृतः ।
त एवैनं विनिघ्नन्ति ज्ञातयस् त्वात्मसात्कृताः ॥ ४१ ॥
भीरुर् युद्धपरित्यागात् स्वयमेव प्रणश्यति ।
तथैव भीरुकजनः सङ्ग्रामे तैर्विमुच्यते ॥ ४२ ॥
लुब्धस्यासंविभागित्वान्न युध्यन्तेऽनुजीविनः ।
लुब्धानुजीविकैर् एष दानहीनैर् निहन्यते ॥ ४३ ॥
सन्त्यज्यते प्रकृतिभिर् विरक्तप्रकृतिर् युधि ।
सुखाभियोज्यो भवति विषयेष्वतिसक्तिमान् ॥ ४४ ॥
अनेकचित्तमन्त्रस्तु द्वेष्यो भवति मन्त्रिणाम् ।
अनवस्थितचित्तत्वात् कार्ये तैः स उपेक्ष्यते ॥ ४५ ॥
सदा धर्मबलीयस्त्वाद् देवब्राह्मणनिन्दकः ।
विशीर्यते स्वयं ह्येष दैवोपहतकस्तथा ॥ ४६ ॥
सम्पत्तेश्च विपत्तेश्च दैवमेव हि कारणम् ।
इति दैवपरो ध्यायन् नात्मानमपि चेष्टयेत् ॥ ४७ ॥
दुर्भिक्षव्यसनी चैव स्वयमेवावसीदति ।

बलव्यसनयुक्तस्य योद्धुं शक्तिर्न जायते ॥ ४८ ॥
अदेशस्थो हि रिपुणा स्वल्पकेनापि हन्यते ।
ग्राहो ऽल्पीयानपि जले गजेन्द्रमपि कर्षति ॥ ४९ ॥
बहुशत्रुस्तु सन्त्रस्तः श्येनमध्ये कपोतवत् ।
येनैव गच्छति पथा तेनैवासौ विपद्यते ॥ ५० ॥
अकालसैन्ययुक्तस्तु हन्यते कालयोधिना ।
कौशिकेन हतज्योतिर्निशीथ इव वायसः ॥ ५१ ॥
सत्यधर्मव्यपेतेन न सन्दध्यात् कदाचन ।
स सन्धितो ऽप्यसाधुत्वाद् अचिराद्याति विक्रियाम् ॥ ५२ ॥

अपरमपि कथयामि । सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षाड्गुण्यम् । कर्मणाम् आरम्भोपायः पुरुषद्रव्यसम्पद् देशकालविभागो निपातप्रतीकारः कार्यसिद्धिः पञ्चाङ्गो मन्त्रः । सामदानभेददण्डाश्चत्वार उपायाः । उत्साहशक्तिर् मन्त्रशक्तिः प्रभुशक्तिश्चेति शक्तित्रयम् । एतत्सर्वमालोच्य नित्यं विजिगीषवो भवन्ति महान्तः ।

यतः । या हि प्राणपरित्यागमूल्येनापि न लभ्यते ।
सा श्रीर्नीतिविदां वेश्म चञ्चला ऽपि प्रधावति ॥ ५३ ॥

तथा चोक्तम् । वित्तं यदा यस्य समं विभक्तं गूढश्च चारो निभृतश्च मन्त्रः ।
न चाप्रियं प्राणिषु यो ब्रवीति स सागरान्तां पृथिवीं प्रशास्ति ॥ ५४ ॥

किन्तु देव यद्यपि महामन्त्रिणा गृध्रेण सन्धानमुपन्यस्तं तथापि तेन राज्ञा सम्प्रति भूतजयदर्पान्न मन्तव्यम् । तदेवं क्रियताम् । अस्मन्मित्रं सिंहलद्वीपस्य महाबलो नाम सारसो राजा जम्बुद्वीपे कोपं जनयतु ।

यतः । सुगुप्तिमाधाय सुसंहतेन बलेन वीरो विचरन्नरातिम् ।
सन्तापयेद् येन समं सुतप्तस् तप्तेन सन्धानम् उपैति तप्तः ॥ ५५ ॥

राजाह । एवमस्तु । इत्युक्त्वा विचित्रो नाम बकः सुगुप्तलेखं दत्त्वा सिंहलद्वीपं प्रस्थापितः । अथ प्रणिधिः पुनरागत्य उक्तवान् । देव श्रूयतां तावत् तत्रत्यप्रस्तावः । एवं तत्र गृध्रेणोक्तम् । देव मेघवर्णस्तत्र चिरमुषितः । स वेत्ति किं सन्धेयगुणयुक्तो हिरण्यगर्भो राजा न वेति । ततो ऽसौ मेघवर्णश्चित्रवर्णेन राज्ञा समाहूय पृष्टः । वायस कीदृशो ऽसौ हिरण्यगर्भो राजा चक्रवाको मन्त्री वा कीदृशः । मेघवर्णो ब्रूते । देव स हिरण्यगर्भो राजा युधिष्ठिरसमो महाशयः सत्यवाक् । चक्रवाकसदृशो

मन्त्री न काप्यवलोक्यते। राजाह। यद्येवं तदा कथमसौ त्वया वञ्चितः। मेघवर्णो विहस्य ब्रूते।

देव। विश्वासप्रतिपन्नानां वञ्चने का विदग्धता।
अङ्कमारुह्य सुप्तानां हन्तुः किं नाम पौरुषम्॥ ५६॥

शृणु देव। तेन मन्त्रिणाऽहं प्रथमदर्शन एव विज्ञातः। किन्तु महाशयोऽसौ राजा। तेन मया विप्रलब्धः।

तथा चोक्तम्। आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम्।
स एव वञ्चितस् तेन ब्राह्मणश्छागतो यथा॥ ५७॥

राजाह। कथमेतत्। मेघवर्णः कथयति। अस्ति गौडविषये यज्ञशर्मा नाम ब्राह्मणः। स च प्रस्तुतयज्ञनिमित्तं ग्रामान्तरं गत्वा श्वेतछागम् उपक्रीय स्कन्धे धृत्वा त्वरितं पथि गच्छन् धूर्तत्रयेण दृष्टः। ततस्ते धूर्ता यद्येष छागः केनाप्युपायेन लभ्यते तदा मतिप्रकर्षो भवति। इत्यालोच्य प्रान्तरे वृक्षत्रयतले तस्य ब्राह्मणस्य वर्त्मन्युपविश्य स्थिताः। तत्रैकेन धूर्तेन स ब्राह्मणोऽभिहितः। भो ब्राह्मण किमिति त्वया कुक्कुरः स्कन्धेनोह्यते। विप्रेणोक्तम्। अज्ञ रे नायं कुक्कुरो यज्ञछागोऽयम्। अनन्तरं पुनर्द्वितीयेन धूर्तेन क्रोशमात्रावस्थितेन तदेवोक्तम्। तदाकर्ण्य स ब्राह्मण उवाच। नायं श्वा इत्यभिधाय किञ्चिदुद्विग्नमनसा तं छागं भूमौ निधाय मङ्गमङ्गैर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिश्चलितः।

तथा चोक्तम्। मतिर् दोलायते नूनं सतामपि खलोक्तिभिः।
ताभिर्विश्वासितो योऽसौ म्रियते चित्रकर्णवत्॥ ५८॥

राजा पृच्छति। कथमेतत्। स कथयति। अस्ति कस्मिंश्चिद् वनोद्देशे मदोत्कटो नाम सिंहः। तस्यानुचरास्त्रयः। काको व्याघ्रः शृगालश्च। अथ तैर्भ्रमद्भिः सार्थात् परिभ्रष्ट उष्ट्रो दृष्टः पृष्टश्च। कुतो भवानागतः। स चात्मनः सर्ववृत्तान्तम् अकथयत्। ततस् तैर्नीत्वाऽसौ सिंहाय समर्पितः। अथ तेन सिंहेनाभयवाचं दत्त्वा चित्रकर्ण इति नाम कृत्वा स्थापितः। एवं कालो गच्छति। अथ कदाचित् सिंहस्य शरीरवैकल्यात् भूरिवृष्टिकारणाच्चाहारम् अलभमानास्ते व्यग्रा बभूवुः। ततः काकव्याघ्रगोमायुभिर् आलोचितम्। चित्रकर्णमेव यथा स्वामी व्यापादयति तथाऽनुष्ठीयताम्। किमनेन कण्टकभुजाऽस्माकम्। व्याघ्रो ब्रूते। स्वामिनाऽभयवाचं दत्त्वा गृहीतोऽयम्। तत् कथमेवं सम्भवति। वायसो वदति। इहसमये परिक्षीणः स्वामी पापमपि करिष्यति।

यतः । त्यजेत् क्षुधार्ता महिला ऽपि पुत्रं खादेत् क्षुधार्ता भुजगी स्वमण्डम् ।
बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति ॥ ५९ ॥

अन्यच्च । मत्तः प्रमत्तश्चोन्मत्त आर्तः क्रोधी बुभुक्षितः ।
लुब्धो भीरुस् त्वरायुक्तः कामुकश्च न धर्मवित् ॥ ६० ॥

इति निश्चित्य सर्वे सिंहान्तिकं जग्मुः । सिंहेनोक्तम् । आहारार्थं प्राप्तं किञ्चित् । काको ब्रूते । देव यत्नादपि प्राप्तं न किञ्चित् । सिंहो ऽवदत् । को ऽधुना जीवनोपायः । काको वदति । स्वाधीनाहारपरित्यागेन सर्वनाशो ऽयमुपस्थितः । सिंहेनोक्तम् । अत्राहारः कः स्वाधीनः । काकः सिंहकर्णे कथयति । चित्रकर्ण इति । सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । मयैतस्य अभयवाग् दत्ता । तत् कथमेवैतादृशं दारुणं कर्म कर्तव्यम् ।

तथा हि । न भूप्रदानं न सुवर्णदानं न गोप्रदानं न तथा ऽन्नदानम् ।
यथा वदन्तीह महाप्रदानं सर्वप्रदानेष्वभयप्रदानम् ॥ ६१ ॥

अन्यच्च । सर्वकामसमृद्धस्य अश्वमेधस्य यत्फलम् ।
तत्फलं लभते सम्यक् रक्षिते शरणागते ॥ ६२ ॥

काको ब्रूते । नासौ स्वामिना व्यापादयितव्यः । किन्त्वस्माभिरेव तथा कर्तव्यं यथा ऽसौ स्वदेहदानम् अङ्गीकरोति । तच्छ्रुत्वा सिंहस् तूष्णीं स्थितः । ततो ऽसौ लब्धावकाशः कूटं कृत्वा सर्वान् आदाय सिंहसमीपम् आगतः । अथ काकेनोक्तम् । देव यत्नादप्याहारो न प्राप्तः । अनेकोपवासक्लिष्टश्च स्वामी । तदिदानीं मदीयमांसम् उपभुज्यताम् ।

यतः । स्वामिमूला भवन्त्येताः सर्वाः प्रकृतयः खलु ।
समूलेषु हि वृक्षेषु प्रयत्नः सफलो नृणाम् ॥ ६३ ॥

सिंहेनोक्तम् । भद्र वरं प्राणपरित्यागो न पुनरीदृशे कर्मणि प्रवृत्तिः । जम्बुकेनापि तथोक्तम् । ततः सिंहेनोक्तम् । मैवम् । व्याघ्र उवाच । मद्देहेन जीवतु स्वामी । सिंहेनोक्तम् । न कदाचिदेवमुचितम् । ततस् तेषु वदत्सु चित्रकर्णेनापि वक्तुमीहितमिति । ततः स व्याघ्रः सञ्जीभूय स्थितः । अथ चित्रकर्णो ऽपि जातप्रत्ययस् तान् शृगालकाकव्याघ्रान् अवलोक्य आत्मदेहम् अङ्गीकृतवान् । तदनन्तरमेवासौ द्वीपिना कुक्षिं विदार्य व्यापादितः सर्वैर् भक्षितश्च । अतो ऽहं ब्रवीमि । मतिर् दोलायते नूनमित्यादि । तदनन्तरं तृतीयधूर्तवचनं श्रुत्वा स विप्रो भ्रमं निश्चित्य छागं त्यक्त्वा स्नात्वा गृहं ययौ । छागश्च नीत्वा धूर्तैः खादितः । अतो ऽहं ब्रवीमि । आत्मौपम्येन यो वेत्तीत्यादि । रा-

जाह । मेघवर्ण कथं त्वया शत्रुमध्ये सुचिरमुषितम् । कथं वा तेषाम् अनुनयः कृतः । मेघवर्ण आह । देव स्वामिकार्यार्थिना स्वप्रयोजनवशाद्वा किं किं न क्रियते ।

पश्य । लोको वहति किं राजन् न मूर्ध्ना दग्धुमिन्धनम् ।
क्षालयन्नपि वृक्षाङ्घ्रिं नदीवेला निकृन्तति ॥ ६४ ॥

तथा चोक्तम् । स्कन्धेनापि वहेच्छत्रून् कार्यम् आसाद्य बुद्धिमान् ।
यथा वृद्धेन सर्पेण मण्डूका विनिपातिताः ॥ ६५ ॥

राजाह । कथमेतत् । मेघवर्णः कथयति । अस्ति कस्मिंश्चिज्जीर्णोद्याने मन्दविसर्पो नाम सर्पः । स चातिजीर्णतया स्वाहारमप्यन्वेष्टुम् अक्षमः सन् सरस्तीरे पतित्वा स्थितः । ततो दूरात् केनचिन्मण्डूकेन दृष्टः पृष्टश्च । किमिति भवान् आहारं नान्विष्यति । सर्पो ब्रूते । भद्र गच्छ किं ते मम मन्दभाग्यस्य वृत्तान्तप्रश्नेन । ततः सञ्जातकौतुकः स भेकः सर्वथा कथ्यतामिति तं सर्पमाह । सर्पो ब्रूते । भद्र अत्र ब्रह्मपुरे कौण्डिन्यनाम्नः श्रोत्रियस्य पुत्रो विंशतिवर्षदेशीयः सर्वगुणसम्पन्नो दुर्दैवान्मया नृशंसेन दष्टः । ततः सुशीलनामानं तं पुत्रं मृतम् अवलोक्य कौण्डिन्यः शोकेन मूर्च्छामुपगतः भूमौ लुलोठ । अनन्तरं ब्रह्मपुरनिवासिनस्तस्य सर्वे बान्धवास् तत्रागत्योपविष्टाः ।

तथा चोक्तम् । आहवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस् तिष्ठति स बान्धवः ॥ ६६ ॥

ततः कपिलो नाम स्नातको ऽवदत् । अरे कौण्डिन्य मूढो ऽसि तेनैवं विलपसि ।

शृणु । क्रोडीकरोति प्रथमं यथा जातम् अनित्यता ।
धात्रीव जननी पश्चात् तदा शोकस्य कः क्रमः ॥ ६७ ॥

तथा च । क्व गताः पृथिवीपालाः ससैन्यबलवाहनाः ।
वियोगसाक्षिणी येषां भूमिर् अद्यापि तिष्ठति ॥ ६८ ॥

अपरञ्च । प्रतिक्षणम् अयं कायः क्षीयमाणो न लक्ष्यते ।
आमकुम्भ इवाम्भःस्थो विशीर्णः सन् विभाव्यते ॥ ६९ ॥
आसन्नतरताम् एति मृत्युर् जन्तोर् दिने दिने ।
आघातं नीयमानस्य वध्यस्येव पदे पदे ॥ ७० ॥

यतः । अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः ।
ऐश्वर्यं प्रियसंवासो मुह्येत् तत्र न पण्डितः ॥ ७१ ॥
यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य च व्यपेयातां तद्वद् भूतसमागमः ॥ ७२ ॥

यथा हि पथिकः कश्चिच्छायाम् आश्रित्य तिष्ठति ।
विश्रम्य च पुनर्गच्छेत् तद्वद्भूतसमागमः ॥ ७३ ॥

अन्यच्च । पञ्चभिर् निर्मिते देहे पञ्चत्वं च पुनर्गते ।
स्वां स्वां योनिम् अनुप्राप्ते तत्र का परिदेवना ॥ ७४ ॥
यावतः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान् ।
तावन्तो ऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥ ७५ ॥
नायम् अत्यन्तसंवासो लभ्यते येन केनचित् ।
अपि स्वेन शरीरेण किमुतान्येन केनचित् ॥ ७६ ॥

अपि च । संयोगो हि वियोगस्य संसूचयति सम्भवम् ।
अनतिक्रमणीयस्य जन्म मृत्योरिवागमम् ॥ ७७ ॥
आपातरमणीयानां संयोगानां प्रियैः सह ।
अपथ्यानामिवान्नानां परिणामो हि दारुणः ॥ ७८ ॥

अपरञ्च । व्रजन्ति न निवर्तन्ते स्रोतांसि सरितां यथा ।
आयुर् आदाय मर्त्यानां सदा रात्र्यहनी तथा ॥ ७९ ॥
सुखास्वादपरो यस्तु संसारे सत्समागमः ।
स वियोगावसानत्वात् दुःखानां धुरि युज्यते ॥ ८० ॥
अत एव हि नेच्छन्ति साधवः सत्समागमम् ।
यद्वियोगासिलूनस्य मनसो नास्ति भेषजम् ॥ ८१ ॥
सुकृतान्यपि कर्माणि राजभिः सगरादिभिः ।
अथ तान्येव कर्माणि ते चापि प्रलयं गताः ॥ ८२ ॥
सञ्चिन्त्य सञ्चिन्त्य तम् उग्रदण्डं मृत्युं मनुष्यस्य विचक्षणस्य ।
वर्षाम्बुसिक्ता इव चर्मबन्धाः सर्वे प्रयत्नाः शिथिलीभवन्ति ॥ ८३ ॥
यामेव रात्रिं प्रथमाम् उपैति गर्भे निवासं नरलोकधीरः ।
ततः प्रभृत्यस्खलितप्रयाणः स प्रत्यहं मृत्युसमीपम् एति ॥ ८४ ॥

अथ संसारं विचारय शोको ऽयम् अज्ञानस्य प्रपञ्चः ।

पश्य । अज्ञानं कारणं न स्याद्वियोगो यदि कारणम् ।
शोको दिनेषु गच्छत्सु वर्धताम् अपयाति किम् ॥ ८५ ॥

तद्भद्रात्मानम् अनुसन्धेहि । शोकचर्चां च परिहर ।

यतः । अकाण्डपातजातानाम् अस्त्राणां मर्मभेदिनाम् ।

गाढशोकप्रहाराणाम् अचिन्तैव महौषधम् ॥ ८६ ॥

ततस्तद्वचनं निशम्य प्रबुद्ध इव कौण्डिन्य उत्थायाब्रवीत्। तदलम् इदानीं गृहनरकवासेन। वनमेव गच्छामि। पुनः कपिलो ब्रूते।

वने ऽपि दोषाः प्रभवन्ति रागिणां गृहे ऽपि पञ्चेन्द्रियनिग्रहस् तपः।
अकुत्सिते कर्मणि यः प्रवर्तते निवृत्तरागस्य गृहं तपोवनम् ॥ ८७ ॥

यतः। दुःखितो ऽपि चरेद् धर्मं यत्र कुत्राश्रमे रतः।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ॥ ८८ ॥

उक्तञ्च। वृत्त्यर्थं भोजनं येषां सन्तानार्थं च मैथुनम्।
वाक् सत्यवचनार्थं च दुर्गाण्यपि तरन्ति ते ॥ ८९ ॥

तथा हि। आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलतटा दयोर्मिः।
अत्राभिषेकं कुरु पाण्डुपुत्र न वारिणा शुध्यति चान्तरात्मा ॥ ९० ॥

विशेषतश्च। जन्ममृत्युजराव्याधिवेदनाभिर् अभिप्लुतम्।
संसारमिदम् अत्यन्तम् असारं त्यजतः सुखम् ॥ ९१ ॥
दुःखमेवास्ति न सुखं यस्मात् तदुपलभ्यते।
दुःखार्तस्य प्रतीकारे सुखसञ्ज्ञा विधीयते ॥ ९२ ॥

कौण्डिन्यो ब्रूते। एवमेव। ततो ऽहं तेन शोकाकुलेन ब्राह्मणेन शप्तः। यदद्यारभ्य मण्डूकानां वाहनं भविष्यसीति। कपिलो ब्रूते। सम्प्रत्युपदेशासहिष्णुर् भवान् शोकाविष्टं ते हृदयम्। तथापि कार्यं शृणु।

सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते।
स सद्भिः सह कर्तव्यः सतां सङ्गो हि भेषजम् ॥ ९३ ॥

अन्यच्च। कामः सर्वात्मना हेयः स चेद्धातुं न शक्यते।
स्वभार्यां प्रति कर्तव्यः सैव तस्य हि भेषजम् ॥ ९४ ॥

एतच्छ्रुत्वा स कौण्डिन्यः कपिलोपदेशामृतप्रशान्तशोकानलो यथाविधि दण्डग्रहणं कृतवान्। ततो ब्राह्मणशापं भोक्तुं मण्डूकान् वोढुम् अत्र तिष्ठामि। अनन्तरं तेन मण्डूकेन गत्वा मण्डूकनाथस्य जालपादस्य सर्वं कथितम्। ततो ऽसावागत्य स मण्डूकनाथो हर्षेण समुत्प्लुत्य सर्पस्य पृष्ठमध्ये स्थितवान्। स सर्पस् तं पृष्ठे कृत्वा चित्रपदक्रमं बभ्राम। परेद्युश्चलितुम् असमर्थं तं मण्डूकनाथो ऽवदत्। किमिति भवानद्य मन्दगतिः। सर्पो ब्रूते। देव आहारविरहाद् दुर्बलो ऽस्मि। मण्डूकनाथो ऽवदत्। अस्मदाज्ञया मण्डूकान् भक्षय। ततो गृहीतो ऽयं महाप्रसाद इत्युक्त्वा क्रमशो स सर्पो मण्डूकान् खा-

इति। अथ निर्मण्डूकं सरो विलोक्य मण्डूकनाथो ऽपि तेन खादितः। अतो ऽहं ब्रवीमि। स्कन्धेनापि वहेच्छत्रून् इत्यादि। देव यात्विदानीं पुरावृत्ताख्यानकथनं। सर्वथा सन्धेयो ऽयं हिरण्यगर्भो राजा सन्धीयतामिति मे मतिः। राजोवाच। को ऽयं भवतो विचारः। यतो जितस् तावदयम् अस्माभिः। ततो यद्यस्मदाज्ञया सेवायां वसति तदास्तां नो चेद्विगृह्यताम्। अत्रान्तरे जम्बुद्वीपाद् आगत्य शुकेनोक्तम्। देव सिंहलद्वीपस्य सारसो राजा सम्प्रति जम्बुद्वीपम् आक्रम्याधितिष्ठति। राजा तं ससम्भ्रमम् वदति। किं किम्। शुकः पूर्वोक्तं कथयति। गृध्रः स्वगतमुवाच। साधु रे चक्रवाक मन्त्रिन् साधु। राजा सकोपमाह। आस्तां तावदयं तमेव गत्वा समूलमुन्मूलयामि। दूरदर्शी विहस्याह।

न शरन्मेघवत् कार्यं वृथैव घनगर्जितम्।
परस्यार्थम् अनर्थं वा प्रकाशयति नो महान्॥ ९५॥

अपरञ्च। एकदा न विगृह्णीयात् बहून् राजा विरोधिनः।
सदर्पो ऽप्युरगः कीटैर् बहुभिर् नाशितो ध्रुवम्॥ ९६॥

देव किं इतो विना सन्धानं गमनमस्ति। यत अस्माकं पश्चात् प्रकोपो ऽनेन कर्तव्यः।

अपरञ्च। यो ऽर्थतत्त्वम् अविज्ञाय क्रोधस्यैव वशं गतः।
स तथा तप्यते मूढो ब्राह्मणो नकुलादिव॥ ९७॥

राजा पृच्छति। कथमेतत्। दूरदर्शी कथयति। अस्त्युज्जयिन्यां माधवो नाम ब्राह्मणः। तस्य ब्राह्मणी प्रसूता। सा च बालापत्यरक्षणार्थं स्वस्वामिनं अवस्थाप्य स्नातुं गता। अथ राज्ञा पार्वणश्राद्धकरणाय तमेव ब्राह्मणं नेतुं मनुष्यः प्रेरितः। तं दृष्ट्वा ब्राह्मणः सहजदारिद्र्याद् अचिन्तयत्। यदि सत्वरं न गच्छामि तदा ऽन्यः कश्चिच्छ्राद्धं ग्रहीष्यति।

उक्तञ्च। आदेयस्य प्रदेयस्य कर्तव्यस्य च कर्मणः।
क्षिप्रम् अक्रियमाणस्य कालः पिबति तद्रसम्॥ ९८॥

शिशोश्चात्र रक्षकः को ऽपि नास्ति तत् किं करोमि। यातु। चिरकालपालितम् अमुं सुतनिर्विशेषं नकुलं बालकरक्षार्थं व्यवस्थाप्य गच्छामि। तथा कृत्वा गतः। ततस् तेन नकुलेन बालकसमीपम् आगच्छन् तूष्णीं कालसर्पो व्यापादितः खण्डितश्च। अथासौ नकुलो ब्राह्मणम् आयान्तम् अवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य ब्राह्मणस्य चरणयोर् लुलोठ। ततो ऽसौ ब्राह्मणस् तं तथाविधं दृष्ट्वा मम पुत्रो ऽनेन भक्षित इत्यविचार्य तं लगुडेन व्यापादितवान्। अनन्तरं यावदसौ उपसृत्य पश्यति तावदेव सुखसुप्तं बालकं तदन्तिकं मृतं च कृष्णसर्पं दृष्ट्वा बहुविधं सन्तापं चकार। अतो ऽहं ब्रवीमि। यो ऽर्थतत्त्वम् अविज्ञाय इत्यादि।

अपरञ्च। काम: क्रोधस्_तथा लोभो हर्षो मानो मदस्_तथा।
षड्वर्गमुत्सृजेदेनम्_त्यक्ते तस्मिन्_सुखी भवेत्_॥ ९९ ॥

राजाह। मन्त्रिन्_एष ते निश्चयः। मन्त्री ब्रूते। एवमेव।

यतः। स्मृतिश्च परमार्थेषु वितर्को ज्ञाननिश्चयः।
दृढता मन्त्रगुप्तिश्च मन्त्रिणः परमो गुणः॥ १०० ॥

तथा चोक्तम्_। सहसा विदधीत न क्रियाम्_अविवेकः परम्_आपदां पदम्_।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥ १०१ ॥

तद्देव यदीदानीम्_अस्मद्वचनं क्रियते तदा सन्धाय गम्यताम्_।

यतः। यद्यप्युपायाश्चत्वारो निर्दिष्टाः साध्यसाधने।
सङ्ख्यामात्रं फलं तेषां सिद्धिः साम्नि व्यवस्थिता॥ १०२ ॥

राजाह। कथमेतत्_सत्वरं सम्भाव्यते। मन्त्री ब्रूते। देव सत्वरं भविष्यति।

यतः। मृद्घटवत्_सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति।
सुजनस्_तु कनकघटवत्_दुर्भेद्यश्चाशु सन्धेयः॥ १०३ ॥

अपरञ्च। अज्ञः सुखम्_आराध्यः सुखतरम्_आराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मा ऽपि नरं न रञ्जयति॥ १०४ ॥

विशेषतश्च। असौ धर्मज्ञो राजा सर्वज्ञो मन्त्री च ज्ञातमेतन्मया पूर्वं मेघवर्णवचनात्_ तत्कृतकार्यसन्दर्शनाच्च।

यतः। कर्मानुमेयाः सर्वत्र परोक्षे गुणवृत्तयः।
तस्मात्_परोक्षवृत्तीनां फलैः कर्म विभावयेत्_॥ १०५ ॥

राजाह। अलमुत्तरोत्तरेण। यथाभिप्रेतम्_अनुष्ठीयताम्_। एतन्मन्त्रयित्वा गृध्रो महामन्त्री तत्र यथार्हं कर्तव्यमित्युक्त्वा दुर्गाभ्यन्तरं प्रचलितः। ततः प्रणिधिवकेनागत्य राज्ञो हिरण्यगर्भस्य निवेदितम्। देव सन्धिं कर्तुं महामन्त्री गृध्रो ऽस्मत्समीपम्_ आगच्छत्। राजहंसो ब्रूते। मन्त्रिन्_पुनः सम्बन्धिना केनचिद्_अत्रागन्तव्यम्। सर्वज्ञो विहस्याह। देव न शङ्कास्पदमेतत्_। यतो महाशयो ऽसौ दूरदर्शी। अथवा स्थितिरियं मन्दमतीनां कदाचित्_शत्रौ शङ्कैव न क्रियते। कदाचित्_सर्वत्रैव शङ्का।

तथा हि। सरसि बहुशस्_ताराच्छाये क्षणात्_परिवञ्चितः
कुमुदविटपान्वेषी हंसो निशासु विचक्षणः।
न दशति पुनस्_ताराशङ्की दिवा ऽपि सितोत्पलं
कुहकचकितो लोकः सत्ये ऽप्यपायम्_अपेक्षते॥ १०६ ॥

दुर्जनदूषितमनसः सुजनेष्वपि नास्ति विश्वासः ।
बालः पायसदग्धो दध्यपि ननु फुत्कृतं भुङ्क्ते ॥ १०७ ॥

तद्देव यथाशक्ति तत्पूजार्थं रत्नोपहारादि सामग्री सज्जीक्रियताम् । तथा ऽनुष्ठिते सति स गृध्रो मन्त्री दुर्गद्वाराच्चक्रवाकेण सत्कृत्यानीय राजदर्शनं कारितो दत्तासने चोपवेशितः । चक्रवाक उवाच । महामन्त्रिन् भवदायत्तं सर्वं स्वेच्छयोपभुज्यताम् इदं राज्यम् । राजहंसो ब्रूते । एवमेव । दूरदर्शी ब्रूते । एवमेवैतत् किन्त्विदानीं बहुप्रपञ्चवचनं निष्प्रयोजनम् ।

यतः । लुब्धम् अर्थेन गृह्णीयात् स्तब्धम् अञ्जलिकर्मणा ।
मूर्खं छन्दोनुवृत्तेन याथातथ्येन पण्डितम् ॥ १०८ ॥

अन्यच्च । सद्भावेन हरेन्मित्रं सम्भ्रमेण तु बान्धवान् ।
स्त्रीभृत्यान् दानमानाभ्यां दाक्षिण्येनेतरं जनम् ॥ १०९ ॥

तदिदानीं सन्धाय गम्यताम् । महाप्रतापश्चित्रवर्णो राजा । चक्रवाको ब्रूते । यथा सन्धानं कार्यं तदप्युच्यताम् । राजहंसो ब्रूते । कति प्रकाराः सन्धीनां सम्भवन्ति । गृध्रो वदति । कथयामि । श्रूयताम् ।

बलीयसा ऽभियुक्तस्तु नृपो ऽनन्यप्रतिक्रियः ।
आपन्नः सन्धिम् अन्विच्छेत् कुर्वाणः कालयापनम् ॥ ११० ॥
कपाल उपहारश्च सन्तानः सङ्गतस्तथा ।
उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ॥ १११ ॥
अदृष्टनर आदिष्ट आत्मादिष्ट उपग्रहः ।
परिक्रयस् तथोच्छिन्नस् तथा च परभूषणः ॥ ११२ ॥
स्कन्धोपनेयः सन्धिश्च षोडशैते प्रकीर्तिताः ।
इति षोडशकं प्राहुः सन्धिं सन्धिविचक्षणाः ॥ ११३ ॥
कपालसन्धिर् विज्ञेयः केवलं समसन्धितः ।
सम्प्रदानाद् भवति य उपहारः स उच्यते ॥ ११४ ॥
सन्तानसन्धिर् विज्ञेयो दारिकादानपूर्वकः ।
सद्भिस्तु सङ्गतः सन्धिर् मैत्रीपूर्व उदाहृतः ॥ ११५ ॥
यावदायुःप्रमाणस्तु समानार्थप्रयोजनः ।
सम्पत्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते ॥ ११६ ॥
सङ्गतः सन्धिरेवायं प्रकृष्टत्वात् सुवर्णवत् ।

तथाऽन्यैः सन्धिकुशलैः काञ्चनः स उदाहृतः ॥ ११७ ॥
द्रव्यात्मकार्यसिद्धिं तु समुद्दिश्य क्रियेत यः ।
स उपन्यासकुशलैर् उपन्यास उदाहृतः ॥ ११८ ॥
मयास्योपकृतं पूर्वं ममाप्येष करिष्यति ।
इति यः क्रियते सन्धिः प्रतीकारः स उच्यते ॥ ११९ ॥
उपकारं करोम्यस्य ममाप्येष करिष्यति ।
अयं चापि प्रतीकारो रामसुग्रीवयोरिव ॥ १२० ॥
एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति ।
सुसंहितप्रमाणस्तु स च संयोग उच्यते ॥ १२१ ॥
आवयोर् योधमुख्यैस्तु मदर्थः साध्यतामिति ।
यस्मिन् पणस्तु क्रियते स सन्धिः पुरुषान्तरः ॥ १२२ ॥
त्वयैकेन मदीयोऽर्थः सम्प्रसाध्यस् त्वसाविति ।
यत्र शत्रुः पणं कुर्यात् सोऽदृष्टपुरुषः स्मृतः ॥ १२३ ॥
यत्र भूम्येकदेशेन पणेन रिपुवर्जितः ।
सन्धीयते सन्धिविद्भिः आदिष्टः स उदाहृतः ॥ १२४ ॥
स्वसैन्येन तु सन्धानम् आत्मादिष्ट उदाहृतः ।
क्रियते प्राणरक्षार्थं सर्वदानाद् उपग्रहः ॥ १२५ ॥
कोशांशेनार्धकोशेन सर्वकोशेन वा पुनः ।
शिष्टस्य प्रतिरक्षार्थं परिक्रय उदाहृतः ॥ १२६ ॥
भुवां सारवतीनां तु दानाद् उच्छिन्न उच्यते ।
भूम्युत्थफलदानेन सर्वेण परभूषणः ॥ १२७ ॥
परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते ।
स्कन्धोपनेयं तं प्राहुः सन्धिं सन्धिविचक्षणाः ॥ १२८ ॥
परस्परोपकारस्तु मैत्री सम्बन्धकस् तथा ।
उपहारश्च विज्ञेयाश्चत्वारश्चैव सन्धयः ॥ १२९ ॥
एक एवोपहारस्तु सन्धिरेव मतो मम ।
उपहारविभिन्नास्तु सर्वे मैत्रविवर्जिताः ॥ १३० ॥
अभियोक्ता बलीयस्त्वाद् अलब्ध्वा न निवर्तते ।
उपहाराद् ऋते तस्मात् सन्धिर् अन्यो न विद्यते ॥ १३१

राजाह । भवन्तो महापण्डिताः तदत्रास्माकं यथाकार्यम् उपदिश्यताम् । दूरदर्शी ब्रूते । आः किमुच्यते ।

आधिव्याधिपरितापैर् अद्य श्वो वा विनाशिने ।
को हि नाम शरीराय धर्मापेतं समाचरेत् ॥ १३२ ॥
जलान्तश्चन्द्रचपलं जीवितं खलु देहिनाम् ।
तथाविधमिति ज्ञात्वा शश्वत् कल्याणम् आचरेत् ॥ १३३ ॥
मृगतृष्णासमं वीक्ष्य संसारं क्षणभङ्गुरम् ।
सज्जनैः सङ्गतं कुर्यात् धर्माय च सुखाय च ॥ १३४ ॥

तन्मम सम्मतेन तदेव क्रियताम् ।

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते ॥ १३५ ॥

अतः सत्याभिधानदिव्यपुरःसरं द्वयोरप्येतयोर् भूपालयोः काञ्चनाभिधानसन्धिर् विधीयताम् । सर्वज्ञो वदति । एवमस्तु । ततो वस्त्रोपहारादिना स मन्त्री दूरदर्शी पूजितः । ततः सन्तुष्टः प्रहृष्टमना दूरदर्शी चक्रवाकं गृहीत्वा मयूरस्य राज्ञः समीपं गतः । तत्र चित्रवर्णेन राज्ञा सर्वज्ञो गृध्रवचनाद् बहुमानदानपुरःसरं सम्भाषितः । तथाविधं सन्धिं स्वीकृत्य राजहंससमीपं प्रस्थापितः । दूरदर्शी ब्रूते । देव सिद्धं नः समीहितम् । इदानीं स्वस्थानमेव विन्ध्याचलं प्रतिगम्यताम् । अथ सर्वे स्वस्थानं प्राप्य मनोवाञ्छितं फलम् अनुभवन्ति । विष्णुशर्मणोक्तम् । अपरं किं कथयामि तदुच्यताम् । राजपुत्रा ऊचुः । आर्य भवत्प्रसादात् सकलराज्यव्यवहाराङ्गं ज्ञातम् । ततः सुखिनो भूता वयम् । विष्णुशर्मोवाच । यद्यप्येवं तथापि अपरम् अपीदम् अस्तु ।

सन्धिः सर्वमहीभुजां विजयिनामस्तु प्रमोदः सदा
सन्तः सन्तु निरापदः सुकृतिनां कीर्तिश्चिरं वर्धताम् ।
नीतिर् वारविलासिनीव सततं वक्षःस्थले राजतां
वक्त्रं चुम्बतु मन्त्रिणाम् अहरहो भूयान्महानुत्सवः ॥ १३६ ॥

॥ इति हितोपदेशे सन्धिर्नाम चतुर्थः कथासङ्ग्रहः ॥

॥ समाप्तिः ॥

# ANNOTATIONS.

---

## INTRODUCTION.

Verse 1—'A digit of the moon.' See Line 2112.

5—दुर्धर्ष is rendered in the Bengali version by दुष्प्राप्य 'hard to be reached, unapproachable.'

6—पात्रता and पात्रत्व are equivalent to योग्यता 'capacity, aptitude, fitness, capability.'

7—In the translation the alliteration, of course, is lost. 'To ridicule.' The word equally signifies, 'for laughter or merriment.'

'Shouldered his crutch and shewed how fields are won.'

After this verse, the London edition of 1810 has—

पण्डिते च गुणाः सर्वे मूर्खे दोषाश्च केवलम्।
तस्मान्मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते॥

"And in a learned man are all excellent qualities; but in a blockhead faults only. Therefore, amongst thousands of fools, one wise man is distinguished."

10—For दर्शकम् some copies read दर्शनम् 'exhibition.'

13—Preface to the Pancha Tantra.

After verse 13, some copies insert the following lines. They are of the metre Sikhariṇī.

वरं गर्भस्रावो वरमृतुषु नैवाभिगमनं
वरं जातः प्रेतो वरमपि च कन्यावजनिता।
वरं बन्ध्या भार्या वरमपि च गर्भेषु वसतिर्
न चाविद्वान् रूपद्रविणगणयुक्तोऽपि तनयः॥

"Better an abortion. Better even not visiting at [proper] seasons. Better born and dead; and better, even a girl born. Better a barren wife; and even better remaining in the womb: but on no account an illiterate son, although endued with beauty and ample wealth."

14—Bhartṛi Hari. परिवर्तिन् is explained by the commentator as जन्ममरणधर्मशालिन् janma-maraṇa-dharma-śālin, 'subject to the law of birth and death.'

15—There is here some difficulty about translating the word सम्भ्रम; which not only means 'hurry and confusion,' but also 'respect and reverence.'

16—प्रथित is equivalent to सचेष्ट sa-cheshṭa, 'active,' 'busy.'

17—Chāṇakya.

19—All copies are agreed in giving to भार्या the second epithet, although one might have expected the author would have mentioned a friend as constituting one of the chief elements of human happiness. See, among others, verses 38, 225 and 226 in the "Acquisition of Friends."

20—Kuśūla, 'a granary where rice is kept.' See line 1387

21—Chāṇakya.

22—In the second book of the Mahā-bhārata, entitled Sabhā-parva, 'the chapter of the meeting or assembling together,' a full account is given how Yudhishṭhira at play, lost his kingdom, and all his other possessions, including his wife.

23—यस्य तस्य. See verse 41 of the "Acquisition of Friends." Here is a paranomasia, or play on words, vanśa signifying at the same time 'a cane,' and 'pedigree;' guṇa 'a string,' and 'quality.'

27—Pancha Tantra, ii. 82. This and the two next verses are evidently intended to be the sentiments of an objector, who, not considering that a man's destiny is (according to the Hindu doctrine) the fruit of his own conduct in a former birth, contends that since everything relating to man has been fore-ordained, it is needless for him to exert himself.

30—Pancha Tantra, ii. 147. "The oil is already there in the seeds; but the labour of man is needful to extract it."

31—Pancha Tantra, i. 221.

35—काकतालीय kāka-tālīya. Compare with श्येनकपोतीय śyena-kapotīya, Like hawk and pigeon, and काकोलूकीय kākolūkīya, Like crow and owl, or as we say, like cat and dog (sworn foes). काकतालीयवत् kāka-tālīyavat seems to have become a proverbial expression denoting any event that occurs unexpectedly and opportunely.

36—Pancha Tantra, ii. 139.

38 and 39—Chāṇakya.

The London edition here inserts the following from Bhartṛi Hari. The metre is Śārdūla-vikrīḍita.

विद्या नाम नरस्य रूपमधिकं विद्यातिगुप्तं धनं
विद्या बन्धुरसौ विदेशगमने विद्याक्षयं सम्बलम् ।
विद्या कीर्तिकरी सभावशकरी विद्या परं लोचनं
विद्या जीवनहेतुरत्र भुवने विद्याविहीनः पशुः ॥

"Knowledge [is] truly the chief beauty of a man. Knowledge [is] a well-secured treasure. Knowledge, it [is] a companion in travelling abroad. Knowledge [is] an unwasting provision. Knowledge [is] the maker of fame,—the captivator of assemblies. Knowledge [is] another eye. Knowledge [is] a means of subsistence here in the world. Destitute of knowledge [one is] a brute."

गङ्गाहीनो हतो देशो विद्याहीनं हतं कुलम् ।
अप्रसूता हता नारी हतो यज्ञस् त्वदक्षिणः ॥

"Deprived of the Ganges, a country is stricken. Destitute of knowledge, a family is ruined. Without offspring, a woman is undone. Inefficacious is a sacrifice without gifts.

### ACQUISITION OF FRIENDS.

1—Pancha Tantra, ii. 1.

Line 137—The MS. has लोभाकृष्टेन चेतसा "with a mind attracted by cupidity."

Line 155—The MS. has लोकापवादो "the censure of mankind."

10—Son of Pāṇḍu,—it may be Yudhishṭhira, the eldest of the five Pāṇḍava princes. This verse occurs probably in the Mahā-bhārata, the source from which many of the moral and didactic sayings of the Hitopadeśa have been drawn. They were chiefly spoken by Vidura, son of Vyāsa by a slave-girl, and half-brother and wise counsellor of the Rajas Dhṛitarāshṭra and Pāṇḍu. The Editor now regrets that he did not note them down in the course of his reading through a large portion of that immense and ponderous work. See "Indian Epic Poetry," by Prof. Monier Williams.

12—is in substance synonymous with Matthew vii. 12, although not expressed with the same clearness.

13—Chāṇakya.

14—Koontī was the senior of the two wives of Pāṇḍu, and mother of the three princes Yudhishṭhira, Bhīma, and Arjuna.

15—In the Bengali translation this passage is expounded thus: देश may mean any place of pilgrimage, as Kāśi, etc.; काल the occasion of an eclipse, or the like; and पात्र a worthy recipient, such as the maintainer of a perpetual fire, etc. (अग्निहोत्रादि).

18—Chāṇakya. As Sanskṛit literature is written chiefly in verse, it follows that the composition and structure of a sentence is often made totally subordinate and subservient to the exigencies of the metre; a proof whereof is afforded in this verse.

20—Instead of विधुः, the MS. reads रविः 'the sun.' It is not improbable that the more correct reading is प्रोञ्छितुं 'to efface, expunge, obliterate.' See Mṛich-chhakaṭi, Act 9, p. 140, Stenzler's edition.

21—Something must be supplied here; such as, the speaker having thought well,—the performer having well deliberated; because the indeclinable preter-participles are employed actively.

22—Some copies read भोजने ऽप्यप्रवर्तनं "in eating surely there is no [need of] direction, or command."

27—Quem deus vult perdere prius dementat.

29—Chāṇakya. The last half of the second hemistich is very laconic, and may, perhaps, be intended to mean, "Then go the way by which the desired object may be obtained."

30—In Campbell's Teloogoo and English Dictionary, under the word *uru*, we read *uru-drāḍu*, "a rope with which the calf is tied to the cow when she is milked. This is always done in India, otherwise the cow will not allow her milk to flow."

31—For भीत some copies read भीति 'fear, danger.'

32—Bhartṛi Hari. For सिद्धिरियं some copies read सिद्धमिदं 'this [is] ready prepared,' *i.e.* willing and waiting for a suitable opportunity of being called into exercise.

33—Pancha-Tantra, i. 118.

35—For वस्तूनां the MS. has जन्तूनां 'of animals.'

36—Pancha Tantra, iii. 55.

37—Pancha Tantra, ii. 10.

Line 235—After पचिषु the MS. has श्रमाविष्टः 'overcome with fatigue.'

38—The affix तय added to चतुर् 'four,' makes the substantive चतुष्टय 'a quaternion.' Similarly, from त्रि 'three,' may be derived त्रितय 'a trio;' but, it must be confessed, this word is not to be found in Wilson's Dictionary.

39—Pancha Tantra.

40—There must be some difference of meaning between सम्भाषा and संलाप; but the Editor is not sure of having accurately rendered the latter word.

Line 250—After अवदत् the MS. has मित्र किमनेन पृष्टेन "friend, why ask this?"

41—Pancha Tantra, ii. 141. In verse 23 of the Introduction, the words यस्य तस्य require to be taken together; and in order to give an intelligible meaning to this verse, the relatives and correlatives must be similarly taken together. The Pancha Tantra (ii. 134, etc.) has three apposite ślokas, so illustrative of this passage, that they have been here subjoined.

यथा धेनुसहस्रेषु वत्सो विन्दति मातरम्।
तथा पुराकृतं कर्म कर्तारमनुविन्दति॥
शतसहस्रयानेन गच्छन्तमनुगच्छति।
नराणां प्राकृतं कर्म तद्वत् कर्म महात्मनः॥
यथा छायातपौ नित्यं सुसम्बद्धौ परस्परम्।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरम्॥

"As amongst thousands of milch cows a calf finds [his] mother; so a deed committed a long while ago finds out the doer.

"An ignoble act of men follows [the doer] going through a hundred thousand transmigrations: in like manner the act of a magnanimous [man].

"As shade and light are always closely united the one with the other; in like manner a deed and the doer stick close to each other."

The Editor has some doubt if he is correct in giving the meaning 'transmigration' to the word यान yāna, which, undoubtedly, is in many respects equivalent to गति gati. Perhaps the idea intended in the second of the verses is "on a journey amongst hundreds and thousands of men;" still the translation given above seems to receive confirmation from Manu, who, in chapter vi. verses 61, 62, 63, enforces serious attention to the transmigrations of the soul of man, as the effect of sin, and its glidings through thousands of krores (10,000,000) of uterine passages! (योनिकोटिसहस्रेषु सृतीश्चान्तरात्मनः).

42—A lexicon or encyclopædia, in six volumes folio, with a supplement, has been published at Calcutta in the Bengali character, by Rādhā-kānta Deb. The author's name is given as शातातपभृण्डभरत Śātātapa-bhriṇḍa-bharata: hence the work is called शातातपीयकर्मविपाक śātātapīya - karma - vipāka. Under the word कर्मविपाक karma-vipāka, 'maturity of acts,' is given a long and minute catalogue of the various diseases with which men are born, as the fruit of their conduct in a former birth or previous state of existence; declaring also through how many future births these diseases will continue to afflict the sufferer ere they pass away. The expiatory gifts, whether of gold, silver, grain, cloth, etc. are all duly specified.

Those sinners whose crimes admit not of expiation (प्रायश्चित्तविहीनपापिनां) are invested with a body joined to the particular disease which is incidental to the sin, throughout each birth in Naraka; whilst other sins are expiated (शयं यान्ति) by the repetition of prayers (जप), worshipping of the gods, oblations (होम), gifts, etc.

The diseases with which those who have committed a महापातक mahā-pātaka, *i.e.* 'a crime of a very high degree, as killing a Brahman, stealing gold from a priest, drinking spirits, adultery with the wife of a spiritual teacher, and associating with persons who have committed these offences,' are first mentioned. These are कुष्ठ kushṭha, 'leprosy' (of which eighteen varieties are enumerated), राजयक्ष्मन् rāja-yakshman, 'pulmonary consumption,' प्रमेह prameha, 'urinary affection,' ग्रहणी grahaṇī, 'diarrhœa,' मूत्रकृच्छ्र mūtra-kṛichchhra, 'strangury,' अश्मरी aśmarī, 'stone,' कास kāsa, 'cough,' अतिसार atisāra, 'dysentery,' भगन्दर bhagandara, 'fistula,' दुष्टव्रण dushṭa-vraṇa, 'boil, sinus,' गण्डमाला gaṇḍa-mālā, 'inflammation of the glands of the neck,' पक्षाघात pakshāghāta, 'palsy, hemiplegy,' अक्षिनाशन akshi-nāśana, 'ophthalmia.' These diseases are said to afflict the offender throughout seven births or transmigrations.

The diseases consequent on crimes of a secondary character (उपपातक upapātaka), such as killing a cow, selling a daughter, atheism, etc. are—जलोदर

jalodara, 'dropsy,' यकृत् yakṛit, 'liver-disease,' प्लीहा plīhā, 'affection of the spleen,' शूल śūla, 'cholic,' व्रण vraṇa, 'ulcer,' श्वास śwāsa, 'asthma,' जीर्णज्वर jīrṇa-jwara, 'chronic fever,' छर्दि chhardi, 'vomiting,' भ्रम bhrama, 'vertigo,' मोह moha, 'syncope,' गलग्रह gala-graha, 'quinsey,' रक्तार्बुद raktārbuda, 'plethora, hemorrhage,' विसर्प visarpa, 'erysipelatous inflammation.' These diseases cleave to the transgressor during five births or transmigrations.

Diseases consequent on sins of a more ordinary character are—दण्डापतानक daṇḍāpatānaka, 'spasmodic contraction of the body, emprosthotonos,' चित्रवपुस् chitra-vapus (speckled-body), 'white or spotted leprosy,' कम्प kampa, 'tremor,' विचर्चिका vicharchikā, 'herpes, scab,' वल्मीक valmīka, 'elephantiasis,' पुण्डरीक puṇḍarīka, 'leprosy,' and others. These diseases arise during three births. Sins of a more serious character are visited with sorer maladies, as अर्श arśa, 'hemorrhoids,' and others of a compound nature.

The expiatory gifts are next mentioned; and as a general rule, if the gift be a cow, it is required that she be good-tempered, accompanied by her calf, and in full milk. If the gift be a male, it must be an ox, accompanied with white cloth and gold (शुक्लवस्त्रकाञ्चनसहितः śukla-vastra-kāṉchana-sahitah). If the gift be land, it shall be ground measuring ten nivartanas. A nivartana (निवर्तन) is a measure of land, 20 rods or 200 cubits square. In giving gold, the amount must be ten nishkas (निष्क), or a moiety thereof. If the gift be a horse, he must be good-tempered (सुशील su-śīla), accompanied by his trappings (उपस्कर upaskara). If the gift be a buffalo, it must be a female (महिषी mahishī), accompanied by weapons and gold (स्वर्णायुध swarṇāyudha). In the great gift of an elephant, it must be a male (गज gaja), with a pala (पल a certain weight) of gold.

In worshipping a god, there must be an offering of flowers 100,000 more or less (लक्षोच्चावचं lakshoch-chāvacham). In feeding Brahmans, there must be a provision of sweet condiment (मिष्टान्न mishṭānna) sufficient for a thousand Brahmans. In giving grain, the measure must be sixty kharīs (खरी). In giving cloth, a couple of pieces of woven silk (पट्टवस्त्रद्वयं paṭṭa-vastra-dwayam), imbued with camphor.

Instructions are afterwards laid down respecting the mode in which expiation (प्रायश्चित्त prāyaśchitta) is to be performed, including due worship to the gods, suitable entertainment to the Brahmans, and sundry other particulars, too numerous to be repeated in this place.

43—Chāṇakya. Manu, vii. 213.

46—Instead of गुणानां some copies read बलानां.

51—Pancha Tantra, ii. 19.

52—Bhartṛi Hari, and Pancha Tantra, ii. 20.

53—Pancha Tantra, ii. 21.

54—The MS. reads मुक्तितां गताः. If there be such a word as muktitā, it must mean 'a state of emancipation.'

61—Pancha Tantra, i. 187, and Manu, iii. 101.

63—Compare with Matthew v. 45.

65—Compare with Hebrews xiii. 2.

Line 356—Touching the ground and touching the ears may be a mode of expressing abhorrence similar to the Jews throwing dust in the air (Acts, xxii. 23).

Line 357—The eleventh chapter of Manu contains an account of the various modes of expiation ordained by the Hindu lawgiver.

Before Verse 66, the MS. has the following:

अहिंसा परमो धर्मः अहिंसा परमा गतिः ।
अहिंसा परमा प्रीतिस् त्वहिंसा परमं पदम् ॥

"Harmlessness [is] the chief duty. Harmlessness [is] the most excellent way. Harmlessness [is] joy supreme. Harmlessness [is] a lofty station."

67—Manu, viii. 17.

69—This verse is somewhat obscure; but the general sense has doubtless been given. In some copies the second hemistich reads,

शक्यते नानुमानेन परो ऽपि परिवर्णितुम्

but this version is still more unsatisfactory.

Line 381—The MS. reads मम प्राणाधिको बन्धुः "my more-than-life-valued friend."

73 and 75 are from Chāṇakya.

After Verse 76, the MS. has the following. The metre is Āryā.

मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुनानां निष्कारणवैरिणो जगत् ॥

"Deer, fishes, and virtuous men, whose condition in life has been fixed amongst herbage, in the waters, and in contentment, have enemies without cause,—a world of hunters, fishermen, and malevolent whisperers."

79 and 84 are from Chāṇakya.

90—Pancha Tantra, iii. 23.

91—From Chāṇakya and Bhartṛi Hari.

"Which like the toad, ugly and venomous,
"Wears yet a precious jewel in his head."
—*As You Like It*, Act ii. Scene i.

93—Pancha Tantra, ii. 46.

Line 456—The MS. has विवरद्वारि vivara-dwāri, 'at the entrance of the hole.'

94—Pancha Tantra, ii. 36.

95—Pancha Tantra, ii. 35.

105—Pancha Tantra, i. 364.

106—Pancha Tantra, ii. 128.

107—Chāṇakya. Instead of नासमीक्ष्य some copies read मा ऽसमीक्ष्य implying 'dissuading or forbidding.'

109, 110, and 113 are from Chāṇakya

121—The MS. has प्रहसनं 'loud laughter.'

122—Manu, ix. 13.

123—Pancha Tantra, i. 154.

127—Chāṇakya.

128—Manu, ix. 3.

129—Manu, ii. 215.

130—Pancha Tantra, i. 199.

132—Pancha Tantra, ii. 131.

133—Pancha Tantra, ii. 92.

134—Pancha Tantra, i. 3.

After Verse 135 the MS. has—

दारिद्र्येणाभिभूतस्य पञ्च नश्यन्ति देहिनः।
लज्जा शौचं तथाचारः सत्यं धर्मश्च पञ्चमः॥

"Five [virtues] of a human being when overwhelmed by poverty, perish—shame, purity, good conduct, truth, and fifthly, religion.

137—Bhartṛi Hari.

138—Chāṇakya.

142—Bhartṛi Hari. "Aut Cæsar, aut nullus."

153—Pancha Tantra, ii. 162.

156—For वाह्यमानस्य the MS. has बाध्यमानस्य 'being tormented.'

159—Chāṇakya, and Pancha Tantra, iii. 81.

161—Pancha Tantra, v. 21.

162—For मधुरे the MS. has रसवत् 'delicious.'

165—Pancha Tantra, ii. 157.

The MS. here inserts a śloka—

आयासशतलब्धस्य प्राणेभ्यो ऽपि गरीयसः।
एकैव गतिर् अर्थस्य दानम् अन्या विपत्तयः॥

"Of wealth acquired by hundreds of laborious efforts, [and] more precious even than life, [there is] but one way of disposal—distribution. Misfortunes [are] the others. Nearly the same as Verse 173.

169—Pancha Tantra, iii. 97.

173—Bhartṛi Hari, and Pancha Tantra, ii. 159.

186—Pancha Tantra, ii. 130.

187—For समायुक्तौ the MS. has परिष्वक्तौ 'surrounded, embraced.'

189—Pancha Tantra, ii. 122.

193—Pancha Tantra, ii. 167.

194—Pancha Tantra, i. 449.

Line 781—The MS. has सर्वदाश्रयणीयगुणो ऽसि.

206—Chāṇakya. The Vaṭa or Burr-tree—

"The fig-tree: not that kind for fruit renowned,
"But such as at this day, to Indians known,
"In Malabar or Deccan spreads her arms
"Branching so broad and long, that in the ground
"The bended twigs take root, and daughters grow
"About the mother tree, a pillar'd shade
"High overarched, and echoing walks between;
"There oft the Indian herdsman, shunning heat,
"Shelters in cool, and tends his pasturing herds
"At loop-holes, cut through thickest shade."
—*Paradise Lost*. Book ix., line 1100.

209—Bhartṛi Hari.

212—Chāṇakya.

213—Pancha Tantra, iii. 154. The second hemistich reads thus in the MS.—

अग्निसाक्षिकमर्यादो भर्ता हि शरणं स्त्रियः॥

"For the refuge of a woman [is] a husband, to whom conjugal fidelity has been pledged in the presence of the sacred fire."

218—Compare with Manu, vii. 22.

220—Pancha Tantra, ii. 187.

